लोकप्रियसाहित्यग्रन्थमाला - १७

# आचार्यरतिनाथझारचनावली

प्रधानसम्पादकः

**प्रो० राधावल्लभत्रिपाठी**

कुलपतिः

सम्पादकः

**प्रो० सूर्यप्रकाशव्यासः**

संस्कृतविद्या-धर्मविज्ञान-संकायः

काशीहिन्दूविश्वविद्यालयः

वाराणसी

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
५६-५७, इन्स्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८

e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 978-93-86111-43-2

संस्करणम् : २०१०

मूल्यम् : ₹ 160/-

मुद्रकः
अमर प्रिंटिंग प्रैस, दिल्ली-९
amarprintingpress@gmail.com

# पुरोवाक्

विदन्त्येव विज्ञा यत् साम्प्रतिकेऽस्मिन्नतिविचित्रसमयान्विते समये संस्कृते विपुलं वाङ्मयं विरच्यते सुरसरस्वतीसमाराधकैः। विंशशताब्दी-संस्कृतसाहित्येतिहासस्य स्वर्णकाल इति युक्तमुक्तवान् सुकवी राजेन्द्रमिश्रः। अस्यां विंशशताब्द्यां परम्परा आधुनिकतामालिङ्गति, प्राचीनं शास्त्रवैभवम् आधुनिकज्ञानविज्ञानरत्नैश्च सङ्गतं विद्योततेतराम्। वस्तुतः समसामयिकसंस्कृत-साहित्यस्य नवोन्मेषः कामपि विशिष्टामभिख्यां तनोति स्वकीयाम्। अस्मिन् नवोन्मेषे ये महान्तः शास्त्रधुरीणाः पण्डिता सरसललितनवकाव्य-विधानविचक्षणाश्च सुकवयः किमपि विलक्षणम् अवदानं प्राकटयन् तेषु कविवरेण्यो रतिनाथझावर्योऽग्रगण्यः। वस्तुतो विच्छित्तिविशेषरम्याभिः सदुक्तिभिः सहृदयानां सविशेषं मनो हरति स्म कविरयम्। तेनायं काश्याः कविभारतीकुसुमाञ्जल्यां प्रायः पञ्चाशद् वर्षाणि विकचनवकुसुममिव हृद्यावद्यपद्यसौरभमाततान। काशीहिन्दूविश्वविद्यालयसेवातो निवृत्तः कविरयं स्वगृहनगरं गतः, तत्र निवसन् यदा कदाचित् कविसहृदयगोष्ठीसु सस्पृहं श्लाघान्वितं स्मर्यते स्म।

बहुसंख्यकास्तदा तैस्तैः कविमित्रैरेनमधिकृत्य विरचिताः प्रशस्तयोऽत्र प्रमाणम्। प्रशस्तिकाव्यस्य भवति किमपि प्राशस्त्यं संस्कृतवाङ्मयपरम्परायाम्। वटुकनाथखिस्ते-रेवाप्रसादद्विवेदि-शिवज्युपाध्याय-शिवदत्त चजर्वेदि-मनुदेवभट्टाचार्यादिभिर्या रतिनाथप्रशस्तयो गुम्फितास्ता अस्य कवेः परिस्फुरन्तंप्रतिभा विशेषं प्रकरीकुर्वन्ति।

अथ दिवं प्रयातेऽस्मिन् हन्त विंशोनविंशशतकभवानां बहूनामसाधारणकविप्रतिभाजुषां साहित्यकाराणां यथा असंख्या बहुमूल्या रचना लयं यातास्तथैव अस्यापि सुकवेः कमनीय-कवितावितानं लोपं यास्यतीति चिन्ता बाधते स्म रतिनाथझाप्रशंसकानां समाजम्। दिष्ट्या मदनुरोधेन सुहृद्वर्यः सङ्कल्पाध्यवसायसूर्यः श्रीसूर्यप्रकाशव्यासो महताध्यवसायेन

प्राय: समग्रं रतिनाथझासाहित्यमुद्धृत्य सम्यक् च सम्पाद्य इमां रचनावलीं प्रकाशनार्थं संस्थानाय अददात्।

रतिनाथस्य महाकवे: काव्यविशेषा: कथं कीर्त्येरन्? अस्य तावदन्यैव काऽपि विलसति रचना वचनावलीनाम् के भावा: के हृदयङ्गमा अर्था: के के च शब्दविशेषा न सङ्गता अस्य काव्यव्रजे? रतिनाथोकवि: सहृदयहृदयमन्मथ इव सत्यं ललितसुन्दरसरसरचनाभि: कविताया रतेर्नाथ इति मन्यन्ते स्म तदानीन्तना अस्य समसामयिका: सहृदया: प्रशंसका:, तथापि गाढबन्धौजस्विकाव्यविरचने समसामयिककविसङ्गतीनां निरूपणे अयं न न प्रथते। बाङ्ग्लादेशस्वाधीनतासङ्ग्राममधिकृत्य मुज़ीबुर्रहमानस्य सङ्घर्षमहागाथां, वाश्रित्य यदा काश्या: कविभारतीयकुसुमाञ्जल्यां संस्कृतकवीनां प्रावहत् स्फीता वाग्धारा, तदा तस्या: प्रवाहे अस्यापि अनितरसाधारणप्रतिभास्फुरण-मनोहरा रचनास्तत्र सङ्गता:। तथाहि-

**महाद्रिकल्पमुल्लसत्पिशाचमण्डलोपमं**
**प्रचण्डमुग्रबाहुदण्डमन्तकप्रियं परम्।**
**तरङ्गरिङ्गणक्रमैरुदग्रसञ्चरत्स्वरै-**
**रमञ्जयज्जवेन विभ्रमेण मुक्तिवाहिनी॥**

**दुरन्तशस्त्रसङ्कुलोल्लसत्करैश्चलत्पदै-**
**रपारपाकसैनिकैर्निरस्त्रबङ्ग-नाशकै:।**
**नितान्तमर्दितां महीमचीचयत्स्वजीवनै:**
**पराभियानरोधनैर्मुजीबमुक्तिवाहिनी॥**

**स्वतन्त्रानुरागरक्तमानसोच्छलद्रसै:**
**सुवर्णबङ्गभूमिमानरक्षणे दृढव्रतै:।**
**वसुव्ययैरसुव्ययैरपि प्रमत्तयौवनैर्नवाभि-**
**मन्युसैनिकै रराज मुक्तिवाहिनी॥**

रतिनाथ: सत्यं संवेदनाप्रवण: कवि:। अस्य परवर्तिभि: जगन्नाथपाठक-हर्षदेवादिभि: महाकविभि: नारीमधिकृत्य विरचितानि अतितरां मार्मिकाणि पद्यानि काव्यानि वा, तथैव महाकवेर्बच्चुलावस्थिवर्यस्य मातृस्तवसदृशी रचना तु सर्वथा सरस्वत्या: कण्ठहारायते। परन्तु

तदानीन्तकाशीकविषु नारीविषयिकामेतादृशीम् उदाररम्योज्जवलां मातृभावबोधभरितां पावनीं कवितां रचयितुमजानात् कवी रतिनाथ एव–

**पुंसां बलेन सबलापि परं पुमांस-**
**मानर्तयत्यविरतं नयनेङ्गितेन।**
**शक्तिं विरुद्धघटनास्वपि सन्दधाना**
**नानाकृतिर्विजयते भुवनेषु नारी॥**

**स्तन्येन, मुग्धवचनेन, निजाङ्कमध्ये**
**क्रीडारतेन शुचिलालनपालनेन।**
**स्नेहामृतेन, विमलीकरणेन, शश्वत्**
**सेवाव्रतेन पृथुकान् परिपाति नारी॥**

**वामापि दक्षिणतमा, परुषापि मृद्वी,**
**वक्रापि पूर्णसरला, समदापि मुग्धा।**
**मुक्तापि संयमवती, मलिनापि भव्या,**
**कामं भुजङ्गसहितापि शिवास्ति नारी॥**

प्रथमपद्ये सबलत्वे सत्यपि केवलं नयनेङ्गितेनैव पुमांसमविरतं नर्तयतीति कथने कारणे सत्यपि कार्याभावाद् विशेषोक्तिः, तत्पोषितो नार्या माहात्म्यातिशयस्तेन चोदात्तालङ्कारः। द्वितीये पद्ये नार्याः परिपालनकर्मणो बहवोऽसाधारणा हेतव उक्तास्तैरुद्दीप्तो दीपकालङ्कारः कवितां दीपयति। अथ तुरीये पद्ये विरुद्धघटनास्वपि शक्तिं सन्दधानाया यत् स्वरूपं पूर्वं वर्णितं तद्दाढ्र्याय विरोधाभासः, भुजङ्गसहितापि शिवेत्यत्र श्लेषस्तत्र कामपि वक्रोक्तिविच्छत्तिं पुष्णाति।

कविरयं महामनीषिणो मालवीयस्य महत्ताम्, योगिनो अरविन्दस्य प्रज्ञां च तादृशैरेव पदैः साक्षात्कारयति। प्रायो वल्लर्यः स्वैरं सहकारादिपादपान् श्रयन्ते। परन्तु कदाचित् काचित् भवति तादृशी एका प्रेमलता या अनन्याश्रिता आत्मनो जीवनरसेनैव विकसन्ती उन्मुक्तं विलोकयति निस्समीम नभः। तथैव कविविटपेष्वपि न भवन्ति बहवस्तादृशा बान्धवा ये तादृशीं प्रेमलतां भगिनीनिर्विशेषं पश्यन्तः पोषयेयुः शब्दालवालैः, सिञ्चेयुर्वा नवार्थजलैः। एतादृश्याः समस्तसाहित्यसङ्गीतकलासाधकानां भगिन्याः प्रेमलताया जीवनं

यथा सहजबन्धुभावेन परामृश्य रतिनाथेन महाकविना निबद्धं तथा कोऽन्यः कर्तुमशक्ष्यत?

कविभारतीकुसुमाञ्जल्या गोष्ठीसु समजायत समस्यापूर्तिविषये समधिकतरः कविसमवायस्य प्रतिभाप्रकाशः रतिनाथस्य समस्यापूर्तयस्तत्र बहुधा लोकम्पृणत्वं जग्मुः। कृष्णमेघस्य चाकचिक्यं वैश्ववानरस्य शैत्यं च विभावयितुमसावेवाजानात्। दिङ्मात्रमुदाह्रियते–

**औचित्याद् विमुखस्य केवमहाहङ्कारवश्यात्मनः**
**क्रोधावेशवशाद् हिरण्यकशिपोर्दत्ताज्ञयाग्निस्पृशः।**
**रामे रक्तहृदः सदा व्यपगतत्रासस्य भक्तेशितुः**
**प्रह्लादस्य कृते नितान्तजटिलो वैश्वानरः शीतति।।**

तथा च–

**उद्दण्डचण्डकरपीतरसारसस्य**
**पङ्कीकृतार्यजनशोषितमानसस्य।**
**दुःशासनस्य महसः प्रशमाय कश्चिन्-**
**मोदाय तप्तजगतोऽजनि कृष्णमेघः।।**

ग्रन्थावलीयं सहृदयमनः प्रीतये स्यादित्याशासे

**–राधावल्लभः त्रिपाठी**

# सम्पादकीयम्

*सृजन एक दिव्य कर्म है। यद्यपि स्रष्टा सर्वविध लौकिक नियमों, मर्यादाओं और बाध्यताओं से सर्वथा परे होता है तथापि स्रष्टा के सृजन का परम ध्येय आत्मसन्तोष और लोक-कल्याण ही होता है। वह अपने अध्यात्म से प्रेरित तथा लोक से प्रभावित होकर जिस सृष्टि को साकार करता है उसे लोक को ही समर्पित कर देता है। सर्वोच्च स्रष्टा का यही स्वभाव होता है कि वह सृजन के कर्तृत्व का किञ्चिन्मात्र भी अभिमान नहीं रखता। वह भली-भाँति जानता है कि अभिमान को तनिक भी आश्रय देना सृजन की विशुद्ध सात्विकता को विकृत करना है। भारतीय सांस्कृतिक परिवेश में यही सृजन का दर्शन है।*

*सृजन को दिव्य और आध्यात्मिक कृत्य मानने वाले सर्जक स्वतन्त्र, स्वाभिमानी और निर्भय तो होते ही हैं किन्तु साथ ही विनय, सारल्य, सहृदयता और निरभिमानता भी उनके स्वाभाविक गुण होते हैं। लौकिक यश-अपयश से अनासक्त और आलोचना से निरपेक्ष रहते हुए वे धैर्य की प्रतिमूर्ति बनकर इस जीवन-सूत्र में दृढ़ विश्वास रखते हैं-*

....उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा,

कालो ह्ययं निरवधिः विपुला च पृथ्वी।।-भवभूति

*सृजन के रूप-स्वरूप बहुविध हैं। किन्तु इन सबमें काव्य का सृजन सर्वोत्तम तथा सर्वाधिक कठिन भी और साथ ही सरल भी है। इसीलिए काव्य के स्रष्टा को बहुत ऊँचा स्थान दिया गया है-* कविर्मनीषी परिभूः स्वयंभूः। *इसी सृष्टि-दर्शन का अनुगमन करते हुए अनेकानेक संस्कृत कवियों ने सनातन, विलक्षण और महनीय कृतित्व पर अपना नामाङ्कन नहीं किया और यदि कहीं नामोल्लेख कर भी दिया तो उसे देश-कालादि सङ्केतों व परिचयों से सर्वथा मुक्त रखा।*

*संस्कृत काव्य की यात्रा व्यास-वाल्मीकि, भास-कालिदास और बाण-दण्डी जैसे महासागरों, हिमालयों और महारण्यों को*

*आत्मसात् करते हुए आधुनिक औद्योगिक व आर्थिक युग में प्रवेश कर गई। किन्तु इस युग में भी कतिपय कवि-नक्षत्र ऐसे हैं जिन्होंने अपने व्यक्तित्व और कृतित्व की आभा से सृजन के उस उदात्त दर्शन को आलोकित किया, साकार किया। उन्होंने प्रमाणित किया कि यह दर्शन आज भी जीवित है। यह प्राचीन अथवा काल्पनिक आदर्श नहीं अपितु भारतीय सांस्कृतिक सुगन्धि से परिपूरित व्यावहारिक जीवन-शैली है। वस्तुतः आज के समाज में दोनों पक्ष विद्यमान हैं। एक ओर अङ्गुलिगण्य मुद्राओं के लिए प्राणहरण के प्रसङ्गों की प्रचुरता है तो दूसरी ओर कोटि-कोटि मुद्राओं और स्वर्णाभूषणों के गुप्तदान का दिव्य, उदार और विनम्र व्यवहार भी सुलभ है। काव्यक्षेत्र में एक ओर अन्यान्य कवियों के काव्य-चौर्य से स्वयं को स्थापित करने का षड़यन्त्र है तो दूसरी ओर अपने उदात्त साहित्य को प्रकाश के प्रभात तक पहुँचाने के प्रति उदासीनता के उदाहरण भी द्रष्टव्य हैं।*

*आधुनिक काशी के संस्कृत कवि आचार्य रतिनाथ झा ( १५ जुलाई, १९२२*-२ जनवरी,२००३ ) सृजन के उपर्युक्त दर्शन की आदर्श विभूति हैं। नितान्त ग्रामीण किन्तु ओजस्वी और सम्पन्न परिवेश से प्रादुर्भूत एक साधारण खद्योत अपनी प्रतिभा व साधना से शनैःशनैः संस्कृतविद्या और संस्कृत-काव्य के आकाश का दिव्य नक्षत्र कैसे बनता है, इसका उदाहरण है पण्डित झा का व्यक्तित्व और कृतित्व। कविकर्म उनके व्यक्तित्व और विचार का अपरिहार्य और अविभाज्य अङ्ग था। वे कविता में सांस लेते थे, उसे ओढ़ते-बिछाते थे, उसके साथ खाते-पीते और चलते-फिरते थे। मित्रों से कविता में पत्राचार करते थे। माङ्गलिक अवसरों पर कविता में आशीर्वाद देते थे व शुभकामनाएँ प्रकट करते थे। कविता मानो उनकी स्वाभाविक छाया थी जो अनायास और निरन्तर उनका अनुगमन करती थी। वे कविता-कला की सायास साधना नहीं करते थे बल्कि उनके सरल, सुमधुर, निश्छल और दार्शनिक व्यक्तित्व से आकृष्ट होकर कविता स्वयम् उनके पीछे-पीछे मुग्धा नायिका की भाँति चली आती थी। मानो संस्कृत कविता ने उनमें अपना आधुनिक कालिदास पा लिया हो। सम्भवतया इसीलिए उनके*

---

*झा परिवार मकरसङ्क्रान्ति को परम्परया उनका जन्मदिवस मनाता है।

*समकालीन कवियों की वाणी ने उनके व्यक्तित्व और काव्य का इन शब्दों में प्रशस्तिगान किया है-*

....येषां काव्यनिर्माणेऽणुरपि नायासः परिलक्ष्यते।....एतेषां हृदयखनेरुद्‌भूता सौवर्णी सर्वथा श्यामिकया विरहिता ....।

*- म. म. पण्डित बटुकनाथशास्त्री खिस्ते*

....यस्येच्छामनुवर्ततेस्म कवितापीयूषधारा......।

*- आचार्य रेवाप्रसाद द्विवेदी*

....काश्यां समुद्धृतिसमुन्नयसूत्रधारेष्वेकोऽभवत्कविषु काव्यगुरूपमानः।

*- आचार्य शिवजी उपाध्याय*

.... अस्मद्‌युगसमुद्‌भूतः कालिदासो महानयम्।

*- आचार्य शिवदत्तशर्मा चतुर्वेदी*

....स श्रीमान् रतिनाथ इत्यभिधया ख्यातोऽभवद् भूतले।

*-आचार्य मनुदेव भट्टाचार्य*

.... सोऽयं सौहित्यराशी रतिपतिसुकविः स्वैर्यशोभिर्विभाति।

*- आचार्य विन्ध्येश्वरीप्रसाद मिश्र*

*स्तर, सामर्थ्य, स्थायित्व, गाम्भीर्य आदि गुण सृजन की संख्या और आकार पर निर्भर नहीं करते। सर्वविध सामर्थ्य होते हुए भी पं. झा ने कोई महाकाव्य और महानाटक तो नहीं लिखा किन्तु दो सौ से अधिक प्रकीर्ण छन्द, पाँच शतक, अनेकानेक समस्यापूर्तियाँ, अभिनन्दनपत्र आदि के माध्यम से जिस कवित्व और रचनाकौशल को प्रस्तुत किया वह व्यापकता, विविधता, महत्ता, गम्भीरता, सुन्दरता, मधुरता आदि की दृष्टि से किसी महाकाव्य के स्तर से कम नहीं है। यह कृतित्व काव्यलोक के ऐतिहासिक प्रासाद में उन्हें प्रशस्त पद पर प्रतिष्ठित करने में निर्विवादरूप से समर्थ है।*

*पं. झा का व्यक्तित्व तथा शास्त्र और लोक का उनका सूक्ष्म व गहन अध्ययन उनकी कविता में पदे पदे प्रतिबिम्बित होता है। समस्या कोई भी और कैसी भी हो, उसकी पूर्ति और समाधान की उनकी अपनी विशिष्ट शैली है। जीवन के संघर्ष ने उनके व्यक्तित्व को दार्शनिक संस्पर्श दिया । धैर्य, साहस, सन्तोष और स्वाभिमान ने एक ओर उनकी जीवनशैली को गढ़ा तो दूसरी ओर जीवन व जगत् के प्रति*

आत्मीयता व प्रेम ने उनके कवित्व को गंगा-स्नान कराया। इसलिए उनके सन्दर्भ में यह कहना अतिशयोक्ति नहीं होगी कि दर्शन और काव्य के मञ्जुल और मधुर सामञ्जस्य की प्रतिमूर्ति थे पं.झा।

कविविधा के व्यक्तित्व  के धनी पण्डित झा वेशभूषा से साधारण ; आडम्बर,छल-कपट, दुराव-छिपाव आदि से सर्वथा दूर ; स्वभाव से सरस, सरल सुमधुर ; सबके प्रति अति आत्मीय ; दूसरों से सदा समानुभति रखने वाले ;परिवार के प्रिय और उसके भविष्य के प्रति सजग ; सामाजिकों के हितेच्छु ; मित्रमण्डली के अपरिहार्य घटक ; मानसिक स्वास्थ्य के प्रति सदा सचेत किन्तु शारीरिक स्वास्थ्य और भौतिक संसाधनों के प्रति शिथिल ; प्रचार,  यश, सम्मान, पद-प्रतिष्ठा के प्रति उदासीन ; अपरिग्रही और मनसा विश्वपथिक किन्तु शरीर से पदयात्री थे।

पं. झा का कवि-कर्म हिन्दी के महान् कथाकार प्रेमचन्द की कार्यशैली का स्मरण दिलाता है। उनके हृदय में जब भी कविता का निर्झर प्रवाहित होने लगता उस समय जो जैसा अधिष्ठान, फलक या पात्र सुलभ होता उसी में उन अमृतकणों को वे सहेज लेते थे। यह पात्र फिर चाहे बच्चों की कार्यपुस्तिका हो, मलिन पृष्ठों वाली कॉपी हो, केलेण्डर का रिक्त पृष्ठ भाग हो, कपड़ों या मिठाई के साथ आया कोई पैकेट हो, रेपर हो, किसी निमन्त्रणपत्र का लिफ़ाफ़ा हो, सामान का बिल हो या पेंशन पाने के लिए लिखे गए प्रार्थनापत्र की प्रतिलिपि का पन्ना हो। किसी ने लिखने के लिए कभी स्वतन्त्र नई कॉपी दी भी तो उसमें एक कविता लिखे जाने के बाद शेष पृष्ठ खाली रहे क्योंकि सृजन के क्षणों में फिर उसी कॉपी को खोजना तो सम्भव था नहीं। पाण्डुलिपियाँ कहती हैं कि कवि ने कभी किसी शीर्षक से कविता प्रारम्भ की किन्तु आगे कविता का विषय भिन्न हो गया। इसी प्रकार पाण्डुलिपि और प्रकाशित सामग्री को मिलाया गया तो उदाहरणार्थ किसी पाण्डुलिपि में दस छन्द हैं तो ( संभवतया प्रकाशन की सीमा के कारण ) प्रकाशित सात छन्द ही मिले। ऐसा भी हुआ है कि प्रकाशित छन्दों की संख्या  अधिक और पाण्डुलिपि में छन्दों की संख्या कम मिली। इसी प्रकार पाण्डुलिपि व प्रकाशित सामग्री में पाठभेद की भी समस्या रही। बस, सृजन के इसी दार्शनिक अन्दाज़ की कहानी कहती हैं उनकी प्राप्त पाण्डुलिपियाँ। यही नहीं, लिखे हुए को दुबारा स्वयं लिखना, व्यवस्थित-सुरक्षित रखना या किसी शिष्य से उसकी प्रतिलिपि कराकर उसको सहेजने का दायित्व देना भी उनकी प्रकृति

के प्रतिकूल था। जिस प्रसङ्ग से प्रेरित हो कर जिस काग़ज़ पर जो लिखा वह उस प्रसङ्ग पर प्रस्तुत करके सन्तुष्ट हो जाते थे और सोच-समझ नहीं पाते थे कि बाद में भी इसकी कोई उपयोगिता, महत्ता है। उनकी अव्यवस्थित पाण्डुलिपियों को देखकर आज लगता है मानो उनके विशाल हृदय में काव्य का महासागर लहराता था और जब अवसर मिला अपनी कविता-लहरों को उस ( अवसर ) पर मुक्त हस्त से लुटा दिया। ठीक भी है, अनन्त लहरों का सम्राट् सागर भला लहरों की गणना और व्यवस्था कैसे सीख सकता है!

पण्डित झा की चयनित रचनाओं का प्रकाशन कविभारती कुसुमाञ्जलिः , रेखा, ललिता, प्रज्ञा, सन्मार्ग तथा प्रो. राधावल्लभ त्रिपाठी द्वारा सम्पादित षोडशी व आयातिः में हुआ है। अतः कुछ प्रकाशित रचनाएँ थोड़े-बहुत प्रयत्न से उपलब्ध हो गई थीं किन्तु अप्रकाशित छन्दों, अभिनन्दनपत्रादि का संग्रह दुष्कर कार्य था। परिवार ने भी मुखिया के उक्त व्यवहार-पक्ष को आत्मसात् कर लिया था और प्रशंसकों ने कविता की प्रशंसा करके कर्तव्य की इतिश्री मान ली थी। यह तो कविभारती के मञ्च का चमत्कार था कि अन्य कवियों के साथ इनकी समस्यापूर्तियों ने भी प्रकाशन की वैतरणी पार कर ली। तथापि कविभारती में पठित समस्यापूर्तियों के प्रकाशन का निर्णय विलम्ब से हुआ, उसके प्रकाशन की अपनी सीमाएँ रहीं और कुछ ( सम्भवतया ६ ) पुस्तिकाओं के बाद प्रकाशन अवरुद्ध भी हो गया। इसलिए परवर्ती काव्य-गोष्ठियों में पठित छन्दों की प्राप्ति कठिन समस्या बन गई। इसी प्रकार अभिनन्दनपत्रों का संग्रह कठिन समस्या थी क्योंकि उन पर कवि का नाम नहीं होता और वे प्रसङ्गानुसार क्षणजीवी होते हैं -यदि कोई उन्हें प्रामाणिकरूप में सुव्यवस्थित न रखे। निश्चय ही पं. झा ने अर्द्धशताधिक अभिनन्दन पत्र लिखे हैं किन्तु सुलभ न होने और उपलब्ध की प्रामाणिकता की पुष्टि न होने के कारण इस संग्रह में कुछ ही अभिनन्दनपत्र, उनके कर्तृत्व के उदाहरण के रूप में दिये जा रहे हैं। मित्रों को काव्य शैली में पत्र लिखना भी पं. झा को प्रिय था। अतः इसके उदाहरण स्वरूप यहाँ प्रो. अमरनाथ पाण्डेय से प्राप्त एक पत्र भी प्रस्तुत है। उनकी गद्य-शैली का संक्षिप्त उदाहरण म. म. पण्डित महादेव शास्त्री के अभिनन्दन ग्रन्थ से प्रस्तुत किया जा रहा है जिसका सम्पादन उन्होंने संभवतया १९६२-१९६३ में किया था। यह सामग्री आचार्य रेवाप्रसाद द्विवेदी से प्राप्त हुई है। इसी प्रकार

*आचार्य शिवदत्त शर्मा चतुर्वेदी व आचार्य बाबूलाल मिश्र ने भी व्यक्तिगत संग्रह से कुछ सामग्री का योगदान किया है। संक्षेपतः, इस संग्रह में आचार्य झा-विरचित लगभग १६०० छन्दों का समावेश है।*

*सृजन के क्षण में कवि एकान्तप्रिय होता है किन्तु इस प्रक्रिया के बाद श्रोताओं को अपनी अनुभूतियाँ सुनाने के लिए व्याकुल हो उठता है। इस अवसर के बिना सृजन का उसका आनन्द पूर्णत्व को प्राप्त नहीं कर सकता। वह श्रोता तो चाहता है किन्तु अरसिक नहीं, रसिक और सहृदय। इस सात्विक एषणा की पूर्ति के लिए पण्डित झा सहित काशी के कतिपय मूर्धन्य और गम्भीर कवियों ने कविभारती नामक संस्था का शुभारम्भ किया[१]। स्थापित और उदीयमान कवि इस संस्था की मासिक गोष्ठियों के माध्यम से अपने सृजन के आनन्द को द्विगुणित करने लगे क्योंकि यहाँ उन्हें साधारण सहृदय श्रोता मात्र ही नहीं, समानधर्मा कविगण सुलभ थे। इस काव्ययाग में एक कवि अपनी कविता की आहुति को अन्य कवियों को समर्पित कर सकता था और अन्य कवियों की आहुतियों का ग्रहीता भी बन सकता था। पण्डित झा वर्षों तक इसके अध्यक्ष और सचिव रहे और इतनी घनिष्ठ आत्मीयता से इस मंच से जुड़ गए मानो यही उनके कवि-व्यक्तित्व का पर्याय हो। इस सम्पादक को भी पं. झा और डॉ. शिवदत्त शर्मा चुतर्वेदी ने लगभग चार वर्ष तक कविभारती के सचिव पद से सेवा का अवसर दिया और पद की परम्परा और मर्यादा की रक्षा के लिए पं. कपिलदेव पाण्डेय ने प्रत्येक गोष्ठी में किञ्चित् काव्यात्मक प्रस्तुत करने के लिए प्रोत्साहन व परिष्कार दिया।*

*अस्तु, इस संग्रह में रचनाओं को एक व्यवस्था में प्रस्तुत करने का प्रयत्न किया गया है। जहाँ तक प्रकाशन में स्खलनाओं और त्रुटियों का प्रश्न है उसके लिए सम्पादक का स्वल्पज्ञान उत्तरदायी है। अतः सुधी जन क्षमा करते हुए संशोधन के लिए स्वतन्त्र हैं।*

*आचार्यरतिनाथझारचनावली का यह पुष्प उसी महाप्राण कवि के प्रति विनम्र श्रद्धाञ्जलि है। मेरा पूर्ण विश्वास है कि यह प्रस्तुति मात्र शुभारम्भ है क्योंकि इसके बाद भी इस विलक्षण कवि के काव्य पर*

---

*१. कविभारती के रोचक ऐतिहासिक पक्ष पर, राजस्थान विश्वविद्यालय की संस्कृत साहित्य गोष्ठी (१९८८) में मेरे द्वारा प्रस्तुत और देववाणी-सुवासः (डॉ. रमाकान्तशुक्लाभिनन्दनग्रन्थ, द्वितीय खण्ड, १९९३) में प्रकाशित लेख द्रष्टव्य।*

*अनुसंधान, समालोचन आदि का पर्याप्त कार्य शेष है। यह संकलन उन सहृदय पाठकों को समर्पित है जो इस कवि के काव्यरस का साक्षात् आनन्द नहीं ले सके। अतः कवि और पाठक के मध्य से स्वयं को स्थगित करते हुए मात्र इतना ही कहना चाहूँगा - इदं न मम।*

# आभार

*इस संकलन के शिवसङ्कल्प की प्रेरणा और पूर्ति की शक्ति जिस अज्ञेय तत्त्व से मिली सर्वप्रथम वह प्रणम्य है-* यथा नियुक्तोऽस्मि तथा करोमि। *यह संकल्प और समस्त प्रयत्न सार्थक नहीं होता यदि संस्कृतविद्या और संस्कृतज्ञों के प्रति गहन निष्ठावान्* प्रो. राधावल्लभ *त्रिपाठी, माननीय कुलपति, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली इसे अपने प्रशस्त संस्थान से प्रकाशन की स्वीकृति नहीं देते। अतः मैं* आदरणीय *प्रो. त्रिपाठी एवं संस्थान के प्रति अपनी प्रणति और कृतज्ञता व्यक्त करता हूँ। पं. झा की सुपुत्री और आकाशवाणी की वरिष्ठ उद्घोषिका तथा परिवार के अन्य सदस्यों ने यथोपलब्ध पाण्डुलिपियाँ मुझे दीं । इसके लिए मैं उनका आभारी हूँ। पं. झा और उनके कृतित्व पर अपनी काव्यात्मक अभिव्यक्ति प्रदान करने वालों में अग्रणी हैं-* आचार्य रेवाप्रसाद द्विवेदी *'सनातन'*, आचार्य शिवदत्तशर्मा चतुर्वेदी, *आचार्य मनुदेव भट्टाचार्य, आचार्य शिवजी उपाध्याय और आचार्य विन्ध्येश्वरीप्रसाद मिश्र 'विनय'। इन सबके प्रति भी यह अकिञ्चन जन हार्दिक आभार प्रकट करता है।*

*पाठ संशोधन में प्रो. विन्ध्येश्वरी प्रसाद मिश्र, प्रो० कमलेश झा और डॉ. शरदेन्दु त्रिपाठी ने अपना मूल्यवान् समय दिया। अतः मैं इनके प्रति भी कृतज्ञ हूँ।*

*साधारण शिक्षक का बल असाधारण विद्यार्थी होते हैं। अतः सामग्री के संकलन से लेकर प्रूफ संशोधन आदि विभिन्न कार्यों में मेरी प्रिय शोध-छात्राओं डॉ. अनामिका सिंह, डॉ. विनीता पाण्डेय और श्रीमती विजेयता त्रिपाठी ने जो सर्वविध सहयोग किया उसके लिए शुभाशिषः देते हुए इनके सुखद और उज्ज्वल भविष्य की कामना करता हूँ। प्रिय श्री नवीन कुमार श्रीवास्तव ने कम्प्यूटर पर आंशिक कार्य करके मझधार में छोड़ दिया था किन्तु कुछ माह के अन्तराल के*

*बाद श्री बृजेश कुमार बिन्द ने सतत श्रमपूर्वक इसे सम्पूर्ति तक पहुँचाकर यह स्वरूप दिया, एतदर्थ इन दोनों को तथा अन्य सहयोगियों-श्री प्रदीप सिंह व श्री मुन्नालाल-को भी सप्रेम धन्यवाद।*

*५ जुलाई, २०१०* *सूर्यप्रकाश व्यास*

# ( आ ) अनुक्रमणिका


| | | |
|---|---|---|
| ( अ ) | सम्पादकीयम् | ii |
| ( आ ) | अनुक्रमणिका | viii |
| ( इ ) | आचार्यरतिनाथझा : जीवनवृत्तम् | xii |
| ( ई ) | गुरूणां गुरुः पातु पादौ नमामि - श्री विजयनाथ झा | xiv |
| ( उ ) | कविप्रशस्तिः - पण्डितबटुकनाथशास्त्री खिस्ते | xviii |
| ( ऊ ) | कविप्रशस्तिः - आचार्यरेवाप्रसादद्विवेदः | xviii |
| ( ए ) | कविप्रशस्तिः - पण्डितमनुदेवः भट्टाचार्यः | xix |
| ( ऐ ) | कविप्रशस्तिः - पण्डितशिवजी उपाध्यायः | xx |
| ( ओ ) | कविप्रशस्तिः - आचार्यः विन्ध्येश्वरीप्रसादमिश्रः 'विनयः' | xxii |
| ( औ ) | कविप्रशस्तिः - डॉ. शिवदत्तशर्मा चतुर्वेदः | xxii |


प्रथमं सोपानम्

## समस्यापूर्तयःप्रकीर्णछन्दांसि च


| | | |
|---|---|---|
| १. | गणेशः | १ |
| २. | देवीस्तुतिः | २ |
| ३. | दुर्गानिसर्गोज्ज्वला | ४ |
| ४. | लक्ष्मीः | ५ |
| ५. | हनुमन्तमीडे | ६ |
| ६. | वीरमङ्गलाष्टकम् | ७ |
| ७. | सरस्वती सा | ८ |
| ८. | वाणी | ९ |
| ९. | गीर्वाणवाणी | ११ |
| १०. | वाणीविलसितम् | ११ |

११. तत्संस्कृतम् १२
१२. तत्संस्कृतं जयति,... १९
१३. प्राच्यविद्या २३
१४. कविभारती २८
१५. राष्ट्रम् ३०
१६. गणतन्त्रम् ३१
१७. मुक्तिवाहिनी ३१
१८. राजते राजनीतिः ३२
१९. ग्रीष्मः ३३
२०. जलधरावाहनम् ३४
२१. कृष्णमेघः ३५
२२. मेघमाला ३६
२३. वारिवाहः ३६
२४. घनं प्रति ३७
२५. गन्धवाहः ४०
२६. वाताः ४१
२७. पूर्णचन्द्रः ४१
२८. चन्द्रः प्रवालप्रभः ४२
२९. कौमुदी ४३
३०. वसुन्धरा ४४
३१. मञ्जरी ४४
३२. कमलिनी ४५
३३. मधुलिहाम् ४६
३४. सौरभम् ४७
३५. सुमनसाम् ४७
३६. वैश्वानरः शीतति ४८
३७. तुहिनागमः ४९
३८. हिमागमः ५०
३९. वर्षितम् ५०
४०. शरद् ५२
४१. शरन्नितान्तम् ५३
४२. सन्ति सन्तो वसन्तः ५४
४३. हेमन्तः ५५
४४. कालस्य लीलायितम् ५७
४५. जीवितम् ५८
४६. लाभो महान् ५९

| | | |
|---|---|---|
| ४७. | लम्पटाः | ५९ |
| ४८. | नारी | ६० |
| ४९. | शरदिन्दुमुखी | ६१ |
| ५०. | सर्वत्र सा दृश्यते | ६२ |
| ५१. | माधुरी | ६३ |
| ५२. | हा हतो मन्दभाग्यः | ६३ |
| ५३. | मौक्तिकम् | ६४ |
| ५४. | करोति | ६५ |
| ५५. | अद्वैतं सुखदुःखयोः | ६६ |
| ५६. | अपौरुषेयम् | ६७ |
| ५७. | गुणानां गणः | ६७ |
| ५८. | परिवर्तनीयम् | ६८ |
| ५९. | नामापि न ज्ञायते | ६९ |
| ६०. | भारो भुवः | ६९ |
| ६१. | सन्तप्यते | ७० |
| ६२. | वदन्तु धीराः | ७० |
| ६३. | प्रबुद्धां न सुप्ताम् | ७१ |
| ६४. | किं चिन्त्यते | ७२ |
| ६५. | का कथा | ७२ |
| ६६. | विजयते | ७३ |
| ६७. | धीमहि | ७४ |
| ६८. | करुणार्द्रचेताः | ७५ |
| ६९. | कथं वर्त्तताम् | ७५ |
| ७०. | गणयति | ७६ |
| ७१. | महीयते | ७७ |
| ७२. | कादम्बिनी | ७९ |
| ७३. | समुज्जृम्भते | ७९ |
| ७४. | चातुरी | ८० |
| ७५. | निरोधः | ८० |
| ७६. | तावदेव | ८० |
| ७७. | उत्तरायणम् | ८१ |
| ७८. | तासु तासु | ८२ |
| ७९. | सम्भ्रमी बम्भ्रमीति | ८३ |
| ८०. | दिव्यौषधम् | ८४ |
| ८१. | वेदाभिधानं महः | ८५ |
| ८२. | महती महार्घता | ८६ |

८३. धवलितम् ८७
८४. त्वयि स्थिरगुणे ८७
८५. होलोत्सवः ८८
८६. लास्यम् ९०
८७. यज्ञोपवीतम् ९०
८८. दक्षिणा ९२
८९. मयूरः ९४
९०. काकली ९४
९१. अमृतकणाः ९६
९२. सुभाषितानि ९७
९३. प्रणामाञ्जलिः ९८
९४. वन्दामहे ९८

## द्वितीयं सोपानम्
## शतकानि

९५. अरविन्दशतकम् ९९
९६. गान्धीशतकम् ११३
९७. मालवीयशतकम् १२८
- श्रीशारदाधरसुधा ...
- प्रशस्तिपञ्चाशिका

९८. प्रेमलताजीवितम् १५२

## तृतीयं सोपानम्
## प्रशस्तयः

९९. कालिदासः १७१
१००. तुलसीदासः १७८
- वन्द्यः सदा जगति ...

१०१. स्वामिनःकरपात्रिणः १८५
- ज्ञानविज्ञानसागरः
- महामनीषी

१०२. आचार्याः बलदेवोपाध्यायाः १८७
१०३. आचार्याः पण्डितबटुकनाथशास्त्रिणः १९०
१०४. आचार्याः श्रीसीतारामशरणाः १९२
१०५. आचार्याः शिवदत्तशर्मचतुर्वेदाः १९४

# ( इ ) पण्डित रतिनाथ झा

## जीवनवृत्तम्

| | | |
|---|---|---|
| जन्मतिथि | - | १५ जुलाई, १९२२ |
| जन्म स्थान | - | ग्राम - पोस्ट तलपुरवां<br>जिला- सिद्धार्थ नगर, उत्तर प्रदेश |
| पिता | - | पण्डित रविनाथ झा |
| शिक्षा | - | वेदान्त शास्त्री, व्याकरणाचार्य ( बिहार ),<br>साहित्याचार्य ( प्राप्त स्वर्णपदक ),<br>एम. ए. ( संस्कृत, काशीहिन्दूविश्वविद्यालय,<br>वाराणसी ) |
| शैक्षणिक सेवाएँ | - | काशी हिन्दू विश्वविद्यालय में-<br>१९५४- १९५९ तक अनुसन्धान सहायक<br>१९५९- १९७० तक व्याख्याता दर्शन<br>१९७१- १९८२ तक उपाचार्य<br>१९८७- १९८९ तक शिक्षामन्त्रालय, भारत<br>सरकार की शास्त्रचूडामणि योजना के अन्तर्गत<br>विशिष्ट ग्रन्थों का अध्यापन बिरला<br>संस्कृत महाविद्यालय, वाराणसी में। |
| मृत्यु | - | २ जनवरी, २००३ |
| संस्थापक सदस्य | - | कविभारती, १९७५ |
| सम्मान एवं पुरस्कार | - | |

१. पण्डित परिषद्, काशी द्वारा १९७४ में पण्डितराज की उपाधि
२. उत्तर प्रदेश संस्कृत अकादमी, लखनऊ १९९१

३. राष्ट्रिय संस्कृत संस्थान, नई दिल्ली
( द्वारा गंगानाथ झा केन्द्रीय
संस्कृत विद्यापीठ के स्वर्णजयन्ती
अवसर पर ) १९९४

५. राष्ट्रिय संस्कृत संस्थान, २०००

६. काशी हिन्दू विश्वविद्यालय द्वारा
शिक्षक दिवस पर, १९९९

कृतित्व :-

सम्पादन

१. श्री मन्महादेवशास्त्रिणामभिनन्दनग्रन्थः
२. भारती-स्तोत्रकण्ठहारः ( प्रथमो भागः )
३. भारती-स्तोत्रकण्ठहारः ( द्वितीयो भागः )
४. कविभारती-कुसुमाञ्जलिः

अनुवादः

५. कादम्बरी-कथामुखम्
६. हर्षचरितम् प्रथमोच्छ्वासः

स्वतन्त्र रचनाएँ

७. श्रीमदनमोहनमालवीयशतकम्
८. श्रीमहात्मागान्धीशतकम्
९. श्रीअरविन्दशतकम्
१०. महावीराभ्युदयमहाकाव्यम् ( विलुप्तम् )
११. प्रेमलताजीवितम्
१२. २००० से अधिक प्रकीर्ण रचनाएँ एवम् अभिनन्दनपत्र

# ( ई )गुरूणां गुरुः पातु पादौ नमामि

विजयनाथ झा

मेरे श्रद्धेय पिता महाप्राण पं. रतिनाथ झा शिव-स्वरूपमय हो चुके हैं। हमने बाबूजी की १६ जनवरी, २०१० को सातवीं बरसी मनायी है। यह लोकाचार है। अस्तु, साथ ही हमारी दृष्टि की व्यापकता इतनी सूक्ष्म भी नहीं जो हम देवत्व में उनकी आसानी से तलाश कर सकें। अतः उनके अतीत को ही नमन की विषय-वस्तु बनाकर हम अपनी कृतज्ञता का ज्ञापन करना चाह रहे हैं। वैसे भी पिता और परमेश्वर का साम्य-भाव शास्त्रों में निरूपित है।

सामान्यतः मनुष्य इह लोक में मायाजन्य विकृतियों से न चाहते हुए भी इतना ग्रस्त हो जाता है जिससे उसकी अन्तर्चेतना जो सर्वथा ज्ञानपरक होती है, निस्तेज-सी हो जाती है। पर इसी संसार में यदा-कदा ऐसे महामानवों का भी अवतरण होता रहा है जो कीचड़ और पानी पर टिके कमल की तरह पानी से विमुखता का सुदीर्घ संबंध-निर्वाह करते रहे हैं। बाबूजी का भी जीवन-दर्शन इन्हीं नियामकों का ऐसा ही विशद वृत्तान्त है जहाँ कर्म और धर्म का समन्वय सभी प्रकार से स्तुत्य तो है ही- यथासंभव अनुकरणीय भी।

बाबूजी का जन्म उत्तर प्रदेश के तत्कालीन बस्ती जिलान्तर्गत, सम्प्रति सिद्धार्थनगर के तलपुरवा गाँव में १५ जुलाई, १९२२ ( पारिवारिक परम्परानुसार मकर सङ्क्रांति ) को एक सम्भ्रान्त मैथिल ब्राह्मण परिवार में हुआ था। जन्म के दो-चार दिनों बाद ही इनकी माता का निधन हो गया। किन्तु संयुक्त परिवार में इनकी एक मात्र चाची को उसी समय एक बेटा पैदा हुआ था जो नियतिवश कुछ ही दिनों में कालकवलित हो गया।

ऐसी विषमता में आपकी चाची ने पुत्रवत् अपना दुग्धपान कराते हुए इन्हें पाला-पोसा। इनकी सगी एक बड़ी बहन थीं जिनका नाम सत्यभामा था। इस प्रकार दोनो ंभाई-बहन का बचपन भरे-पूरे परिवार में बड़े ही लाड़-प्यार के साथ आगे बढ़ता रहा। पाँच वर्ष की अवस्था हो जाने पर इनका नामांकन सरकारी प्रारम्भिक पाठशाला में करा दिया गया जो गाँव से लगभग दो मील की दूरी पर था।

बाबूजी की जुबानी -यह रोचक प्रसंग सुना रहा हूँ। जब वे स्कूल के लिए भेजे जाते तो प्रायः रास्ते में ही रुककर बच्चों के साथ खेल-कूद में समय बिता देते और कलेवा ( जलपान ) आपस में बाँटकर खाने के बाद घर लौट आते। पढ़ने में जैसे कोई रुचि थी ही नहीं।

मेरे बाबा स्व. रविनाथ झा एक मात्र बेटे की पढ़ाई में इस अरुचि से चिंतित रहा करते थे। तब के दिनों में आज जैसी अतिरिक्त ट्यूशन- व्यवस्था भी नहीं थी। संयोगवश इसी अंतराल में बाबूजी के नानाजी हमारे गाँव आये। बाबा से बेटे की पढ़ाई में की जा रही आना-कानी का वृत्तान्त सुना। उन्हें लगा कि यह लड़का यहाँ पर ठीक से पढ़ नहीं पा रहा है, क्यों न इसे हम अपने साथ ( बेतिया-बिहार ) लेते चलें। उन्होंने बाबा से अनुरोध किया और बाबूजी को अपने साथ बेतिया ( ग्राम श्रीनगर ) लेते चले आये।

बेतिया की संस्कृत पाठशाला मातुल ग्राम ( श्रीनगर ) से लगभग ढाई मील की दूरी पर थी। कड़े अनुशासन में पुनः बाबूजी का विद्यारम्भ हुआ। विद्यालय पैदल आना-जाना और पूरा समय गुरुजनों के बीच बिताना-नयी चर्या बन गयी। ननिहाल में इन्हें लाड़-प्यार भी खूब मिलता रहा और पढ़ाई के प्रति पहले वाली अरुचि सुरुचि में बदलने लगी। पढ़ाई की गाड़ी बिना किसी व्यवधान के आगे बढ़ती रही। गांव के निकटवर्ती मामा भी उसी विद्यालय में शिक्षक थे। सारे संयोग बनते गये। बाबूजी की मेधा शुरु से ही विलक्षण थी-कमी थी मात्र सही मार्गदर्शन की। वह भी भगवान् की कृपा से सुलभ हो गया।

बाबूजी के गुरुजन भी उनकी बौद्धिक कुशाग्रता से बेहद प्रभावित थे। विद्यालय में मध्यमा की परीक्षा में सर्वाधिक अंक पाकर तथा प्रथम श्रेणी में उत्तीर्ण होकर बाबूजी ने काशी हिन्दू विश्वविद्यालय के संस्कृत कालेज में शास्त्री में नामांकन करवाया। वहीं रुइया छात्रावास में आवासीय व्यवस्था बनी।

बाबूजी के गुरुजन इनके निर्मल ज्ञान और विलक्षण बौद्धिक मनोयोग का मणिकांचन-योग देखकर अघाते नहीं थे और इन्हें अपने शिष्यों में सर्वाधिक स्नेह देते थे। इन्होंने व्याकरणाचार्य, साहित्याचार्य, एम.ए. संस्कृत परीक्षाएँ गोल्ड मेडल के साथ उत्तीर्ण कीं। बौद्धिक प्रांजलता ऐसी थी कि एम. ए. की कक्षा में जो व्याख्यान अंग्रेजी में दिया जाता बाबूजी उसे तत्क्षण संस्कृत में धाराप्रवाहरूपेण लिपिबद्ध कर लिया करते थे। भाषा पर ऐसी सशक्त पकड़ भगवान् बिरले को ही देते हैं।

बाबूजी के विद्यार्थी जीवन की एक घटना काफी दिलचस्प और हृदयस्पर्शी है। स्नातकोत्तर परीक्षा के किसी पत्र में परीक्षक ने उन्हें शत-प्रतिशत

अंक प्रदान कर दिये थे। परीक्षाफल घोषित होने के बाद इस अभूतपूर्व घटना को लेकर सहपाठियों और सम्बद्ध शिक्षकों में तरह-तरह के प्रश्न उठने लगे। बात परीक्षा-नियन्ता तक पहुँची और परीक्षा-विभाग ने उस कॉपी का पुनरीक्षण करने हेतु एक कमेटी गठित कर दी। चोटी के चार विद्वानों ने एक-एक करके उक्त कॉपी देखनी शुरु की। कहा जाता है कि सभी अपनी खोली गयी कलम को पूरे आयास के बाद भी कॉपी पर स्पर्श नहीं करा सके। सभी प्रश्नों के उत्तर अत्यन्त समीचीन और आशातीत व्याख्या से ओत-प्रोत मिले। कमेटी इस निर्णय पर पहुँची कि इसमें दिया गया शत-प्रतिशत अंक यथोचित है। एक विद्वान् ने तो यहाँ तक अपनी टिप्पणी दे डाली कि यदि मैं इसका परीक्षक होता और यदि यह वैधानिक हो पाता तो ऐसे अपूर्व उत्तर पर मैं १०० से भी अधिक अंक देता। परन्तु विधानतः यह संभव नही है। इसलिए जिस परीक्षक ने इन्हें पूर्णांक दिये हैं, वह भी योग्यता के साथ -साथ प्रशंसा का पात्र है। ऐसी विलक्षण और अप्रतिम प्रतिभा के धनी और धरोहर थे बाबूजी।

कालान्तर में उन्होंने काशी हिन्दू विश्वविद्यालय के संगीत महाविद्यालय में रिसर्च असिस्टेंट के पद पर अपने शैक्षिक सेवादान का श्रीगणेश किया। कुछ वर्षो बाद वे संस्कृत कालेज ( बी.एच.यू. ) में व्याख्याता के पद पर नियुक्त कर लिये गये। इस दौरान बाबूजी पर पारिवारिक बोझ बढ़ा हुआ था। मेरी दादी गंभीर बीमारियों के दौर से गुजर रही थीं, घर में उनके एक ममेरे भाई ( पं. तीर्थराज मिश्र ) व दो चचेरे भाइयों की शिक्षा-दीक्षा आर्थिक तंगी के चलते प्रभावित थी। मुझे अच्छी तरह याद है, तब के दिनों में वे प्रातःकाल स्नातक और स्नातकोत्तर कक्षाओं की दो ट्यूशन करते और शाम को कॉलेज से लौटने के बाद-शहर में गोदौलिया से कुछ आगे 'दीन विद्यालय' में ( जो सनातन धर्म कॉलेज में चलता था- ) एम.ए. हिन्दी के विद्यार्थियों को पढ़ाने जाया करते थे। वाहन साइकिल थी। सुबह कब वे घर से निकलते थे और रात में कब घर लौटते थे-यह मैं देख नहीं पाता था। निश्चितरूप से वे दिन बाबूजी के लिए काफी संघर्ष के दिन थे, परन्तु उन्होनें विपत्ति में धैर्य की नीति पर स्थिर रहते हुए अपने मनोबल को दुर्बल नहीं होने दिया। कालान्तर में परिस्थितिवश माँ को गाँव की सम्पत्ति की देखभाल करने के लिए छोड़कर मैं, दो अनुज ( उपेन्द्र और महेन्द्र ) तथा अनुजा पुष्पा अध्ययनार्थ बाबूजी के साथ काशी आ गए। रीडर पद पर प्रोन्नति के बाद ही उन्हें क्रमशः साइटिका, ब्लड प्रेशर जैसी बीमारियाँ पीड़ा देती रहीं किन्तु संयमपूर्वक वे इन्हें सहते रहे और चिकित्सा भी कराते रहे।

जीवन के हर क्षेत्र में उन्होंने जिस सादगी को समायोजित कर रखा था, वह अपने आप में एक मिसाल थी। इस प्रसंग में एक रोचक घटना का वृत्तान्त है जिसे उन्होंने स्वयं हम लोगों को सुनाया था। उन दिनों वे सेवामुक्त होने के बाद गाँव में रह रहे थे। संसदीय चुनाव हेतु वोट डाले जा रह थे। वे ब्राह्म मुहूर्त में प्रतिदिन घर से टहलने हेतु निकल जाया करते थे। शरीर पर धोती, बनियाइन के सिवा और कुछ नहीं होता। आधी धोती से शरीर को ढके हुए वे घूमते-टहलते घर लौटते। इसी क्रम में टहलकर घर लौटते समय उन्होंने सोचा कि क्यों न रास्ते के पोलिंग बूथ पर पहुँच कर अपना वोट भी डाल दिया जाय। वे उसी आधी-अधूरी वेष-भूषा में बूथ पर पहुँच गये। कुर्सी पर बैठे चुनाव अधिकारी ने उन्हें गंवार ( अशिक्षित ) समझते हुए कहा ''बाबा वहाँ रोशनाई वाला पैड रखा हुआ है-बांये हाथ के अंगूठे को उसमें लगाकर, जहाँ मन हो-वोट डाल दो।'' अधिकारी की इन बातों को सुनकर भी बाबूजी प्रकृतिस्थ बने रहे और विनम्रता के साथ कहा, ''जी हाँ आपने बिलकुल ठीक कहा लेकिन यदि आप अपनी यह कलम एक मिनट के लिए मुझे दे देते- तो मैं हस्ताक्षर कर वोट डाल देता।'' बाबूजी की इस विनम्रता को भाँपते हुए उसने कलम तो दी ही साथ ही क्षमा-प्रार्थना के लिए हाथ भी जोड़ लिये।

१९८० के दशक में बाबूजी कान की पीड़ा से बहुत पीड़ित रहे। नगर में सब प्रकार की उत्तम चिकित्सा व्यर्थ होने पर इस व्याधि से पूर्णतः मुक्ति गांव लौटने पर ही हो पायी। एक बात और जो विशेष रूप से बाबूजी में देखने को मिली, वह उनका असीम काशी-प्रेम था। जीवन के तमाम नियामकों में दार्शनिक दृष्टिकोण के संवाहक इस मामले में न जाने कैसे वे तदर्थ रूढ़िपरक विचारों के आग्रही हुए, यह वही जानें। पर काशी में अन्तिम साँस लेने की आकांक्षा वह हम बच्चों से बारम्बार व्यक्त करते रहे।

सन् २००२ का नवम्बर महीना। मैं अपने निवास पटना से बनारस गया था। लगभग दो सप्ताह मैं उनके साथ रहा। प्रायः प्रतिदिन शाम को बाबूजी के साथ घूमने निकल जाया करता था। तब भी पैदल चलने की उनकी गति इतनी तेजी रहती थी कि मैं उनका साथ देने में परेशान रहा करता था। इस अवधि में उनसे विविध-विषयों पर बातचीत होती रही और जब कभी मैं अपने विषय में (लेखनादि हेतु) पूछता तो वे यही कहते-नियमित अभ्यास से प्राप्तव्य मनोनुकूल होने लगता है।

अस्तु, दिसम्बर, २००२ के दूसरे पक्ष में हृदयाघात हुआ और उन्हें तत्काल सरसुन्दरलाल अस्पताल, वाराणसी में भर्ती करा दिया गया। वहाँ दिनानुदिन उनकी स्थिति बिगड़ती गयी। लगा यह कि अब बाबूजी का घर लौट पाना शायद संभव नहीं। फिर उन्हीं की 'काश्यां मरणान्मुक्तिः' को ध्यान में रख हम लोगों ने उन्हें शिवाला स्थित मां आनन्दमयी अस्पताल में लाकर भर्ती कराया, जहाँ २ जनवरी, २००३ को लगभग रात्रि आठ बजे अपने पूरे परिवार के बीच बाबूजी चिर-निद्रा में सो गये। सभी स्वजन, पुरजन और अभिन्न जनों ने उनके प्रति अगाध भावांजलि अर्पित करते हुए श्राद्धकर्म के अवसर पर कहा था-

''शब्द शिखर बिखर गये, नाथ के अनाथ के।
अर्थ फिर अनंत हुए -नाम रतिनाथ के ।।''

बाबूजी की जीवन-शैली आम लोगों से कुछ भिन्न अवश्य थी। अन्तर्निष्ठ स्वभाव, मितभाषिता और स्वाध्यायरत दिनचर्या में संलिप्त होने के चलते उन्हें तथाकथित सांसारिकता से कुछ कम ही लगाव था। आत्मा से कवि और शरीर से दार्शनिक उनका व्यक्तित्व उस नारियल जैसा रूक्ष या कड़ा प्रतीत होता था जिसे कुरेदकर भीतर प्रवेश करने पर जिस सरस रस का विपुल भण्डार मिलता वह उनके घरेलू नाम 'मिश्री बाबू' को अक्षरशः चरितार्थ कर देता।

मैंने पहले भी कहा है, कविता उनके अजस्र बौद्धिक वैभव का मनोरम शृंगार तो थी ही साथ ही विषयगत आत्ममंथन की प्रक्रिया और उसकी प्रस्फुटन-शैली भी थी।

कवि कर्म के फलस्वरूप मनुष्य अपना स्थान वहाँ बना लेता है- जहां इन्दु और इन्दीवर के स्निग्ध रसास्वादन में उसे सही अर्थो में 'परमानन्दं माधवम्' का अन्तर्बोध मिलने लगता है। यह कविता के आदि आचार्य महामहिम शिव की असीम कृपा का सद्यः फल है। बाबूजी की अपूर्व और अनन्त शास्त्रीय विद्वत्ता को मैं बारम्बार प्रणाम ही कर सकता हूँ। विवेचना का न मुझे अधिकार है और न ही दुस्साहस ही। अतः अज्ञानतावश इस आलेख में जो त्रृटि हुई हो- उसके लिए मैं सभी से क्षमा-याचना करता हूँ।

## (उ) महामहोपाध्यायपण्डितबटुकनाथशास्त्री खिस्ते

*येषां काव्यनिर्माणेऽणुरपि नायासः परिलक्ष्यते, येषां सुकोमलं चित्तं द्रवीभूतं सदिव सरसमधुरकाव्यरूपपरिणाममभ्युपैति त एव सन्ति श्रीरतिनाथझाशर्माणः वाराणसेयेषु संस्कृतकविषु प्रथितकीर्तयः। काव्यरचनायां स्वाध्यायकालादेव कवितार्किकचक्रचक्रवर्तिनां पण्डितमहादेवशास्त्रिणां श्रीचरणेषु प्रवृत्तैरेभिराजीवनं सुविरचितानि सहस्राधिकानि पद्यानि समुल्लसन्ति ; परं स्वकीयरचनायाः प्रकाशने प्रख्यापने वा कमपि मोहं न बिभ्रति झावर्याः। अत एव कतिपयाः परिगणिता एव रचना यत्र कुत्रचित् प्रकाश्यमुपगताः सन्ति। एतेषां हृदयखनेरुद्भूता सौवर्णी सर्वथा श्यामिकया विरहिता, सदसद्व्यक्तिहेतूनां सतामाकलनायालम्।*

# ( ऊ ) पण्डितश्री-रतिनाथ-झा-महाशयानां पुण्यस्मृतौ सानातनाः उद्गाराः

आचार्यरेवाप्रसादद्विवेदः 'सनातनः'

यस्येच्छामनुवर्त्तते स्म कवितापीयूषधारा विना
विश्रान्तिं सहसैव संस्कृतमयी गीतिर्नु सारस्वती।
यल्लेखाक्षरमौक्तिकानि रभसाल्लालित्यलक्ष्मीलतां
व्यानम्रां स्म वितन्वते स रतिनाथोऽभून्न कस्य प्रियः।।१।।

यत्साहित्यमभूत् समस्तनिगमाचान्तं 'महादेव' इ-
त्याख्यः शास्त्रिवरः स वै शतमदादङ्काञ्छतेऽस्मै मुदा।
तत्राख्यां कृतवानभूच्च विशदस्वान्तो विदामुत्तरं
दृष्ट्वा श्रीयुतमालवीयतनयो गोविन्दनामा पतिः।।२।।

माधुर्यं वचने यथाऽस्य वपुषि प्रत्यक्षमालक्ष्यते
स्माऽसौ नो कटुतामुवोढ कुहचिद् व्याहारयोगे मृदुः।
यत्तातोऽभवदग्रजो विमृशतां तत्तत्समाजोत्थित-
प्रश्ने तद्वचनेऽप्युवास निभृतं प्रामाण्यलक्ष्मीश्वरी।।३।।

एको यस्य सुतोऽस्ति शिष्टवचनः श्रीमान् महेन्द्रोऽनुज-
स्तस्यास्ते ननु कोऽप्युपेन्द्रविरुदः, शान्तश्च यस्यानुजः।
स्वस्रा पुष्पिकया त्रयोऽपि मिथिलाचाराः प्रसन्नानना-
स्तत्पुण्यस्य लतां विवर्धितुमलं भूष्णुत्वमाविभ्रति।।४।।

श्रीमान् रुद्रधराभिधो बुधवरो यं श्राद्धवारान् पितुः
संस्मार्य स्वयमृच्छति स्म मधुरां भुक्तिं परं तर्पितः।
दध्नां स्थूलशरेण[1] मण्डितवपुष्प्राकाम्यभाजां स्मरन्
सोऽहं तत्प्रतिवेशगो रतियुतं नाथं नमाम्यञ्जसा ।।५।।

आयान्त्येव च यान्ति चैव दिवसास्ते ते झटित्येव नः
सर्वेषां वसुधातले धृतवपुष्काणां सदैवाञ्जसा ।
किन्त्वेषां प्रियतापदानि कतिचिच्चित्ते सदा स्थास्नवो
भूत्वा वै विलसन्ति तेषु रतिनाथामजर्यं तथा ।।६।।

०४.०७.१०

---

१.शरो मलाई, थरीति यदावन्त्येषु प्राकृतेषु प्रतीतम्।

# ( ए ) प्रणत्यष्टकम्

मनुदेवभट्टाचार्यः

कूजत्कोकिलकाकलीकुहुकुहूकाराधिकाराङ्कुरत्-
काव्यालापकलाकलापकलनाकेदारकन्दोत्सवः ।
भाषावल्लभपाणिपल्लवदलाऽलङ्कारसल्लेखनी-
धन्यःश्रीरतिनाथसत्कविपतिर्वर्वर्ति सर्वोपरि।।१।।

वाग्देवीकरपल्लवाङ्गुलिरणत्सत्कच्छपीनिक्वणद्-
भावोद्भूतरसोल्लसत्-स-रि-ग-मा-पा-धा-नि-धन्यध्वनिः।
यत्कीर्तीरुपवीणयत्यनुदिनं सर्वत्र तास्साग्रहं
सोऽयं श्रीरतिनाथसत्कविमणिर्मान्यो बुधेन्द्रैर्न कैः?।।२।।

काव्यं यस्य सदा रसालसरसालस्वादशीधूल्लसत्-
क्षीराम्भोनिधिमन्थनोद्भवसुधापीयूषयूषास्पदम् ।
यत् संश्रुत्य तु पञ्चमाञ्चितरवोऽसौ लज्जते कोकिलः
स श्रीमान् रतिनाथ इत्यभिधया ख्यातोऽभवद् भूतले।।३।।

लोकेऽभूद् यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः
सोच्चैर्यत्कवयाञ्चकार च पुरा श्रीमल्लिनाथःकृती।
नूनं सङ्घटते समस्तमपि तद् यस्मिन् कवीन्द्रेऽनिशं
सोऽयं श्रीरतिनाथ एष महिमाम्भोधिर्मुहू राजति।।४।।

रिङ्गत्तुङ्गतरङ्गरङ्गविततिव्यासङ्गगङ्गाङ्गनाऽ-
पाङ्गोत्सङ्गशुभाङ्गमङ्गलगलत्सत्प्राङ्गणालिङ्गना ।
काशी नाम पुरीश्वरीश्वरपुरी यत्काव्यतो नृत्यति
सोऽयं श्रीरतिनाथ एष सुयशोराजीवराजीवलः।।५।।

यत्काव्यामृतमन्थनोद्भवसुधाप्रासादसन्निर्झरत् -
प्रासाद्यातिशयप्रगाढमहिमाश्चर्यैकचर्याव्रताः ।
सर्वे ते कवयो रसाम्बुधिमहाकल्लोललीलालया
मग्नाः सन्ततमेव भावविभवे नोत्थातुमीशाः क्वचित्।।६।।

एकं द्वा अथवा कथञ्चिदथ तांस्त्रीन् वा क्वचित् कष्टतः
श्लोकान् हा विरचय्य तैरनुदिनं स्वात्मा हि विख्याप्यते।
कोऽन्यो वाऽत्र भवेद् य एष तु महाकाव्यं प्रणीयाप्यहो
नो कुत्रापि सकृत् कदापि विदधे तस्य प्रचारादिकम्।।७।।

श्रीकच्छपीक्वणनरागविराजमानवाग्देवताचरणपद्मपरागरागाः।
शोभन्त एव सततं हि समासु दिक्षु मोमुद्यतेऽत्र रतिनाथमनोज्ञभङ्गः।।८।।

## ( ऐ ) कविवरश्रीरतिनाथझामहाशयानां प्रशस्तिः

शिवजी उपाध्यायः

साक्षाद् भुवि प्रकटितस्य जगत्प्रतिष्ठा-
भूतस्य सत्कवयतां शिरसि स्थितस्य ।
कस्यापि सत्कवयितू रतिनाथनाम्नः
काव्यं किमप्यतुलितं स्वयमभ्युदेति ।।१।।

सिद्धार्थसार्थनगरे तलपूरवाख्ये
ग्रामे गृहीतजनुषा कृतिनां वरेण।
तेनात्मनीनमहसा कविना हि काव्य-
व्योम्नि प्रकृष्टरविणेव चिरं चकाशे।।२।।

मातुः पितुश्च कुलमैथिलरत्नभूतः
पुत्रः सुधीः स सुकवी रतिनाथनामा।
नामानुरूपगुणगौरवशालिशील-
श्रीलः प्रशस्यसुयशः सुकृती वितेने।।३।।

वेदान्तवित् पदविदुत्तमकाव्यविद्या-
साहित्यवित् कविकलाकुशलप्रणेता।
वेत्ता श्रुति-स्मृति-पुराण-समुच्चयस्य
काव्यर्षिरेष भरतावनिभूतिरासीत् ।।४।।

गौराङ्गशास्त्रानिटिलप्रसरद्विशिष्ट-
प्रज्ञानवाङ्मयसुधाढ्यसुधाकरश्रीः ।
श्रीमान् सुधीश्च सुकविश्च सुहृत्सचेताः
कश्चिद् बभूव स इवात्र स एक एव।।५।।

व्याख्यानदानपटुदर्शनमर्मसंवित्-
संवादिवादिधिषणोद्भटपाण्डितीकः
विद्वत्सभाजितसभाभिजनाभिवन्द्य-
प्रज्ञः सुधीन्द्रसुकवीन्द्रपदं स दध्रे ।।६।।

काश्यां च पण्डितवरैः परिषद्वरिष्ठा-
विद्वद्वरः स किल पण्डितराजधाम्ना।
सम्मानितः सुकविरत्नपदीकृतश्च
प्रीतो नयेन विनयेन च विश्रुतोऽभूत् ।।७।।

यस्य प्रवाक् सुमधुरा मधुरा कृतिश्च
व्याहारभृद्व्यवहृतिर्मधुरा सुधामृत् ।
यस्मै बुधाः सुकवयश्च सुहृज्जनाश्च
स्निह्यद्हृदो बभुरसौ सुजनोत्तमोऽभूत् ।।८।।

संस्थाप्य सत्कविजनैः कविभारतीं यः
सङ्गत्य काव्यमहनीयपरम्परायाः।
काश्यां समुद्धृतिसमुन्नयसूत्रधारे-
ष्वेकोऽभवत्कविषु काव्यगुरूपमानः।।९।।

श्रीमालवीय-अरविन्दमहात्मगाँधी-
रत्नत्रयीं समभिलक्ष्य जगन्नमस्याम् ।
काव्योत्तमं स शतकत्रयमाविरच्य
मेने कवित्वपदचर्चितचारितार्थ्यम् ।।१०।।

यः सिद्धवाक्कविरपि स्व-कृतिप्रकाशे
वैमुख्यमादधदनीहमना मनस्वी ।
न स्वीचकार निजनामयशः प्रसिद्धिं
लोकैषणापरवशा न मनीषिणो हि।।११।।

काशीं शम्भुपुरीमुपेत्य भगवत्सायुज्यमाप्य स्वयं
शम्भूभूय सभुक्तिमुक्तिमगमद् यो विद्वदग्रेसरः ।
विद्वत्त्वं सुकवित्वमेतदुभयं सारस्वतं वैभवं
स्वात्मीकृत्य चिरं रराज तमहं वन्दे कविं वेधसम् ।।१२।।

# ( ओ ) रतिपतिसुकविःस्वैर्यशोभिर्विभाति

आचार्यः विन्ध्येश्वरीप्रसादमिश्रः 'विनयः*'

सौम्यः सच्चरितव्रतेष्वभिमतः श्रेयोऽर्थिभिश्चादृतो
दोषज्ञोऽपि गुणानुरागमहितो लोकोपकारे रतः।
भास्वद्दर्शनधीः प्रधीरपि महासाहित्यविद्यानिधिः
स श्रीमान् 'रतिनाथझाः'-कविमणिः स्तुत्यो न कैर्भावुकैः।।१।।

काव्यं मञ्जु रसोच्छलन्मधुमयं स्फीतिं निपीतं नु यैः-
काश्यामत्र पुरा तदीयमुखतो गोष्ठीषु पुण्योदयात्।
स्नेहो वा समवापि चारुवचसा प्रोत्साहनञ्चापि यै-
स्ते धन्यास्तु जनाः कवे रतिपतेरन्ये श्रवैर्वञ्चिताः।।२।।

पाण्डित्यं प्रौढिमानं गतमपि न परं[1] फल्गुतामानयद् यद्-
दाक्षिण्यं दक्षपक्षं स्पृशदपि न जहौ लोककाम्यं शिवत्वम्।
यद्गम्भीरं कवित्वं क्वचिदपि विषये नार्च्छदस्वच्छभावं
सोऽयं सौहित्यराशी रतिपतिसुकविः स्वैर्यशोभिर्विभाति।।३।।

जनकजाजन्भूमिप्रदेशदेशेऽपि भावितात्मजनुः।
श्रीरतिनाथकवीन्द्रः प्रथितः काश्याःकविर्जयति।।४।।

कविनाथं नमस्कुर्वे रतिनाथं विदां वरम्।
यद्यशोविग्रहो भाति भूतले सद्गुणान्वयः।।५।।

---

*वैदिकदर्शनविभागाध्यक्षः, संस्कृतविद्याधर्मविज्ञानसङ्कये, का.हि.वि.वि. वाराणस्याम्।

१. परम्-अन्यं विद्वांसं सामान्यमनुष्यं वेत्यर्थः।

# ( औ ) श्रीरतिनाथं वन्दे

डॉ. शिवदत्तशर्मा चतुर्वेदः

## रेखापत्रिकायां पुरोवाक्

सुरम्ये काव्यकान्तारे मधुमासमनोहरे ।
लोकोत्तरचमत्कारो रतिनाथः प्रणम्यते।।१।।

एतत्काव्यसमुद्भूतसौरभान्दोलिताः किल।
सचेतसः सभागारं ध्वनयन्ति मधुव्रताः।।२।।

प्रायशः पञ्चसाहस्री छन्दसां निर्मिताञ्जसा ।
छन्दः प्रवाहो निर्बन्धं तस्याऽद्यापि विजृम्भते।।३।।

एतदीया काव्यधारा श्लोकेषूच्छलिता सती।
प्रकरोत्येव विज्ञानां समूहं रसनिर्भरम् ।।४।।

''अस्मद्युगसमुद्भूतः कालिदासो महानयम्''।
क्लेशावेशं परित्यज्य कथयन्ति विचक्षणाः ।।५।।

शार्दूलक्रीडिते क्रीडा सविशेषं समादृता।
अन्यान्यपि च वृत्तानि कथयन्ति स्वमाधुरीम् ।।६।।

विना यत्नमलंकारा अहम्पूर्विकया धिया ।
परापतन्ति काव्येऽस्मिन् व्योम्नि तारागणा इव ।।७।।

काव्यानां ये परीपाका दर्शिता राजशेखरैः ।
तेषु द्राक्षादयः पाकाः स्वाद्यास्तन्मयचेतसा।।८।।

सर्वविद्याराजधान्याः काश्याः संस्कृतमण्डली ।
रतिनाथमनासाद्य न सन्तोषं समश्नुते।।९।।

× × × × ×

श्रीरतिनाथं वन्दे संस्कृतकविताचमत्कारम्।
सत्य - शिव - सुन्दराभासम्मेलनजातसद्रूपम्।।१।।

सूक्तिसहस्रद्योतितप्राखरप्रतिभाप्रभावमहिमानम् ।
रतिनाथझाकविवरं स्मृतिसंस्थं चारु पश्यामः।।२।।

काशीहिन्दूविश्वविद्यालयासिद्धसाद्विद्याम् ।
तत्राध्यापकपदमपि गरिमापूर्णं समेधयन्तं तम्।।३।।

विन्दामहे महत्त्वे संस्थितिमन्तं निखिलभाभिः।
सर्वविवादप्रशमनशीलं कवितावितानिनिःस्वानैः।।४।।

धाराप्रवाहकविताप्रकथनसुषमाविभासितं नित्यम्।
रतिनाथझामहोदयमद्याप्यानन्ददं वन्दे।।५।।

नानानवतरविषयावलिवर्णननैपुणीं सततम् ।
सूक्ष्मनिरीक्षणविधया संस्तुतिमन्तं महाकविं वन्दे।।६।।

भव्यैःशतकसुकाव्यैर्विभूषयन्भर्तृहरिमार्गम् ।
अयमेकः किल काले कलिं कृते कीर्तयन्कलितः।।७।।

ब्रह्मर्षिमालवीयावदानशतकानि निर्माय।।
प्रत्यक्ष-साक्षि-कक्षा-निक्षिप्तं स्वं प्रपूजयति।।८।।

वैदेशिकपाशानां विधूनने सिद्धसाम्राज्यम्।
मोहनदासं गान्धिनमप्ययं स्तौति शतकै स्वैः।।९।।

एवैकं यत्पद्यं पूर्णतया यन्निबध्नाति।
चेतः सहृदयमनसामनेकबन्धान्वितं भाति।।[१]१०।।

योगिराजमरविन्दं संस्तौति प्राच्यभावं सभरितम्।
सावित्रीसंगाथाप्रवाहभाषासुविस्तीर्णम् ।।११।।

कविभारत्याःकाश्यां संस्थायाः साधु निर्माणे।
संचालने प्रसिद्धिं यातं निखिलेऽस्मदीयसन्देशे।।१२।।

संस्कृतकविसम्मेलनसंगोष्ठीनां प्रवर्तकं दिव्यम्।
को तं रतिनाथं न प्रणमेत स्वं विशोधयितुम्।।१३।।

छात्रावस्थायामपि काश्यां सर्वत्र सुप्रसिद्धियुतम्।
श्रीमालवीयविद्यासन्मन्दिरसेवया पूर्णम् ।।१४।।

आचार्यान्तिमकक्षाप्रश्नोत्तरसत्परीक्षासु ।
व्युत्पत्तिकाव्यनिर्मितिशताङ्कपूर्णं सुविख्यातम्।।१५।।

काश्यामस्यां संस्कृतकविता दिव्योत्तमैवासीत्।
शास्त्राणां सर्वेषां यथातथैवाऽभवत् कविता।।१६।।

श्रीगङ्गाधरशास्त्री महामहोपाधिविख्यातः।
सद्यः कविताधाराप्रवाहकलयाऽपि संपूर्णः।।१७।।

---

१. रतिपतिकवेरेकं पद्यं प्रबन्धशतायते।

श्रीरामशास्त्रिवर्यः सिद्धकवित्वेन संयुतो दिव्यः।
श्रीमान् लक्ष्मणशास्त्री कविताररचनास्वतन्त्रतां यातः।।१८।।

अलिविलासिसंलापं विरचितवान् दार्शनिककाव्यम्।
नैके शोधनिबन्धी यदुपरि निर्देशिता जाताः।।१९।।

कविचक्रवर्त्युपाधिं बिभ्राणः कश्चिदसमो वा।
देवीप्रसादनामा तन्त्रेषु च सिद्ध एवाऽसीत्।।२०।।

रामावतारशर्मा कविताकलया सुसंपूर्णः।
मारुतिशतकविनिर्मितिकुशलः सर्वत्र संसिद्धः।।२१।।

श्रीमद्हनुमच्चरितान्दोलितशब्दावलिदिव्यतमदेहे।
रामावतारशर्मा सहृदयहृदये विराजितः सत्यम्।।२२।।

वाङ्मयसमुद्रमेकं निर्मितवान् शब्दमयकोशम्।
कवितानिर्मितिमार्गं सततं विद्योतयन्नासीत्।।२३।।

महामहोपाध्यायः खिस्ते नारायणःशास्त्री।
कविकुलगुरुरिति पदवीमधिगतवान् संस्थया काश्याम्।।२४।।

विदुषां चरित्रपञ्चकरचना रुचिरा यदीयेयम्।
विदुषामत्यादरणीया कमनीया साधु संजाता।।२५।।

विविधासु पत्रिकास्वथपरिस्फुरन्ती तदीयसत्कविता।
प्रतीक्षिताऽसीत्सद्यः परमानन्दप्रदात्री वा।।२६।।

पुनरथकवितार्किकतोभयमयता यां स मणिः ।
भारतशतकविनिर्मितिकुशलश्रीमान्महादेवाः ।।२७।।

सेयं पूर्वा सरणिर्वाराणस्यां तु कवितायाः।
यस्यां श्रीरतिनाथः संस्थित आस्ते पदे दिव्ये।।२८।।

शार्दूलक्रीडायां वसन्ततिलकासुमोदमानोऽयम्।
शिखरे शिखरे स्रग्धरधाराभिःपूरयति विश्वम्।।२९।।

वाग्देवी संसिद्धा यद्रचना राजिता नित्यम्।
नृत्यन्तीव सदेयं पदे पदे दिव्यमाधुर्यैः।।३०।।

काश्यां सा कविभारतिनाम्नी संस्था विनिर्मिता तेन।
मासि मासि कवितायाः नव्यतमा प्रस्तुतिर्जाताः।।३१।।

हिन्दीभाषायामथ निखिलास्वन्यासु भाषासु ।
अभिनवकविता नित्यं समुच्छलन्ती निभालितैवासीत्।।३२।।

एतादृशे परिकरे संस्कृतकवयो न पाश्चात्याः।
तेऽपि नूतनं काव्यं निर्मातुं चाग्रतो यान्ति।।३३।।

काश्यां शतशः संस्कृतकवयो नित्यं विरचयन्तः।
कवितां नव्यविभूषाविलसितकायां महोदाराम्।।३४।।

कविभारतीसुमञ्चे तानथ सर्वान्समानीय।
रतिनाथझामहोदय आसीत्तत्रापि मध्यमणिरूपः।।३५।।

ये वा विषयास्तस्मिन्काले समुपस्थिता जाताः।
देशे तथा समाजे ते सर्वे चर्चिता आसन्।।३६।।

विशेषतो रतिनाथस्यासीत्कविता सुसन्नद्धा-
नूतनविषयान्दोलनमुत्थानैः साधु पश्यन्ती।।३७।।

यत्कवितायाः प्रपठनवेलायामात्मविस्मृतिर्जाता।
नूनं केवलमेषा श्रीरतिनाथस्य कविताऽसीत्।।३८।।

वैज्ञानिकैर्विधाभि र्विभासिताभिश्च कविताभिः।
श्रीरतिनाथवरेण्योऽद्भुतरसमप्याह्वयति भूयः।।३९।।

सर्वाहारे वादे साम्यवादेऽपि कवितानाम्।
तां शृंखलां वितन्वन् नव्यान्संतोषयति निखिलान्।।४०।।

कविता सर्वसमीहितसारं पुण्यं समादिशति।
श्रीरतिनाथकवितया तूर्णमिदं ज्ञायते सत्यम्।।४१।।

स्वीयगुरून्सन्मित्राण्यप्याह्वयतिस्म कवितायाम्।
इतिहासेष्टा तस्याः कविताया मण्डनकं जातम्।।४२।।

एकोऽपि श्रीरतिनाथो नैकशता पूर्तिमा तेन।
यं पुरतोः पश्यन्तः समूहरूपं प्रपश्यन्ति।।४३।।

यथा यथा संग्रथिता स्वीया छन्दोमयी वाणी।
तथा तथा तच्छिक्षण-दीक्षाप्यसमा प्रसारितैवासीत्।।४४।।

नेयं दीक्षा कक्षास्वन्तरिता वा जडीभूता।
प्रस्फुटमनसा सेयं सौगन्ध्येनैव दीक्षयति।।४५।।

रतिनाथकाव्यसुषमासौगन्ध्यैः पूरितस्वान्ताः।
मानसिकशिष्यताया दीतकायाः सदैवासन्।।४६।।

नित्यं गंगास्नानैर्विनिर्मलः शुभ्रतरवेशः।
कवितायामपि गङ्गां विनिर्मलां वा समाह्वयति।।४७।।

शतांशमपि यदि लब्धं श्रीमत्सूर्यप्रकाशेन।
संग्रहकार्ये तावन्नूनं सन्तोषदं जातम्।।४८।।

संग्रहमुद्रणपठनान्तरमथ जायते क्वचित्।
नव्या प्रीतिः सहसाऽन्वेषणसत्कार्यसम्पुष्टा।।४९।।

शतशोऽभिनन्दनानां मुद्रितरूपान्वितानां वा।
शैली केवलमेका संसाध्या प्रत्यभिज्ञायाम्।।५०।।

नामोल्लेखाऽभावेऽभिनन्दनेषूल्लसन्तीयम् ।
कविता श्रीरतिनाथे शैलीमेकामुपस्कुरुते।।५१।।

श्रीकालिदासकवितामृतधारावर्षिणीवेयम् ।
कविता श्रीरतिनाथे स्वभावमाधुर्यसंचारा।।५२।।

संपूज्याऽस्मद्गुरव खिस्तेश्रीमद्बटुकनाथाः।
रतिनाथझामहोदयमसमैर्मावैप्रपश्यन्ति ।।५३।।

रतिनाथकाव्यदीक्षादीक्षितकवितावितानभूयिष्ठान्।
कवितानिर्मितिशूरान्गणयितुमेषा न संस्थिताद्यसुमतिः।।५४।।

भारतवर्षे संस्कृतपत्राणां या प्रचुरताऽऽसीत्।
सर्वत्र तत्र कविता रतिनाथस्यास्ति पल्लविता।।५५।।

अभिनन्दनसद्ग्रन्थप्रकाशने ये समालग्नाः।
ते काव्यानां सन्मुद्रणकार्यं पूर्णं प्रकुर्वन्ति।।५६।।

एवमियं रतिनाथस्यासीन्निखिलाऽपि वाग्धारा।
परितोऽपि व्यप्तिमती नासाद्याह्येक यत्नेन।।५७।।

श्रीमन्त बौद्धा अपि सहृदयहृदयान्विता एते।
व्यासाः सूर्यप्रकाशाःसमीहितं साधयन्त्येव।।५८।।

एतेषामथ यत्नैरुन्मीलननामको ग्रन्थः।
सिद्धः प्रकाशमाप्तः भवन्ति यस्मिन् बटुकनाथाः।।५९।।

रतिनाथझा महोदयमेते साक्षात्सदैव कृतवन्तः।
प्रत्यक्षसाक्षिणस्ते तत्संसरणेषु दीप्ता वा।।६०।।

श्रीरतिनाथगुणानां का वा चर्चा भवेन्नाम।
ये विमतास्तेऽप्यभिमतमात्मीयं संस्तुवनयत्र।।६१।।

कविभारतीति संस्था देशे सर्वत्र विख्याता।
श्रीरतिनाथस्मारकरूपेणेयं समीक्षिता जयति।।६२।।

श्रीरतिनाथोत्थापितलेखिन्यां यामसीसरणिः।
दिव्यामक्षधारामक्षतरूपेषु सा सूते।।६३।।

प्राकृतिकचित्रविवरणवर्णनपरमा च सा सुषमा।
संमोहयति नितान्तं सहृदयहृदयावलिं निखिलाम्।।६४।।

मौक्तिकपद्यान्यथा तान्यसमां मुक्तामयीं शोभाम्।
विस्तारयन्ति विपुलां नानानववर्णविन्यासैः।।६५।।

स्वीयगुरूणामेते महन्महादेवशास्त्रिवर्याणाम्।
अभिनन्दनसद्ग्रन्थं सम्यक्सम्पादयन्तिस्म।।६६।।

अभिनन्दनसद्ग्रन्थावलिरद्यत्वे विभिन्नरूपेषु।
प्रकाशिता या लभते साहित्ये प्रोन्नतं स्थानम्।।६७।।

अभिनन्दनीयमहिमापरिपूर्णो भाति सद्ग्रन्थः।
अभिनन्दनीयविद्वच्चर्चा तत्राऽस्ति वैपुल्ये।।६८।।

अभिनन्दनीयविद्वत्स्वीया विषयाश्च ये ये स्युः।
तानधिकृत्य विरचिता सुगभीरा लेखमालापि।।६९।।

एकैकस्य च लेखस्याऽस्ते नूनं महत्त्वमिदम्-।
नानानवतररचनास्वेते तावत्समुद्धृता जाताः।।७०।।

विद्वत्संमान्यानामभिनन्दनपुष्टरचनासु ।
श्रेष्ठतमा विद्वांसोऽप्यथ लेखान्संप्रयच्छन्ति।।७१।।

शतशश्चाथ विलोक्य तादृशग्रन्थावलिः सेयम्।
तत्रापि चाग्रगण्यस्ते रतिनाथा विराजन्ते।।७२।।

संन्यासाश्रमदीक्षा यदा प्रजाताभिनन्दनीयानाम्।
श्रीमन्महेश्वरानन्दानां तत्रार्पणं जातम्।।७३।।

उन्मीलनमिति नाम्नाऽभिनन्दनग्रन्थ एकोऽयम्।
गुरुवरखिस्ते हस्ते श्रीमद्व्यासैः समर्पितो भाति।।७४।।

श्रीमन्तो रतिनाथास्तत्राप्यासन् सुजागरूका वा।
एतादृशे सुकार्ये कथमेतेऽग्रे न गच्छेयुः।।७५।।

अनभिमता येऽप्यासन् विषया वा व्यक्तयोप्यथवा।
सद्व्यंजनाविधाभिस्तेषां मुखरत्वमत्राऽसीत्।।७६।।

विमतस्य कदाप्येकस्य तु स्थितिरतिकठिनैव संजाता।
वैयञ्जनिको बोधः कवितायास्तं विभूषितवान्।।७७।।

अद्यापि च सत्संग्रहरूपं यदि न प्रकाशितं भूयात्।
श्रीमद्रतिनाथानामनर्थ एको महानयं प्रभवेत्।।७८।।

तदिदमनर्थनिवारणमथ चोत्कर्षं विधाय साहित्ये।
श्रीमत्सूर्यप्रकाशव्यासाः नूनं सुधन्यवादार्हाः।।७९।।

न केवलं रतिनाथा रचनासंलेखने दक्षाः।
कविसम्मेलनकाले संप्रस्तुतिरपि सुवन्द्याभूत्।।८०।।

कविताप्रपठनवेलाहेलामात्रेण तत्रत्याः।
अर्थाः सुभ्राजन्तोऽनुरणन-विधया विराजिता जाताः।।८१।।

प्रत्येकस्मिन्श्लोके पठितेऽन्तिमभागमायाते।
घूर्णितशिरसः सहृदयवर्या आग्रहशीलाः पुर्नपठितुम्।।८२।।

मासि मासि संगोष्ठ्यः कविभारत्याश्च या जाताः।
श्रीरतिनाथं श्रोतुं समुत्सुका सहृदयाः सर्वे।।८३।।

एकेनैव सुकविना श्रीरतिनाथेन विहितोऽयम्।
संस्कृतकविसंस्थाया प्रादुर्भावात्मकः सर्गः।।८४।।

प्रत्येकस्मिन्मासे पञ्चदशवर्षपर्यन्तम् ।
सुनियतकविगोष्ठीनां सुचारु संचालनं जातम्।।८५।।

अहमहमिकया संस्कृतकवितासंश्रावणे सिद्धाः।
कविवर्या संख्यायामासन्नशता विभान्तिस्म।।८६।।

दीर्घरात्रिपर्यन्तं सैषा कविभारती धारा।
वाराणस्यामस्यां पूर्णैर्वेगैः समुच्छलन्त्यासीत्।।८७।।

नव्यतमेयं संस्कृतरचनावलिरित्थं या प्रकाशमायाता।
वर्षन्तिमाधिवेशकाले तस्याः प्रकाशनं जातम्।।८८।।

आसीच्छ्रीरतिनाथे सैषा स्फुरणात्मिका दीप्तिः।
प्रकाशनानामिदमित्थं भवनारूपा।।८९।।

कविभारतिकुसुमाञ्जलिनाम्ना नैकेषु भागेषु।
प्रत्यब्दं रचनावलिरेषा कविभिः सदा लब्धा।।९०।।

अनन्तरं त्वथ काचित्पुनरप्येका चमत्कृतिर्जाता।
मासिकपत्रप्रकटनमप्यासीत्सुकविभारत्याः ।।९१।।

सम्पादकीयमप्यत्र च नव्यं छन्दोमयं जातम्।
'ललिता'नाम्ना तदिदं पत्रं सर्वत्र विख्यातम्।।९२।।

केवल-संस्कृत-कविता-कलना तत्रोत्तमा जाता ।
रतिनाथझामहोदयरचनामेकां केवलां नीत्वा।
पूर्णतर्येवैकोऽङ्कोः ललितापत्रस्य संस्तुतो जातः।।९३।।

प्राथम्येन लघुरयमासीद्रतिनाथरचनानाम्।
सत्संग्रहः कवीनां समुदायेष्वादिमः प्राप्तः।।९४।।

स्वीयानां रचनानां प्रकाशने सर्वथा मन्दः।
श्रीरतिनाथः सोऽयं सिद्धकविः सर्वदा शान्तः।।९५।।

शान्तां तदीयमूर्तिं सम्मुखरूपेण पश्यन्तः।
कथमयमियतीमीदृशरचनावलिमेवमासूते ।।९६।।

सन्देहावलिरित्थं सर्वेषां या प्रकाटिताऽसीत्।
सैवान्यां स्तुततदीयां कवितां स्तोतुं समादिशती।।९७।।

नैकसहस्राः रचनाः सिद्धा या काव्यकानने रुचिरे।
विचरणशीलास्तासां संग्रह एषोऽत्र यो विहितः।।९८।।

संस्कृतसत्कविताया इतिहासे तस्य यत्स्थानम्।
परमोत्तमं पुरस्तादास्ते तत्रैव धन्यवादार्हाः।।९९।।

श्रीरामचन्द्रशिष्या व्यासाः सूर्यप्रकाशास्ते।
तत्प्रेरणया मया काप्येषा संप्रस्तुतिर्विहिता।। १००।।

यद्यप्यद्या या समन्तादायातासंस्मरणधारा।
रतिनाथझामहोदयमूर्तिर्मान्या समक्षेव ।।१०१।।

नानाविधदृश्यावलिवलितां तां तावन्मूर्तिम्।
वन्दामहेऽद्य केवलमेकः सन्तोष एवायम्।।१०२।।

।।श्रीः।।

## प्रथमं सोपानम्
## समस्यापूर्तयःप्रकीर्णछन्दांसि च
# १. गणेशः

कल्याणकामपुरुषार्चितपादपद्मः
पद्मालयाधिकृत - दुर्लभभाग्यहेतुः ।
सेतुः स्वधर्मजलधेर्विजयस्य केतु-
र्दूरीकरोतु दुरितानि सतां गणेशः ।।१।।

विद्यामवद्यरहितां ललितां कलां च
पादाम्बुजार्चनवते वितरन्सलीलम् ।
अत्यन्तशस्तमपि वस्तुचयं ददानो
दानोदकोर्जितमुखो जयताद् गणेशः ।।२।।

मन्दारहारविगलन्मकरन्दबिन्दु-
संरञ्जिताङ्घ्रिकमलार्पितदिव्यगन्धः ।
आमोदमेदुरमिलिन्दकुलस्तुतो वः
प्रस्तौतु दुर्लभसुखानि सदा गणेशः।।३।।

मातुर्गिरीन्द्रदुहितुर्मुदितां चतुर्थ्यां
तिथ्यां निजागमनकौतुकतो वितन्वन् ।
आपादयत्वभिमतं पुरुषार्थसार्थे
तुर्यं तुरीयरसिको भगवान् गणेशः ।।४।।

ईशा न सन्ति कति शक्तिसमृद्धिभाजो
भक्ताय याचितफलानि समर्पयन्तः ।
याच्ञापराङ्मुखजनाय परन्तु भुक्तिं
मुक्तिं च केवलमुपाहरते गणेशः ।।५।।

📖

# २. देवी-स्तुतिः

दुर्वारमारमकराक्रमणात् क्षताङ्गः
क्रोधोत्तरङ्गनिकरैर्भृशमर्दितोऽहम् ।
लोभादिघोरजलजन्तुकृतप्रहारः
संसारसागर इहाहतचेतनोऽस्मि ।।१।।

मज्जन्तमत्र सुचिरेण निरीक्षमाणा
नोद्धर्तुमिच्छसि कथं व्यथितं जनं माम्।
किं मे प्रतीपदुरिताचरितं स्मरन्ती
नैव द्रवस्यनुपदं सदयाऽपि मातः।।२।।

जन्मोत्तमे द्विजकुले, विभवं न चाल्पं,
स्वस्थं वपु-र्गृहमलभ्यसुतादिपूर्णम्।
विद्वत्सु मानमपि दुर्लभमाप्य मात-
स्त्वां न स्मरामि वरदां निजपापपुञ्जात्।।३।।

कामं विनिन्दितदुराचरणादिपङ्क-
संसक्तमुज्झतु शुचिः सुकृती जानो माम्।
लिप्तं जुगुप्सितमलैरमलान्तरेण
त्याज्यं सुतं न जननी त्यजतीह किन्तु।।४।।

सत्कर्मसम्पदखिलापहताऽस्ति भोगै-
र्नोपासनार्थकणिकापि करे ममास्ति।
दुर्बोधदग्धहृदयस्य न संविदेव
मातस्त्वमेव शरणं मम वर्तसे तत्।।५।।

यद्भ्रूविलासवशगश्चतुराननोऽपि
नित्यं विचित्रतमसर्गविधौ प्रवृत्तः।
तामादिदेवविनतां निखिलप्रपञ्च-
निर्माणकौशलधियो जननीं नमामः।।६।।

ब्रह्माण्डरक्षणविधौ सफलत्वमाप्तुं
नारायणोऽपि कमलामवलम्बते यत्।
तत्ते प्रसादमधिकृत्य कृती स देवो
लोकानवत्यनुपमाहितशक्तिपुञ्जः ।।७।।

त्वत्साहचर्यवशतः स शिवोऽपि साक्षात्
स्पन्दाक्षमां स्वशवतामपहातुमीष्टे।
तस्मादसीममहिमा स हिमाद्रिकन्या-
कान्तः समस्तभुवनैरभिवन्दितोऽस्ति।।८।।

शक्त्या तवैव तपनस्तपति प्रकामं
ज्योत्स्नासुधाभिरनुलिम्पति विश्वमिन्दुः।
सिन्धुर्बिभर्ति सलिलं पवनः प्रवाति,
वैश्वानरो ज्वलति सुस्थितिमेति भूमिः।।९।।

मातस्तवैव करुणाललितैरपाङ्गै-
रिन्द्रादयोऽपि महिमानमुपार्जयन्ति।
ध्यायन्ति तत्त्वममलं हृदये मुनीन्द्रा
गायन्ति सामकुशलाः परमात्मकीर्तिम्।।१०।।

शक्तिस्त्वमेव बलिनां, यमिनां तपस्या,
विद्या परा मतिमतां कविता कवीनाम्।
पद्मालया धनवतां, महतां मनीषा,
सिद्धिः सतां, सुमनसां मुदिता विभासि।।११।।

# ३. दुर्गा निसर्गोज्ज्वला

दैत्यत्रस्तसमस्तदेवविगलद्धाम्नां सुपुञ्जीभवन्-
मूर्त्तिः स्फूर्तिनिधिर्दुरन्तदुरितध्वान्तक्षयायोद्यता।
शम्भोर्निर्मलकान्तकोमलरुचा भूयः समुद्भासिता
भूयाद् भक्तजनोदयाय सदया दुर्गा निसर्गोज्ज्वला ।।१।।

आस्येनामृतदीधितिं त्वधरयन्त्यङ्केशया भूभृतां
पत्युर्गौरवशालिनी त्रिभुवने कन्यातिधन्योद्गता ।
शूली यां परिणीय विस्मृतगदो मृत्युञ्जयोऽभूदद्भुतं
सा देवी रमतां चिराय हृदये दुर्गा निसर्गोज्ज्वला ।।२।।

यस्या आस्यमुपास्य दास्यविधया धन्यः सुधादीधितिः
शारद्यः कृतकृत्यतामनुभवन् पूर्णत्वमापद्यते ।
सिद्धिर्लास्यमनारतं प्रकुरुते यस्याः समक्षं मुदा
जीयात् सा शरदिन्दुसुन्दरमुखी दुर्गा निसर्गोज्ज्वला ।।३।।

देवादीनपि बाधितुं कृतमतीन् रक्षःपतीन् सद्गतीन्
कर्तुं सङ्गरमारचय्य सुमरैश्शस्त्रैस्तथास्त्रैर्घ्नती ।
लोकत्राणपरायणा पशुपतिप्राणा प्रवीणार्पणे
पुण्यानां जननी जयत्यनुपलं दुर्गा निसर्गोज्ज्वला ।।४।।

श्यामाङ्गे महिषासुरे बलभिदोऽपि त्रासदे दुर्जये
सङ्ग्रामाङ्गणपातिते नखमणिस्फूर्जत्पदारोपणात्।
कृष्णे सान्द्रपयोधरे सुललिता विद्युच्छटेव स्फुटं
सौन्दर्यं समवाप दुर्लभतमं दुर्गा निसर्गोज्ज्वला।।५।।

# ४. लक्ष्मीः

आमोदमर्पयति, शीतलतां तनोति
पद्मं विमुद्रयति पङ्कमपाकरोति।
हंसं प्रसादयति, हर्षयति द्विजेशं
स्वच्छाशया शरदिव प्रमदाय लक्ष्मीः।।१।।

शीताधिकात्परमसंकुचिताङ्गवल्लीं
म्लानाननां निहितमूकजनप्रवृत्तिम्।
निस्तब्धतामुपगतां वनदेवतां किं
सुप्तां प्रबोधयति सम्प्रति कुन्दलक्ष्मीः?।।२।।

आमन्त्रयत्यभिमतं मलयानिलं या
या कोकिलानुपदिशत्यनुगातमुच्चैः।
आम्रांश्च योजयति मञ्जुलमञ्जरीभिः
सा जृम्भते शिशिरकालिक-कान्तलक्ष्मीः।।३।।

या भूमिकेव कुसुमाकरकान्ततायाः
सारस्वतापचितिमङ्गलजन्मभूमिः ।
उद्दामकाम-परमोत्सववन्दिता या
सा पाटलप्रणयिनी शिशिराङ्कलक्ष्मीः।।४।।

या तीर्थराजगरिमाणमलङ्करोति
शम्भुं विवाहयति शैलपतेर्दुहित्रा।
या होलिकां दहति, कुङ्कुमकम्रकेलि-
मुल्लासयत्यनुपलं शिशिरैकलक्ष्मीः।।५।।

सम्पादितां निरुपमां सुषमां वनान्ते
कान्तेन कौतुकवता शिशिरेण पूर्वम्।
प्रख्यापयत्यथ नरेन्द्रनिसर्गवृत्त्या
स्वीयप्रभावजनितामृतुराजलक्ष्मीः।।६।।

दोषाकरं क्षयविवृद्धिपरं परस्यां
रक्तं समत्सरमशेषसरोजजाते।
अह्नाय संत्यजति दुर्गुणमात्रसारं
संसारिणं जगति बन्धुमपीह लक्ष्मीः।।७।।

शेषाहिभीषण-फणागण-मण्डलेन
संरक्षिता भगवता मधुसूदनेन।
लोला बहिर्विचरणाय कृतावधाना
तत्पादमर्दनपरा किमु भाति लक्ष्मीः।।८।।

मेधाभिधान-नवमन्दरमथ्यमान-
साहित्यसागर-तरङ्गभरैः परीता।
कश्चित्कटाक्षकलिता कविताऽभिधाना
कान्ताऽभ्युपैति पुरुषोत्तममेव लक्ष्मीः।।९।।

# ५. हनुमन्तमीडे

उद्दामशक्तिनिलयं समरेऽसुराणां साक्षात्कृतान्तमवलिप्तवधेऽपि दक्षम्।
अक्षान्तकं सततमुज्झितशौर्यदर्पं सौमित्रिरक्षणचणं हनुमन्तमीडे।।१।।

श्रीमैथिलीप्रणयबन्धनबद्धरामपादारविन्दमकरन्दमिलन्मिलिन्दम्।
सर्वार्थसिद्धिजननक्षमभक्तिकल्पवल्ल्या नमामि धृतजीवनमालवालम्।।२।।

उद्घोषयन् जयमनन्तबलस्य यस्य मल्लः क्षणेन जयति प्रतिपक्षमल्लान्।
शक्तिप्रवर्धनपरास्वथ मल्लशालास्वद्यापि सर्वविधिना परिपूज्यते सः।।३।।

संस्मारितोऽनुभवति स्वबलं बलानां निःसीमवैभवभरोऽप्यनिवार्यवीर्यः।
रामेरतस्य विरतस्य जगत्प्रपञ्चानाहङ्कृतिः सुपुरुषस्य कदाप्युदेति।।४।।

इष्टं प्रपूरयति कष्टमपाकरोति दुष्टं दलत्युपकरोति च साधुवृन्दम्।
अर्थं दुरापमपि यो वितरत्यजस्रं पूज्योऽपि पूजयति राघवपादपद्मम्।।५।।

देहश्रिया जितविशालसुवर्णशैलस्तुच्छीकृतो जलनिधिस्तरसा विलङ्घ्य।
प्राभञ्जनीयरयमात्मरयेण जित्वा जग्रासभानुमपि पक्वफलं विभाव्य।।६।।

प्रत्यङ्गणं प्रतिगृहं सहलक्ष्मणेन रामं ससीतमिह पूजयितुं प्रकामम्।
आत्मप्रभाव-विशदीकरणादमोघवीर्यो जयत्यनुपमः पवनप्रसूतः।।७।।

यो राक्षसक्षयकरोऽपि दयार्द्रचेता रुद्रात्मजोऽपि विनयस्य नवावतारः।
भीमस्य भीतिजनकोऽपि नितान्तसौम्यः शाखामृगोऽपि जितवाक्पतिबुद्धिदर्पः।।८।।

यो निर्गदोऽपि सगदोऽञ्जनया जनन्याजातोऽपि कुङ्कुमकरम्बितकान्तकायः।
रामार्चनव्रतवतां धुरिकीर्तितोऽपि रामानुरञ्जनपराङ्मुख एव भाति।।९।।

भक्तापदां सपदि शोषयिता कृशानुर्भानुः सतां हृदयपद्मविकासहेतुः।
सेतुर्भवाब्धितरणस्य जयस्य केतुर्भक्तप्रियो जयति निर्जितकल्पवृक्षः।।१०।।

भस्मीकृतस्त्रिनयनेन पुनस्तमेव देव्या सहैकतनुमाश्वकरोदपूर्वम्।
एवं जगद्विजयिनं मदनं सुदूरं कृत्वा भवानिव भवान् भुवने चकास्ति।।११।।

वज्रात् कठोरतरमङ्गमभङ्गुरश्रि स्वान्तं शिरीषकुसुमादपि कोमलं ते।
तप्तात्मनां हृदयसंनिहितं गतं सच्चित्तं द्रुतं द्रवति ते नवनीतवन्द्यम्।।१२।।

सर्वोऽपि शाम्यति दुरन्त उपद्रवस्य वेगः स्तवं तव हृदा जपतां जनानाम्।
श्रेयांसि दुर्लभतमानि परिस्फुरन्ति नान्तर्भवन्ति भुवनेषु च तद्यशांसि।।१३।।

# ६. वीरमङ्गलाष्टकम्

महाशङ्कापङ्कव्यसनदहनप्लुष्टमनसां
विपज्जालज्वालाकवलितजटालात्ममहसाम् ।
शरण्यं कारुण्यामृतलहरिलीलाविलसितं
महावीरं वन्देमहि महिममङ्गल्यनिलयम् ।।१।।

अपूर्वं पूर्वाद्रिं शमदमतपःसंयमरवे-
र्जगज्जेतुः केतुं सपदि नमयन्तं रतिपतेः ।
महासेतुं स्फीतं जननमरणक्लेशजलधे-
र्महावीरं वन्देमहि महिममङ्गल्यनिलयम् ।।२।।

घनध्वान्तध्वंसे किरणमिव दीप्तं दिनमणे-
र्धृतेर्वासस्थानं कुलगुरुमुदारं समदृशाम् ।
गुणानामागारं सुचरितरुचामर्कमतुलं
महावीरं वन्देमहि महिममङ्गल्यनिलयम् ।।३।।

मतङ्गानामैरावतमिव नदीनां सुरधुनी-
मिवोदञ्चत्पञ्चाननमिव पशूनां बलवताम् ।
महीध्राणां धन्यं हिमगिरिमिवाम्भोरुहमिव
प्रसूनानां वीनां खगपतिमिवैतं नमत भोः ।।४।।

मरीचिं विद्यायाहृदयमनवद्यं यमवतां
तपस्यायाः सर्वस्वमथ करुणायाः कुलगृहम्।
अहिंसाया भाग्यं विभवमभयस्योत्तममणे-
र्महावीरं वन्देमहि महिममङ्गल्यनिलयम्।।५।।

निरातङ्कं पीत्वा मदमदनमोहादिगरलं
निराकृत्याकृत्यप्रकृतिजनितोपद्रवशतम् ।
विदित्वा जीवानामगमतमयोनिं प्रभवतां
स कैवल्यं प्राप्तः श्रमणकुलनम्यो विजयते।।६।।

पवित्रं चारित्र्यं विमलतपसां राशिमतुलं
जगद्रक्षादीक्षोचितनिखिलकल्याणकलितम्।
भयोद्भ्रान्तत्राणप्रवणमभयोत्थापनदिशा
महावीरं धीरं नमनवचनैः कीरजयिनम्।।७।।

मनोदोषप्लोषज्वलनमवलम्बं सुकृतिनां
सतां पुण्यागारे मनसि मणिदीपं निरुपमम्।
श्रुतज्ञानोत्पत्तिस्थलमभिमतानन्दसदनं
महावीरं वन्देमहि महिममङ्गल्यनिलयम्।।८।।

# ७.सरस्वती सा

शुष्यद्रसा कतिपयद्विजमात्रसेव्या
श्यामात्मनामपि मनांसि विशोधयन्ती ।
संक्षीयमाणविभवा चिरपूजितापि
क्लिश्नाति किं न भवतोऽद्य सरस्वती सा ।।१।।

या शीतलापि विनिवर्तितजाड्यपीडा
तापापहापि मनुजोचितदत्ततापा ।
तीव्रप्रवाहभरितापि चिरस्थिरश्री-
र्दैवापगेव धवलास्ति सरस्वती सा ।।२।।

या चक्रवर्तिमुकुटार्चितपादपीठा-
प्यारण्यकैरपि निरन्तरसेव्यमाना ।
वीणानिनादनपरापि समाधिलग्ना
पीयूषपूरभरिता सुरभारती सा ।।३।।

या सद्गुणैर्निगडिता चिरमध्युवास-
जीर्णे गुणे झटिति गन्तुमिव प्रवृत्ता ।
सा कामधेनुरधुना यवसादिदानैः
पोष्या, गुणैर्दृढतरैश्च निबन्धनीया ।।४।।

सद्वृत्तसद्गुणविभूषणभूषिता सा
शश्वन्निसर्गसरसाऽथ विमुक्तदोषा ।
आमोदिनी सुमनसां सुकुमारमाला
कण्ठे स्थिता विजयते कविभारतीव ।।५।।

स्वच्छाचिरन्तनपवित्रविचारचारु-
नैसर्गिकी मलिनतामऽपिदूरयन्ती ।
अद्याप्यवद्यचरितानिनिवारयन्ती
रक्ष्या नवप्रणयिनाऽपि सरस्वतीसा ।।६।।

जागर्ति शासनमुदारतयाऽर्थदानै-
र्मानैश्च संस्कृतमुदित्वरमीक्षितुं चेत् ।
तत्संस्कृतप्रणयिनोऽपि विहाय तन्द्रां
प्राभातिकीं प्रमुदितामिह वर्धयन्तु ।।७।।

याता　निशाऽरुणकपोलतलाललामा
प्राच्यामुषा　विहसतीवसुषुप्तलोकान् ।
गायन्ति　जागरणगीतमहोद्विजाश्च
निद्रां　द्रुतं　त्यजत　माङ्गलिकेप्रभाते　।।८।।

प्रेमप्रदर्शनपरा　अपि　वाचि　देव्यां
कुर्वन्ति　कर्मकुशलाः स्वहितानुरूपम् ।
गोपालनश्रममपास्य　पयांसि　दोग्धुं
संदीक्षिताः　सुरगवीमधुना　श्रयन्ते　।।९।।

स्तन्येन　पालितवतीनिजसन्ततीर्या
सोपेक्षिताऽतिजरती　जननीविषण्णा ।
दीना　दिनानुदिनदुर्गतिगर्तमग्ना
सञ्चायते　स्वपयस:प्रतिदानमद्य ।।१०।।

क्षीराणि　नीरनिकराद् विविनक्तु　हंसः
केकी　द्विजिह्वनिवहं　क्षयमातनोतु ।
श्रोत्रामृतं　वितरतु　सुधियां　विपञ्ची
सत्पुस्तकं　प्रतिगृहं　प्रसरीसरीतु ।।११।।

विद्वन्मुखानि चुम्बन्ती भ्रमन्ती मुक्तकाङ्गणे।
वन्द्यतां विबुधैः साध्वी वक्रापि सुरभारती ।।१२।।

# ८. वाणी

मन्दस्मितेन कुटिलेन निरीक्षितेन
हावेन किञ्च ललितेन सुविभ्रमेण ।
रामापि नैवमुपदीकुरुते यमर्थं
तद् वैभवं वितनुते सुकवीन्द्रवाणी ।।१।।

नो माक्षिकं, न सहकाररसो, न दुग्धं,
द्राक्षा न, मोदककुलं न, सुधासिते नो ।
माधुर्यमर्पयति यत् सरसे समाजे
तद् द्रागुपाहरति कोमलबालवाणी ।।२।।

आमोदितेऽपि कुसुमोपचयैर्वनान्ते
नृत्योत्सवैर्विलसितेऽपि च वल्लरीणाम् ।
तावन्न नन्दतितरामृतुराजलक्ष्मी-
र्यावन्न वर्षति सुधां कलकण्ठवाणी ।।३।।

व्यर्थीकृतेऽपि नयने तिमिरागमेन
ज्ञानेन्द्रियेषु निखिलेष्वपि कुण्ठितेषु ।
संमूर्च्छितेऽपि जगतो व्यवहारजाते
सर्वार्थमानयति केवलमेकवाणी ।।४।।

दुर्दान्तदैन्यपरिमर्दित- मोदवृत्ते-
नैंराश्यतापपरिशोषितसुस्मितस्य ।
दूनोत्सवस्य गृहिणोऽपि मुदं प्रसूते
कर्णे सुधेव रमणीरमणीयवाणी।।५।।

नैसर्गिको मधुरिमापि यथापयाति
दध्नोऽन्तिकात् सपदि पित्तलपात्रदोषात्।
निन्द्या तथास्ति निजसेवकपापपुञ्जा
दद्यानवद्यमहिमापि निलिम्पवाणी।।६।।

जाड्यं निवर्त्तयितुमुज्झितुमाशु कुण्ठां
सुप्तां प्रबोधयितुमेव वनान्तलक्ष्मीम्।
माकन्दमूर्ध्नि नवमञ्जरिकां निधातु-
मभ्युद्गता भगवती मधुमुग्धवाणी।।७।।

पुष्पैः सुगन्धसदनैः सुषमानिधानै-
र्नन्दन्तु मुग्धमधुपा इव केऽपि देवाः।
किन्तूज्ज्वलैः सुमनसामभिमानकेन्द्रैः
कुन्दैरमन्दमुदितामुपयाति वाणी।।८।।

प्रेम्णाधिरोहति दिवान्धतमानुलूकान्
सन्तिष्ठते कृपणसद्मनि यानुरागात्।
सैवेन्दिराद्य यदि पूज्यतमा सुधीन्द्रै-
र्हंसासना किमधुना न दुनोतु वाणी।।९।।

येषां शिरांसि मुकुटैर्नहि मण्डितानि
नाभ्यर्चितानि सुकुमारपदानि लोके।
निष्किञ्चनानपि च तान् सुधियां समाजे
पूजास्पदं प्रकुरुते ललितार्थवाणी।।१०।।

# ९. गीर्वाणवाणी

भाषाप्रश्नानुरोधादुपहतहृदयोद्गारसौरस्यसारं
द्रागुज्झित्वैकतायाः प्रबलगुणगणाबद्धसख्यप्रसारम् ।
दाक्षिण्यं वामतायाः प्रकटितमसकृद् विप्लवात् सौमनस्यं
हत्वा दुर्लालसं तं ग्रथयतु परमे प्रेम्णि गीर्वाणवाणी ।।१।।

अन्योऽन्यं जातवैरं नयनिपुणजनस्वार्थसम्पादयित्र्या
वाचा, हिंसा-व्यलीकव्यवहृतिविषये त्यक्तसौजन्यरीतिम् ।
निर्लज्जं नीचकार्येष्वनुरतिमनिशं सर्वथोद्बोधयन्तं
देशं क्लेशप्रवेशादवतु भगवती कापि गीर्वाणवाणी ।।२।।

आलम्बनं सुचरितस्य निसर्गरम्य-
मुद्दीपनं मधुरमङ्गलरत्नभासः।
औन्नत्यगर्वहरमुन्नतमेरुतुङ्ग-
शृङ्गस्य राजतितरामिह संस्कृतं नः ।।३।।

# १०. वाणीविलसितम्

स्मितज्योत्स्नामास्ये तरलयति लास्ये पदयुगं
विलासं संलापे जनयति शुभारम्भमुरसि ।
भुजे शौर्यं धैर्यं मनसि विकले क्लेशबहुले
प्रसूते यत्तत्त्वं तदिह कविवाणीविलसितम् ।।१।।

श्रुतिद्वारेणान्तःकरणशरणं प्राप्य सहसा
द्रवीभावं तिग्मीकरणममलोच्छ्वासमसमम् ।
शिरःकम्पं शम्पास्फुरणमपि चित्ते सृजति यत्
तदेव प्राशस्त्यं श्रयति कविवाणीविलसितम् ।।२।।

महालोके लोके तपति तपने व्योमसदने
शरज्ज्योत्स्नाजालं किरति विपुलं शीतकिरणे ।

अखण्डे ब्रह्माण्डे ज्वलति मणिदीपेऽप्यगणिते
तमःस्तोमध्वंसं विरचयति वाणीविलसितम् ।।३।।

हरत्यन्तस्तापं पिबति विषमुद्वेगजनितं
परीरम्भारम्भे जनयति विजृम्भां प्रणयिषु ।
रुषोऽशेषारण्यं दहति विनियुङ्क्ते हृदि रसं
गुणान् स्वान्ते सूते विबुधजनवाणीविलसितम् ।।४।।

रणे प्राणोत्सर्गैरपि विजयलाभाय रिपुषु
प्रवृत्तिं शूराणां मनसि निदधात्येव निभृतम् ।
अलभ्यं सौलभ्यात्प्रशममपि बध्नाति हृदये
विमुक्तिं भुक्तिं वा प्रवितरति वाणीविलसितम् ।।५।।

तृणीकृत्य प्राणानपि विपुलकोशानधिकृतान्
प्रदातुं सोत्कण्ठो भवति पुरुषो मुक्तममतः ।
अपि क्लेशावेशं सुकृतमवितुं साधु वृणुते
निपीयाचार्याणाममृतमिव वाणीविलसितम्।।६।।

# ११.तत् संस्कृतम्

यत्रारकूटमहिमोपचयेन हेम्नां
मूल्यं हसत्यनुदिनं स्थिरदैन्यमूलम् ।
तत्राधुनातनमशेषविशेषवस्तु
भोक्तुं सुखानुभवमुज्झति तत्त्वबोधम् ।।१।।

त्यक्तार्चनापि कृतशूलशताकुलापि
दीनाप्युपेक्षिततमापि विमर्दितापि ।
मातेव वत्सलमयी निजबालकेभ्यः
शं सन्तनोति हृदयेन सरस्वती नः ।।२।।

अत्यन्तदुर्मददुरन्तसपत्नसङ्घैः
सन्त्रासितापि जनता न जहौ गिरं याम् ।
सौविध्यसम्भृतमये समयेऽधुना तु
सेवारतोऽपि विबुधोऽपि न सेवते ताम् ।।३।।

विद्यासु काव्यकलनासु कलासु शिल्पा-
द्याजीविकासु शुचितासु समुन्नतासु ।
नीतिष्वनर्घगुणगुम्फितरीतिषु स्याद-
स्माकमात्मनि पुनः प्रणयानुबन्धः ।।४।।

शब्दान् सुवर्णघटितान् रमणीयरूपान्
अर्थान् अलङ्कृतशतेन विभूषिताङ्गान् ।
निर्दुषणाऽनधिककरोति सवाग्विलासान्
संसेवतेऽनुदिवसं कविभारती यः ।।५।।

राष्ट्रस्य गौरवनिदानमुदारतायाः
सञ्जीवनं जगति मानवमानमूलम् ।
श्रेयस्करं सुमनसां मनसो विकार-
विध्वंसनं जयति संस्कृतमार्यवित्तम् ।।६।।

यद् रक्षितं द्विजकुलेन विहाय लोक-
सौख्यस्पृहामथ सुदुस्त्यजभोगवृत्तिम् ।
तत् संस्कृतं परममङ्गलमात्मबोध-
पूर्णप्रमादभरितेन निरीक्ष्यते नो ।।७।।

यद्वञ्चनारुचिमुरीकुरुते न किञ्चित्
नान्यापकारकरणे प्रणयं बिभर्ति ।
यन्मानसीं मलिनतां सततं क्षिणोति
तत्संस्करोति हृदयं न कथं बुधानाम् ।।८।।

ग्राव्णा विचूर्णयति कौस्तुभरत्नमीड्यं
निर्वासयत्यथ गृहादिह कामधेनुम् ।
पीयूषकुम्भमपि हन्त भिनत्ति मुग्धो
सद्यो विवर्जयति संस्कृतवाङ्मयं यः ।९।।

कालद्रुमस्य परिरक्षणमुज्झतीह
प्रातीच्यमाचरति देशिकसेवया सः ।
तृष्णातुरोऽप्यमृतपानमपाकरोति
यः साम्प्रतं सुरगिरं विरुणद्धि मोहात् ।।१०।।

चिन्तामणिं शकलयत्यवलिप्तचित्तः
निःसीमशक्तिजननीं सुरभारतीं सः ।
श्रेयांसि दूरयति पूर्णतया प्रमत्तो
यो देववाचमचिरं विजहाति मुग्धः ।।११।।

परः सहस्राब्दिकमार्षचिन्तनं
हितं नृणां माङ्गलिकं समीहितम् ।
दुरापसञ्जीवनमाप्तजीवने
सदैव तत्संस्कृतमीप्सितं सताम् ।।१२।।

सर्वात्मना सकलसत्पुरुषैरुपास्यं
निःश्रेयसाभ्युदयमङ्गलगीतमञ्जुलम् ।
कल्याणकल्पलतिकोज्ज्वलपुष्पसौरभं
भवे भवे रक्ष्यमिदं सुसंस्कृतम्[१] ।।१३।।

योगस्य भूतिकरमर्च्यतमं सुखस्य
सज्जीवनं च पुरुषार्थचतुष्टयस्य ।
प्राणप्रदं सततमध्यवसायसिद्धे-
रैश्वर्यवर्धनपरं परदैवतं नः ।।१४।।
यन्मङ्गलं मतिमतां यदभद्रताया
प्रस्थापनं यदनघं त्रतमर्हतायाः ।
यच्चैहिकाभ्युदयकारि शुभक्रियाणां
निःश्रेयसोत्सवकरं च सतां तदीयम् ।।१५।।
वेदैः षडङ्गसहितैर्महितं यदाढ्यं
रामायणप्रथितभारतसारभूतम् ।
यच्च स्मृतिव्यतिकरैर्लसितं समृद्धं
सम्भासते जगति विश्रुतसंस्कृतं तत् ।।१६।।

---
१. पाठान्तरः संरक्षणीयमनिशं शुभसंस्कृतं तत् ।

यस्मिन्नबद्धमिह बुद्धविचाररत्नं
यस्मिञ्जिनाक्तिमणि मण्डितमञ्जुमाल्यम्
यस्मिन्महर्षिमहनीयवचोविलास-
स्तत् संस्कृतं जयति विश्वबुधप्रणम्यम् ।।१७।।

आचार्यशङ्करशुभङ्करतर्कजालै-
र्रामानुजप्रभृतिवैष्णवगीतनादैः ।
निम्बार्कमाध्ववरवल्लभभक्ति-
पातैश्चैतन्यकीर्तनलयैर्लसितं यदस्ति ।।१८।।

वाल्मीकिभव्यमणितिर्भुवि वन्दनीयव्यासस्य
सक्तिरुचितान्यकवीन्द्रवाणी
श्रीकालिदासभवभूत्यभिनन्दबाण-
श्रीहर्षसत्कविभिरर्चितसंस्कृतं तत् ।।१९।

यद्व्यासजैमिनिपञ्जलिगौतमाक्षपादैः
कणादकपिलादिभिरीड्यसूत्रैः ।
वात्स्यायनप्रभृतिभूषित भव्यभाष्यैः
तद्भासते प्रथितयुक्त्युपपत्तिभिस्तत् ।।२०।।

यस्मिन् विभात्युदयजस्य गिरां विलासो
वाचस्पतेर्जयति यत्र च भामती सा ।
चिन्तामणिः स्फुरति कीर्तिकलेव यस्मिन्
गङ्गेशबुद्धिविभवस्य च संस्कृतं तत् ।।२१।।

आभाति यत्र भरतस्य च नाट्यशास्त्र-
मानन्दवर्धनसुधीन्द्रवरस्य विद्या ।
वाचश्चकासति बुधाभिनवस्य भव्या-
स्तत् संस्कृतं जयति भारतभव्यदैवम् ।।२२।।

क्षेमेन्द्रकुन्तकमहामहिमप्रणमम्यश्री-
मम्मटप्रभृतिकाव्यविचारदक्षाः ।
सद् बुद्धिवर्धनपरं वचनं यदूचु-
स्तद्वैभवं सुरगिरो भुवने विभाति ।।२३।।

या सुश्रुतेन चरकेण च वाग्भटेन
या माधवेन कथिता वपुषश्चिकित्सा ।
यां द्राक्तरोऽति कुशलोऽपि नवेति नव्यः
तत्सम्भृतं जयति सम्प्रति संस्कृतं तत् ।।२४।।

यन्नृत्यगीतलयतालसमृद्धवाद्य-
सद्रूपकाभिनयशाश्वततत्त्वबोधम् ।
स्थापत्यचित्ररचनादिषु शिक्षणस्य
भाति प्रबन्धशतमस्ति हि संस्कृतं तत् ।।२५।।

यन्नास्तिकास्तिकविचारविवेचनासु[१]
पक्षस्थिरीकरणयुक्त्युपपत्तिवाचः ।
यत्खण्डनं हृतविपक्षकुतर्ककण्ठं
यत्तर्ककर्कश मुदेति मुदे बुधानाम्[२] ।२६।।

यद् वादजल्पघटितासु वितण्डिकासु
बुद्धेः प्रकर्षमुपपादयितुं सभासु ।
शास्त्रार्थकौशलमलङ्कुरुते सुधीन्द्रान्
नैपुण्यमद्भुतमुदेति तु संस्कृतं स्यात् ।।२७।।

क्रीडासु कायबलवर्धनतत्परासु
सौभाग्यमेधयति सम्प्रति संस्कृतं तत् ।
अत्यद्भुतासु विजिगीषुसमादृतासु
सौभाग्यमेधयति सम्प्रति संस्कृतं तत् ।।२८।।

यत्ताम्रकांस्यरजतायसकाचवङ्ग-
कार्तस्वरप्रचुरपित्तलाद्याः ।
यस्यां वसन्ति जठरेषु वसुन्धराया-
स्तत्कीर्त्तिकीर्तनपरायणसंस्कृतं तत् ।।२९।।

---

१. पाठान्तरः *विवादपरम्परासु।*

२. पाठान्तरः यन्खण्डनं दृढविपक्षमतस्य तीव्रं तद् गुम्फितमुदित्वरसंस्कृतं तत्।

यत् सिन्धुसागरशिलोच्चयकाननाद्यै-
र्यन्मौक्तिकैर्मरकतैरथ पद्मरागैः ।
वज्रैर्महामणिभिरुत्प्रतिभासमानं
सम्मानभाजमनश्वरसंस्कृतं तत् ।।३०।।

यस्य प्रसादमुपलभ्य नरेन्द्रवृन्दैः
सम्मानिता बुधवराः कवयो जयन्ति ।
तेषां विशेषरचनावचनावलीभिः
कामं समृद्धिमयते स्तुतसंस्कृतं तत् ।३१।।

भौगोलिकस्थितिरुपास्य खगोलविद्या
वैज्ञानिकोत्खननलब्धमहाविभूतिः ।
विज्ञातवस्तुगुणदोषविवेकसंवित्
यस्मिन् समुल्लसति दीव्यति संस्कृतं तत् ।।३२।।

यस्मिंस्तृणद्रुमलताक्षुपसद्गुणौघो
जीवाः स्थलेषु सलिलेषु वियत्स्वनल्पाः ।
संवर्णिता नभसि कार्यरतग्रहाद्या-
स्तत् संस्कृतं विविधबोधमयस्य मूलम् ।।३३।।

यो हेमकेसरिनखायुधमुग्ररोष-
दीपानलप्रशमवारिदवारिवर्षम् ।
मारस्य मारणपरायणमस्त्रशस्त्र-
लोभाभिधरस्य महिषस्य च संस्कृतं तत् ।।३४।।

अध्यापनस्य शुचितैकनिदानकेन्द्रं
ग्रन्थादिलेखनविधेर्महसो महत्त्वम् ।
सौजन्यजन्ययशसो धवलः प्रकाशो
दोषावलोकनदृशोऽञ्जनसंस्कृतं तत् ।।३५।।

यस्मिन् वराहमिहिरार्यभटप्रशस्तश्री-
भास्करप्रभृतिदेवविदां सदुक्तिः ।
अद्यापि विज्ञजनबुद्धिविवृद्धिहेतु-
रुद्भासते जगति नन्दति संस्कृतं तत् ।।३६।।

यस्मिन् बुधप्रथितसत्प्रतिभा विभाभि-
राराधितो जयति पाणिनितत्त्वबोधः ।
अल्पाक्षरैर्यदनुशास्तिसमस्तसाधु-
शब्दानर्घमणिमण्डितसंस्कृतं तत् ।।३७।।

नूनं महज्जयति भाष्यमतुल्यबोध-
माचार्य भर्तृहरिणा च यदुक्तमीड्यम् ।
याद्रेर्गिरा विलसितं तदिदं ह्युदेति
यद् व्याकृतिस्फुरितकीर्त्ति सुसंस्कृतं तत् ।।३८।।

आचार्यभर्तृहरिवाक्यपदीयसंवित्
सम्भासितं जयति भास्वरकाशिकाद्यैः ।
भट्टोजिदीक्षितगिरोल्लसितं चकास्ति
यत्कैयटादिकृतिभूतिविभूषितं तत् ।।३९।।

नागेशकौण्डरचनारुचिरप्रभावात्
यद्भूषितशिवकुमारगिरा गभीरा ।
रामप्रसादसुधियाऽद्यतनं महत्त्वं
यत्राहितं जयति संस्कृतवैभवं तत् ।।४०।।

नागेशभट्टरचनार्चितलब्धकीर्तिः
श्रीकौण्डभट्टकृतभूषणभूषिताया।
दामोदरप्रखरबुद्धिविलासरम्य-
तात्यार्चिता शिवकुमारगिरा गभीरा ।।४१।।

मानोन्नता विजयया जयदेवपुंसो,
हृद्या बभूव कृतिनां भुवि शब्दविद्या
शास्त्रार्थसंसदि परान् प्रतिवादिनो ये
वाचंयमान् विदधिरे मिथिलास्थविज्ञाः ।।४२।।
श्रीधर्मदत्तसहदेव सबालकृष्ण-
नैयायिकाः प्रथमपंक्तिषु कीर्तितास्ते ।।४३।।

शास्त्रश्रियामाधिपतिरद्रविडप्रसूतो
राजेश्वरो जयति पण्डितराजनाम्ना ।

श्रीरामचन्द्रहरिरामसुधीश्वरास्ते
यस्मादधीत्य भुवने व्यलसन् नमस्याः ।।४४।।

स्नेहः समस्तनिगमागमदीपकस्य
साहित्यदर्शनगिरामभिरामसंवित् ।
निःश्रेयसस्य पथिकः कविराजगोपी-
नाथः प्रकाशयति दीप्तिमतिं स काशीम् ।।४५।।

विद्याधरः श्रुतिमयोऽथ गुरुप्रसादः
शब्दागमादिविषयस्य गुरुर्गरीयान् ।
श्रीदेवनायकसुधीरिहवाग्मितायाः
शृङ्गा बभूव रमणीयतमो मतो नः ।।४६।।

साहित्यशास्त्रमहिमाधृतविग्रहः किम्
षड्दर्शनस्य रमणीयतमा कृतिः किम् ।
किम् व्याकृतेर्हृदयवल्लभतामुपेतः
किं पण्डितः सुकविकीर्तिकलाकलापः ।।४७।।

श्रीधर्मसंघपरिपोषितरामराज्य-
प्राज्यप्रभावपरिषज्जनकोऽर्चनीयः ।
व्याख्यानलेखनसुपाठनलब्धकीर्तिः
स्वामी जगत्यनुपमः करपात्रपादः ।।४८।।

तीर्थेषु येन विविधेषु चिरप्रसिद्धाः
यज्ञा व्यधायिषत् भूरिविभूतिभव्याः ।
सोऽयं जगद्गुरुगणस्य कृताभिषेकः
स्वामी जयत्यनुपमः करपात्रसंज्ञः ।।४९।।

यो धार्मिकप्रवचनेऽथ पुराणविद्याहृद्यामि-
वार्चनविधावसमः सभायाम् ।
यः साम्प्रदायिकगुरुप्रवरार्चितोऽपि यो
भासते जगति हेयजगत्प्रपञ्चो ।।५०।।

यः संस्कृतप्रवचनेऽनुपमः क्रियाणां
सम्यक्प्रयोगविषयेऽथ सभासमाजे ।
शास्त्रार्थसंसदि पराजितविज्ञरवादी सोऽयं
द्विवेदितिलकोऽत्र बभौ कृपालु : ? ।।५१।।

यः सम्प्रदायविधिनार्जितकाव्यविद्यो
नारायणः सुकविमण्डल- सार्वभौमः ।
यः शक्तितन्त्रपरिषत्स्वसमानमानः खिस्ते-
कुलस्य मणिदीप इवावभासे[1] ।।५२।।

देवस्वरूपहरिरामसुरामयत्न -
श्रीरामदीक्षितसुधाकरविश्वनाथाः
-श्रीरामचन्द्रमनुदेव सपुत्ररत्नः सत्तर्क-
कर्कशगिरो जयरामशुक्लाः।।५३।।

राष्ट्रप्रशासनसमर्चितपादपीठो
हेब्बारशास्त्रितिलकोर्जितशुभ्रकीर्तिः ।
सद्ग्रन्थगूढतममर्मसुबोधनेऽर्च्यः
प्रोद्भासते भुवि गजाननशास्त्रिवर्यः ।।५४।।

पुंभावमाप्त इव वागधिदेवताया
रुद्रप्रसाद इव मूर्तिधरो धरायाम् ।
काणादपाणिनिबुधोऽप्रतिमप्रभावो
-रुद्रप्रसादसदृशो भुवि कः परो विद् ?।।५५।।

यो भारतेऽथ विपुलेऽपि विदेशभूमौ सम्मानभाजनमशेषसुधीसमाजे ।
काव्यं विदग्धमुखमण्डनमर्थजातमुद्धर्तुमर्हति जगत्यरोसुधीः कः?।।५६।।

---

१.पाठान्तरः *बभौ स :।*

# १२.तत्संस्कृतं जयति मानवमानमूलम्

पद्मा-प्रेमलतोर्मिलाथ कमलारत्नं विभाभारती-
विद्याश्रीर्यमुनाऽर्चनाऽथ शान्तिविमलाकृष्णासुशीलादयाः ।
प्रज्ञाश्रीनलिनीप्रभृत्यनुपमाः सीमन्तिनीनायिकाः
प्रख्याता भुवनाञ्चले सुरगिरं संसेव्यसिद्धिं गताः ।।१।।

श्रीदेववंशजनितोत्तममौक्तिकाम-
श्रीविश्वनाथसहिताद्भुतवैदिकाग्र्यान् ।
श्रौतक्रियास्वनुपमानुपलभ्य विज्ञान्
अर्चन्ति के न कृतिनः स्तुतसंस्कृतं तत् ।।२।।

सत्काव्यकाननवसन्तमतीवसन्तं
तं वाङ्मयाम्बुनिधिमन्थनमन्दराद्रिम् ।
सद्वृत्तवैभवमुदारमधुस्वभावं
श्रीशेवडे कुलविभूषणरत्नमीडे ।।३।।

सद्यःप्रशासनपुरस्कृतमद्वितीयं
वन्द्यैर्विदग्धनिवहैरभिनन्दितं यत्
यो देवतासदयसद्गुणवर्णनाय
काव्यं निसर्गरमणीयतमं प्रकृत्या ।।४।।

सिद्धेश्वरेऽधिकृतसर्वविधप्रबोधे
शोधप्रबन्धपरिशोषितधीविकारे ।
श्रीमद्रमासहितशङ्करशास्त्रचिन्ता-
रत्ने समुज्ज्वलति दीव्यति संस्कृतं तत् ।।५।।

यद् भारतीयजननां विविधस्वभावा-
मेकत्वसूत्रघटितां विदधाति मालाम् ।
पुष्णाति शर्मविमलाचरितं प्रचार्य
तत्संस्कृ तं जयतिमानवमानमूलम् ।।६।।

नाट्यक्रियासु कुशलं कविकर्मणीयं
प्राध्यापने प्रवचनेऽर्जितकीर्त्तिपुञ्जम् ।
व्याख्यानलेखनकलास्वपि सुप्रसिद्धं
कर्मण्यमर्चति न कः कमलेशदत्तम् ।। ७।।

साहित्यशासनमहोदधिमन्दराद्रिं
श्रीराममूर्तिमुपदीकृतबोधरत्नम् ।
सौजन्यशेवधिमुपासितसाधुभाव-
मत्युन्नतं नमति को न विनीतविज्ञम् ।।८।।

साहित्यशास्त्रनिधिमर्चितदर्शने-
ष्वन्तःप्रविष्टमविगीतपुराणविद्यम् ।
वाग्देवतामुखरनूपुरमार्यबाबू-
लालं प्रशंसति न कः स्मितशोभिवक्त्रम् ।।९।।

ज्ञानार्णवं परमहंससुरत्नमाला-
मेरुं सुमेरुशुभपीठपतिं यतीन्द्रम् ।
श्रीशङ्करप्रतिकृतिं कृतिनामुपास्यं
वन्द्यं जगद्गुरुमुरुप्रणयान्नमामि ।।१०।।

श्रीकोठियाकुलमणिं दरबारिलालं
कर्मण्यमप्रतिमगोकुलचन्द्रजैनम् ।
बौद्धागमे विलसितोदयचन्द्रवर्यं
धुर्यं विदामभिमतं हृदि भावयामि।।११।।

दुर्बोधगौतमकणादनये नदीष्णं
शास्त्रार्थसंसदि समाहृतकीर्तिपुञ्जम् ।
प्राज्ञप्रशंसितमनुज्झितवर्त्मकीर्त्या-
नन्दं सुधीन्द्रतिलकं सततं स्मरामि ।।१२।।

सूक्ष्मार्थदर्शनसमर्थनमञ्जनं यत्
दिव्यं रसायनमशेषमनोरुजां यत् ।
सञ्जीवनं यदुचिताचरणावलीनां
तत् संस्कृतं जयति किल्बिषपङ्कशोषम् ।।१३।।

वाण्यो विभूषणमदूषणमिष्टसिद्धे-
र्निर्देशनं भवति सद्ममयं सुवर्त्म[1] ।

१. पाठान्तरः *पद्मय, शर्म।*

निःश्रेयसाधिगमगोपुरमद्वितीयं
ज्योतिर्दृशा भुवनवैभवमीप्सितं तत् ।।१४।।

अभ्युन्नतेः कुलगृहं विषमस्थितीनां
सम्मर्दनं दुरितवारणदारणं यत् ।
यन्मङ्गलं गृहवता भवतां स्वधर्मं
पीयूषकुम्भ इव भूरि तृषार्दितानाम् ।।१५।।

रक्षाकरं कवचमार्जवसत्यतायाः
क्षान्तेदृढं शरणमावरणं घृणायाः ।
उत्सारणं सकलदुष्कृतकण्टकानां
हिंसादिदोषशमनं भुवि संस्कृतं तत् ।।१६।।

लुप्ता कदाचिदपि या न सरस्वतीह
यस्याः सुशीतलरसैः सरसारसास्ते ।
यां न प्रदूषयति दूषणपूर्णकाल-
कूटं जयत्यनुपमा तु सरस्वती सा।।१७।।

यस्मिन् क्षमोल्लसति नन्दति चानुकम्पा
प्रीणात्यसीमकरुणा तरुणातपार्त्तिः ।
प्रीतिः परिस्फुरति सख्यमुदेति भव्यं
शुद्धिः प्रवृद्धिमयते हृदि संस्कृतं तत् ।।१८।।

भाषा विभासयति भारतदेशजाता
भावान् पुनाति मनुजात्मनि विद्यमानान् ।
सत्प्रेमबन्धनवशीकृतबन्धुवर्गं
गर्वं त्वखर्वमपि खादति संस्कृतं तत्।।१९।।

अध्यात्मदीपशिखोपचितप्रकाशं
सारस्वतामृतमहोर्मि मनोहरं यत् ।
यद्भूतिभूषणमनश्वरवैभवं यत्
यत् क्षेमधामपरिपालनसंस्कृतं तत् ।।२०।।

सोपानसङ्ग्रथनमूर्ध्वगतेरनल्पं
सङ्कल्पितव्रतमघौ घहरं जनानाम् ।

दुर्दान्तमानसविकारविनाशनं यत्
प्रोत्साहनं सुकृतिनां भुवनेऽर्चितं तत्।।२१।।

यस्मिंस्त्यजन्ति पशवोऽपि निसर्गवैरं
शश्वत्फलन्ति तरवो विकसन्ति वल्ल्यः ।
गायन्ति साम विहगा अपि पावनं तत्
रम्यं तपोवनमुदेति मुदे जनानाम् ।।२२।।

अन्योन्यरागरसमेदुरितान्तरालं
पुण्यस्थलं प्रतपतां विगतस्पृहाणाम् ।
निष्कामसज्जनतितिक्षुपरोपकार-
सेवासमर्पणतपोवनं नः ।।२३।।

यस्मिंस्तपस्विजनजीवनमर्हणीयं
यस्मिंस्तपोवनमनन्तगुणाभिरामम् ।
यस्मिन् समृद्धिरपरिग्रहपूजिताऽपि
संवर्ण्यते मुनिमनीषिभिरीडितं तत् ।।२४।।

शारीरिकश्रमसमन्वितबुद्धिवृत्ते-
रुत्कर्षकं सुचरितस्य विकासकेन्द्रम् ।
स्वाध्यायसंयमबहुश्रुततास्वधर्म-
श्रद्धास्पदं गुरुकुलं जयतीह दिव्यम्।।२५।।

सर्वास्त्रचालनमलक्षितलक्ष्यवेधं
क्षिप्रक्रियत्वमथ सैन्यनिदर्शनाद्यम् ।
सञ्चालनं रथतुरङ्गमतङ्गजानां
धैर्यं स्थिरं च लभते स्म युधि प्रवीरः ।।२६।।

उत्साहसाहसधृतिव्यवसायसिद्धिं
सद्हस्तलाघवमजेयपराक्रमादि ।
अश्रान्तपौरुषमभीतमनल्पशिल्पं
युद्धेषु बोधयति निष्ठुरयुद्धविद्या।। २७।।

# १३. प्राच्य-विद्या

वेदो यस्यां सभेदो निखिलकलकलाज्ञानविज्ञानसम्पत्-
सम्भारैर्भासुरश्रीर्जयति परिहरन् सान्द्रमोहान्धकारम ।
तत्त्वालोकैरलोलै रचयति नितरां ब्रह्मधर्मप्रपञ्चं
जीयात् सा प्राच्यविद्या प्रथमतमशुभा सन्ततिर्देववाण्याः ।।१।।

वेदाङ्गानि प्रसिद्धान्यभिमतविभवैरर्थसार्थैः समृद्धा-
न्युद्धर्तुं जाड्यजालप्रपतितमनसो मानवान् संयतन्ते ।
तेषामेवानुकूल्याद् दुरधिगमतमाम्नायविद्यारहस्यं
बुद्ध्वा श्रेयांसि लब्धुं सुरमुनिमनुजा इष्टसिद्धिं लभन्ते ।।२।।

चारित्र्यं चारु चामीकरमिव रुचिरं पावनं मानवानां
श्लोकैः सुश्लोकपूर्णैरसृजदनुपमं मैथिलीदाशरथ्योः।
सावद्यं नाद्य यावद् यदिह परिणतं मानसे पुण्यभाजां
वाल्मीकेरादिकाव्यं रमयति रसिकांस्तत् स्तुवत् साधुशीलम् ।।३।।

एकस्मिन्नेव यस्मिन्ननुपममहिमन्युद्गते भारतेऽभूद्
वर्ण्यः सर्वः पुमर्थः सुमनसि सुरभिं वर्धयन् सुप्रसङ्गैः ।
ब्रह्मज्ञानेऽथ योगे निगमनिगमने लब्धमाने पुराणे
कृष्णद्वैपायनीया विलसति सुमतिः श्रेयसे सर्वपुंसाम् ।।४।।

अष्टाध्याय्यां समस्तां परिमितवचनैः शब्दविद्यां विशालां
विन्यस्य स्वीयबुद्ध्या निरुपममहिमा दर्शितो येन सम्यक् ।
तस्य श्रीपाणिनेस्तु प्रथितसुमनसो वीक्ष्य मेधाविलासं
साश्चर्यं सानुरागा भुवनतलगताः प्रत्यहं तं नमन्ति ।।५।।

अत्यन्तं सारगर्भे विलसति विपुले वाङ्मयेऽस्मिन्नजस्रं
शास्त्रं पातञ्जलं किं विबुधजनमनोरञ्जने सज्जते नो?
व्याडिं कात्यायनं वा हरिममलमतिं वामनं कैयटं वा
नागेशं दीक्षितं वा स्मरति न कृतधीः कस्तथा कौण्डभट्टम् ।।६।।

चाणक्यं चार्थशास्त्रप्रणयनपटुतां प्रस्तुवन्तं सुधीन्द्रं
नीतिज्ञानैः समृद्धं नमति बुधवरः को न कामन्दकीयम्?
को विद्वान् कामतन्त्रे स्मरति नहि नयं साधु वात्स्यायनस्य
तारुण्योल्लासलीलावलयितविभवं हृद्यविद्याभिरामम् ।।७।।

धर्मे वेदानुकूले मनुजहितरतं श्रीमनुं याज्ञवल्क्यं
ध्यायेत् को नैव वर्णाश्रमसुकृतमयं धर्मशास्त्रे प्रसिद्धम् ।
लोकाराध्यावतंसैर्लिखितशुचितमग्रन्थरत्नांशुदीप्त्या
दीव्यद्देहाऽवधेया स्मृतिशतनिचिता प्राच्यविद्याधिदेवी ।।८।।

आन्वीक्षिक्याः प्रपञ्चेऽञ्चितमतिविभवा गौतमश्चाक्षपाद-
स्तर्कालङ्काररत्नच्छुरित उदयनो वन्द्यवाचस्पतिश्च ।
गङ्गेशो गीतकीर्त्तिर्जयति निरुपमो न्यायवैशेषिकाद्ये
शास्त्रे श्रीधर्मदत्तो जितगुरुधिषणा बङ्गविज्ञा विभान्ति ।।९।।

सांख्ये प्रख्यातकीर्तिर्विलसति कपिलः शुद्धबुद्ध्याऽनिरुद्धः
शास्त्रस्यास्य प्रतिष्ठाजनक उदितवान् विज्ञवाचस्पतिश्च ।
वन्द्यो विज्ञानभिक्षुः शुचिरुचिरुचिरश्चारुचारित्र्यचुञ्चुः
आचार्यः पञ्चचूडप्रभृतिरुपनतश्चासुरिः सर्वपूज्यः ।।१०।।

योगे पातञ्जले च प्रकटितमहिमव्यासभाष्यं सदास्यं
चुम्बत्याचार्यवर्यप्रभृतिसुमनसां निर्मलस्वान्तभासाम् ।
वाचामुद्दामदीप्त्या शकलिततिमिरो भोजवाचस्पतीनां
लोके लोकोत्तरश्रीर्विलसति सकलाभीष्टसिद्धेर्विलासः ।।११।।

अन्योऽन्यं भिन्नभावं विरचितमजितं भाष्यमाचार्यकैर्यद्
व्यासो न्यासेऽक्षराणामधिगतमहिमा भाति तद् ब्रह्मसूत्रे ।
भामत्यां खण्डने वा जितजगति रुचा चित्सुखाचार्यवर्यै-
र्निर्द्वैतेऽद्वैतसिद्धिप्रभृतिषु कृतिषु ब्रह्मविद्या विभाति ।।१२।।

भास्वद्वर्णैः सुवर्णैर्ग्रथितमणिगणैर्भारतीकण्ठहारै-
र्व्याहारैर्युक्तियुक्तैरनभिमतबुधाक्षेपवाचं क्षिपद्भिः।
वेदान्ते सम्प्रदायान्तरघटितमहापीठविद्याधिनाथै-
राचार्यैश्चारुचर्यैर्जयति दिशि दिशि प्राच्यविद्याऽनवद्या ।।१३।।

वेदानां वाक्यजातादतिजटिलतमादर्थसार्थानि दोग्धुं
मीमांसाशास्त्रसूत्रं विशदमतितरां द्वादशाध्यायसिद्धम्।
ज्ञातार्थो जैमिनिस्तु प्रथितमुनिजनाभ्यर्चितोऽजेयवाचा
प्राणैषीत्तच्च सम्यक् शबरमुनिकृतं व्याकृतं विज्ञवन्द्यम्।।१४।।

चार्वाको भोगवादं जडमतिरुचये प्रत्यपादीद्यतस्तल्-
लोके विख्यातलोकायतपदगदितं चर्चितं तत्त्वविद्भिः।
कारुण्यश्रीसमृद्धो मनुजहितरतो जैनविद्याप्रपञ्चो
बौद्धानामागमोऽपि स्फुरितनवनयोऽद्यापि सर्वत्र भाति।।१५।।

शिक्षाकल्पो निरुक्तं बहुविधविभवं छन्दसां शास्त्ररत्नं
वेदाङ्गत्वेन सिद्धं श्रुतिविवृतिकरं प्रातिशाख्यादिकञ्च।
ख्यातां यज्ञादिविद्यां विशदयितुमिव श्रौतकल्पादिसूत्रं
यस्या लोकोत्तरत्वं गमयति बहुधा गृह्यसूत्रादिभिश्च।।१६।।

वेदाङ्गेषु प्रसिद्धं ग्रहगणलसितं ज्यौतिषं नाम शास्त्रं
तत्तत्कर्मानुरूपं कलयति कलनां कालरूपस्य विष्णोः।
भूतं भव्यं समस्तं करतलनिहितं भासते यस्य भासा
प्रत्यक्षं कथ्यते तद् रविशशिनिवहाः साक्षिणो यत्र सन्ति।।१७।।

शास्त्रस्यास्यैव साक्ष्यादयनमृतुमहोमासवर्षादिकालं
सर्गारम्भादुदीतं प्रलयमपि वयं वेदितुं स्मः समर्थाः।
दुर्विज्ञेयं समस्तं गणितफलितयोरुल्लसत्तत्त्वजातं
ज्ञात्वेहामुत्रसौख्यं निजरुचिरुचिरं प्राप्नुवन्त्यार्यवर्याः।।१८।।

एकं जन्माङ्कचक्रं मुकुरतलमिवाशेषबिम्बायमानं
जन्मोदन्तं समस्तं निजहृदयगतं सन्निधायाभिधत्ते।
कर्मप्राप्योपभोगं प्रतिपदमयते मानवः किन्तु भाग्यात्
कार्यारम्भं विनापि प्रचुरतमफलं वीक्षते पाणिलग्नम्।।१९।।

ज्योतिर्विद्यां वराहादनुगतमिहिरो भास्कराचार्यवर्यः
प्रज्ञायाः प्रातिनिध्याद् गणितमनुपमोद्गारमाविश्चकार।
आकाशस्थग्रहाणां स्थितिगतिविषये सम्यगाधाय चित्तं
भूतं भव्यं समस्तं कथयति कुशलः शास्त्रविज्जातकानाम्।।२०।।

व्याख्यानानि श्रुतीनां नल-नहुष-हरिश्चन्द्रभूपादिकाना
माख्यानैर्जृम्भितानि प्रमुखकुलकथोद्घोषरम्याक्षराणि।
सर्गस्थित्यन्तलीलावलयितरुचिरैः सुप्रसङ्गैः पुराणा-
न्युद्गीयन्ते पवित्रं रचयितुमखिलं मानवानां चरित्रम्।।२१।।

भक्त्या मुक्त्याश्च विद्या निखिलजनसदाचारचर्याश्रितानि
वैदग्ध्यानि प्रसिद्धान्यमलमखमुखान्यर्चितानि व्रतानि।
तीर्थानीशावतारस्फुरदमलकथापूतकर्णान्तराणि
सर्वं तत् सप्रपञ्चं मनुजहितकरं वर्ण्यतेऽस्मिन् पुराणे।।२२।।

पातिव्रत्यप्रतापात्प्रशममुपगता क्रूरवार्ताऽन्तकस्य
व्याख्याताश्च प्रभावो यमनियमतपोदानयज्ञादिकानाम्।
चाण्डालोऽपि स्वधर्मं सततमनुसरन् पूज्यते सर्वलोकैः
स्त्रीणां सम्मानशिक्षाप्यसकृदिह शुभाशंसिता सुप्रभूता।।२३।।

संस्कारं वर्णधर्मोचितमथ विमलाचारजातं जनानां
कल्याणार्थं निबद्धं स्मृतिशतविहितं धार्मिकं स्तुत्यकार्यम्।
काम्यं कर्म व्रतादिस्थिरसुखविषयप्रापकं स्वर्गलक्ष्म्याः
प्रायश्चितं च चित्ताद् दुरितमलहरं धर्मशास्त्रं विभाति।।२४।।

नैरुज्यं दीर्घमायुः सुकृतशतमनुष्ठातुमत्यन्तमिष्टं
गत्वाऽऽयुर्वेदतन्त्रं प्रकटितमृषिभिः सुश्रुतैरग्निवेशैः।
ज्ञाते द्रव्यं गुणाढ्ये विशकलितगदे चार्तिनाशप्रकाशे
वानस्पत्यं च शल्यं प्रणिगदितमहो दिव्यदृष्ट्या समृद्धैः।।२५।।

दुष्टानां शक्तिभाजां प्रबलमतिबलं हन्तुमेव प्रजाना-
मभ्युत्थानाय सैन्यं घटितमनुपमैर्युद्धविद्याप्रवीणैः।
सेनापत्यं रिपूणामभिमतिहननात् प्रोत्थितं कीर्तियुक्तं
वेदज्ञानां द्विजानां सततमनुमतं शस्त्रशास्त्रानुरक्तैः।।२६।।

स्थापत्यं शिल्पशास्त्रं गजतुरगगुणोत्कर्षकृत्कृत्स्नविद्या
शास्त्रं गोवंशवृद्धेरखिलविधियुतं पाकविज्ञानमिद्धम्।
नागानां वा नगानां महितमणिलसद्भेषजज्ञानसिद्धं
वाणिज्यं कर्षकाणां विधिमुदितमिहैवेक्षितुं स्मः प्रगल्भाः।।२७।।

नृत्यं गीतं च वाद्यं विधिवदभिनयं नाट्यशास्त्रे निबद्धं
पातुं कर्णामृतं तन्नयनसुखकरं चाक्षुषं सत्क्रतुं च।
ज्ञातुं गान्धर्वविद्यामिह जगति विदां मण्डलं कौतुकेन
भक्तिश्रद्धाभिरामं गणयति दिवसं तत्प्रयोगेऽनुविद्धम्।।२८।।

कारूणां चारुकर्माभ्युदयविलसितं, स्तूयमानां च सिद्धिं
मल्लानां, सारमेयप्रमुखनिपुणतां वीक्ष्य चाखेटकाले।
शश्वद् विज्ञाय सम्यक् शकुनिकुलरुतं लाभहानिप्रदं तत्
दृष्ट्वोत्कृष्टेन्द्रजालं मनसि न लभते विस्मयं को मनीषी?।।२९।।

सम्प्राप्ते चाभियोगे सकलमुपनतं वादविन्दुं विचार्य
न्यायाधीशो विधानोचितममलमतिर्निर्णयं कर्तुमीष्टे।
निष्पक्षं तस्य मूलं स्मृतिषु निगदितं सप्रपञ्चं पवित्रं
ध्यात्वा तत् सावधानो विशदयति रुचं प्राच्यविद्यासमृद्धेः।।३०।।

शिक्षाक्षेत्रे पवित्रे गुरुकुलवसतिं निर्विशेषं दिशन्ती
सर्वेषां वर्णधर्मोचितरुचिरदिशा शिक्षणं साधयन्ती।
आत्मन्युद्भावयन्ती विनयमतितरां मानवोत्कर्षबीजं
राज्ञां किं वा प्रजानां हृदि समरसतां पाठकानां निनाय।।३१।।

स्वाध्याये दीक्षितानां गुरुजनसविधे सन्ततं संस्थितानां
बुद्धेः प्रौढिप्रकर्षं चरितरुचिरतां नम्रतां चोन्नयन्ती।
माधुर्यं वाचि, कर्मण्यतिशयशुचितां, शक्तिमत्तां शरीरे,
कर्तव्ये चानुरागं प्रथयति निपुणं प्राच्यविद्यानवद्या।।३२।।

राष्ट्राध्यक्षोऽपि लक्ष्यो भवति धनवतां शीर्षदेशेऽपिहन्तुः
स्पर्धां संघर्षबीजं वपति हृदि नृणां भूतविज्ञानबोधः।
मैत्रीं सद्भावभव्यां प्रशमपरवशां साधुवन्द्यां तितिक्षां
शीलं सौजन्यलक्ष्मीं जनयति मनुजेष्वर्चिता प्राच्यविद्या।।३३।।

शैवः शाक्तः प्रशस्तागम इह विपुलो वैष्णवो भक्तिभाजां
योगक्षेमप्रसारं वितरति परमां सिद्धिमुत्साहवृद्धिम्।
लोके लोकोत्तरश्रीरुपनिषदिव तन्मानसं सुप्रकाशं
स्फारं सम्यक्प्रसार्य क्षपयति निबिडं बौद्धिकं ध्वान्तजालम्।।३४।।

दृश्यं श्रव्यं च काव्यं सहृदयहृदयं निर्मलीकृत्य नित्यं
दूरीकृत्यान्यवेद्यं मनसि निरुपमानन्दमाविष्करोति।
रागद्वेषप्रपञ्चाध्वनि गतिमयतां बिभ्रतां भावकानां
योगाभ्यासं विनापि त्यजति विषयजं बन्धनं चित्तवृत्तिः।।३५।।

शृङ्गारो दिग्वधूनां सहृदयसुधियां मोहनो मन्दहासः
सूक्तीनां मञ्जरीणां परिमललसितः स्यन्दमानो मरन्दः।
वासन्तोद्यानभूमेरुषसि पिककुलोल्लासगीतेर्विलासः
सत्कीर्तेर्दीपमालोल्लसितकुलगृहं भासते कालिदासः।।३६।।

भासो निःश्वासवातो मृदुहृदयपरिस्पन्दनं हीरपुत्रो
वाणो वाणीविलासः समदगजपदन्यासबन्धुः सुबन्धुः।
दण्डी गीर्वाणवाण्या मुखरितहरितो मञ्जुमञ्जरीरावो
वीणानादोऽद्वितीयो जयति मधुमयो गीतगोविन्दकारः।।३७।।

रीतेः काव्यात्मकत्वं विबुधकुलमणिर्वामनोऽभाषतादा-
वानन्दस्तत्परस्ताद् ध्वनिमिह निदधे सप्रपञ्चं विचार्य।
वक्रोक्तेरात्मवादं सुकविजनगिरां कुन्तकः प्रत्यपादीत्
क्षेमेन्द्रश्चात्मतत्त्वं सपदि गदितवान् सर्वथौचित्यमेव।।३८।।

सूक्तेः सौभाग्यलक्ष्म्या मुदमुपनयतेऽलङ्कृतीनां प्रयोगो
वैचित्र्यं सन्निधातुं कविवचसि कवीन् काव्यविद्या नियुङ्क्ते।
दोषान् दूरे विधातुं जनयति हृदयेष्वप्रमादं कवीना-
मास्वादं साधु लब्धुं सहृदयहृदयं संस्करोत्येव कामम्।।३९।।

भक्तिश्रद्धाभिरामं सुकविशतकृतं भव्यकाव्यं स्तुतीनां
निर्बन्धं भूरिभावं बहुविधशतकं प्रीणयत्यार्यमिश्रान्।
गद्यं पद्यं च मिश्रं निरुपममुदितं रूपकं सप्रभेदं
खण्डं दीर्घं च काव्यं सरससुमनसं सर्वथाऽऽमोदयन्ति।।४०।।

द्यूते वाराङ्गनानां युवजनहृदयाकर्षणे कामतन्त्रे
मद्ये क्रीडाविलासे बहुविधचलिते लक्ष्यभेदप्रभेदे।
चित्रे वीणानिनादे रसिकजनमनोरञ्जने भव्यकाव्ये
दिव्योद्यानावधाने नृपनयघटिते गूढचारप्रपञ्चे।।४१।।

सज्जन्ते स्मोत्तङ्गे जलनिधिजठरे पोतञ्चालनादौ
क्रोधे हर्षे भये वा पशुशकुनिकुलस्योरुचेष्टाविलासे।
मित्रे शत्रौ तटस्थे व्यवहृतिपटुताशिक्षणे चावधाने
राष्ट्रस्याचारबाधे कुशलतमजना दीक्षिता दक्षतायाम्।।४२।।

नृणां सर्वान् पुमर्थानुपहरति करे मङ्गलं सन्दिशन्ती
कामं स्वर्गापवर्गस्थितिमपि तनुते संक्षिपन्तीव दुःखम्।
पूर्णामेवानयन्ती भुवि विभवमयीमुन्नतिं मानसानां
भुक्तिं मुक्तिं ददाना जयति निरुपमा काचन प्राच्यविद्या।।४३।।

# १४. कविभारती

यस्याः पदन्यसनझङ्कृतनूपुरस्य
तन्त्रीस्वनेन मधुरेण समेधमानः।
मञ्जुध्वनिर्वमति कर्णसुधामुदारां
चेतस्विनां मनसि खेलतु भारती सा ।।१।।

कादम्बिनी सुकविकेकिकुलस्य कापि
विद्यावतः सहृदयस्य परा विभूतिः।
स्फूर्तिः सुखस्य परिभूतिरथाशिवस्य
विश्रामधाम मनसः कविभारती नः।।२।।

सद्वृत्तजागरितरक्तविशुद्धवृत्ति-
रानन्दकन्दलितवन्दितभावभूमिः ।
लोकोत्तरस्फुरदनर्घ्यगुणाभिरामा
रामेव राजति पुरः कविभारती नः।।३।।

सन्ध्याश्रियः श्रवणकुण्डलमण्डिताङ्गं
हीरप्रभं नयनबन्धनरश्मिसारम्।
भूषामणिं गुणगणैः कविमत्युदारं
कस्याभिनन्दति मनो न मनोऽनुकूलम्?।।४।।

श्रान्तेव सान्द्रतिमिरे रजनीप्रियाङ्के
विश्रम्य लब्धनवजीवनसुप्रभाता।
सुप्तोत्थिता सुकविता वनितेव भूयः
स्मेरानना कविषु कर्मरतिं तनोति।।५।।

पाषाणखण्डविषमावनिमण्डलेऽपि
निःस्यन्दतेऽमृतझरीव सरस्वती या।
प्रीता पुनः कलकलध्वनिमालपन्ती
सम्प्रीणयेत् सहृदयान् कविभारती सा।।६।।

मुक्तामणीनिव पृथक् पृथगप्युदारान्
धन्यान् कवीन्द्रनिवहानपि चैकसूत्रे।
निर्माय शिल्पपरिकल्पितमञ्जुमालां
मूल्यानि वर्धयति नः कविभारतीयम्।।७।।

शुष्कां धरामपि रसैरभिषेचयन्ती
कादम्बिनीव मृदुमञ्जुलकल्पवल्लीम्।
उल्लासयत्यवनिमण्डलभाग्यलक्ष्मीं
सूक्तिं कविप्रतिभया कवि-भारतीयम्।।८।।

वन्द्यैः सतां सुमनसां सुरभिप्रसारै-
र्वासन्तिकीव सुषमा पवने चकास्तु।
नन्दन्तु मुग्धमधुपामधुपानमत्ता
गायन्तु च श्रवणमङ्गलगीतकानि।।९।।

अन्योन्यऽमादररभरं भृशमर्पयन्ती
प्रीतिप्रतीतिमुदमात्मनि वर्धयन्ती।
सम्भूय कार्यकरणार्जवमेधयन्ती
जीव्याच्चिरं सुकविमञ्जुलभा च लक्ष्मीः।।१०।।

क्रूरान् करोति करुणाकलितार्द्रचित्तान्
सर्वस्वदाननिरस्तान् कुरुतेऽप्युदारान्।
भीरून्नितान्तमभयान् कुटिलाशयाँश्च
स्वच्छानृजूँश्च कुरुते कविभारतीयम्।।११।।

अपूर्वं मातृत्वं जगति जनकत्वं निरुपमं
जनन्याश्चारित्र्यं मधुमधुरवात्सल्यललितम्।
गुरोरद्वैतं हृत्परमकरुणामारममलं
प्रियायाः सत्प्रेमोच्छ्वसिति भवतः काव्यनिलये।।१२।।

प्रजानामायुष्यं त्रिविधपरितापैर्विरहितं
स्थितिर्धर्मे वर्णाश्रमविहितकर्मण्युनुरतिः।
न दैन्यं न द्वेषो न च दुरितलेशोऽपि भुवने
न मात्स्य न्यायोऽभूद्रघुपतिपदे शासति भुवम्।।१३।।

## वार्ता :

प्रीतिं निहन्ति, कलुषीकुरुतेऽथ चित्तं
रुन्धे समञ्जसकथां, रुषमातनोति।
कुण्ठीकरोति मधुरव्यवहारजातं
कर्णे कृता पिशुनकल्पितभेदवार्ता।।१४।।

सम्प्राप्य मन्त्रिशिवदत्तकरावलम्बं
नीराजिता सुमनसा कविभारतीयम्।
काश्यां चकास्ति नितरां, प्रथते तथास्याः
पत्रेषु हर्षजननी नमनीयवार्ता।।१५।।

# १५. राष्ट्रम्

यस्यानिशं समुपलभ्य सहायतांशं
शक्रोऽपि दुर्मदरिपून्दमयाञ्चकार।
अद्यात्मनोऽपि परिरक्षणमाप्तुमन्यान्
देशान् समाश्रयति हन्त! तदेव राष्ट्रम्।।१।।

आकांक्षितादिनिवहप्रतिपादनेन
यत्कल्पपादपमपि प्रसभं व्यजेष्ट।
हस्तौ प्रसारयति सर्वपुरः क्षुधार्तं
सम्प्राप्तुमन्नमपि हन्त! तदेव राष्ट्रम्।।२।।

आसीदलभ्यगुणगुम्फितरत्नमाला-
माधाय वक्षसि यदर्चितपादमन्यैः।
धन्यस्य धान्यपरिवर्धितवैभवस्य
नास्यार्हणेऽधिकृतमस्ति तदेव राष्ट्रम्।।३।।

# १६. गणतन्त्रम्

दुर्नीतिरीतिपरिपालनबद्धकक्ष्ये
दर्पान्धवन्ध्यकरुणे प्रबलेऽपि राष्ट्रे।
चक्षुर्निमील्य निजदेशविकाशमीप्सन्
अभ्यागतोऽद्य गणतन्त्रमहोत्सवोऽयम्।।१।।

# १७. मुक्तिवाहिनी

महाद्रिकल्पमुल्लसत्पिशाचमण्डलोपमं
प्रचण्डमुग्रबाहुदण्डमन्तकप्रियं परम्।
तरङ्गरिङ्गणक्रमैरुदग्रसञ्चरत्स्वरै-
रमज्जयज्जवेन विभ्रमेण मुक्तिवाहिनी।।१।।

दुरन्तशस्त्रसङ्कुलोल्लसत्करैश्चलत्पदै-
रपारपाकसैनिकैर्निरस्त्रबङ्ग-नाशकैः ।
नितान्तमर्दितां महीमचीचयत्स्वजीवनैः
पराभियानरोधनैर्मुजीबमुक्तिवाहिनी ।।२।।

स्वतन्त्रानुरागरक्तमानसोच्छलद्रसैः
सुवर्णबङ्गभूमिमानरक्षणे दृढव्रतैः।
वसुव्ययैरसुव्यैरपि प्रमत्तयौवनै-
र्नवाभिमन्युसैनिकै रराज मुक्तिवाहिनी ।।३।।

अलज्जराक्षसाधमैर्विलोभितापि पूर्णतो
विभीषितापि मर्दितापि नो जहौ निजव्रतम् ।
जयेन्दिराभिनन्दिता प्रशस्तलोकवन्दिता
गृहीतसत्पथा बभौ सतीव मुक्तिवाहिनी।।४।।

शिवशक्तिपदाम्भोजमकरन्दसुधारता ।
भुक्तिमुक्तिदयाभक्त्या विजिता मुक्तिवाहिनी ।।५।।

करालकलिकालस्य प्रबलेन बलेन सा ।
सर्वत्रालोड्यते नित्यमनाथा मुक्तिवाहिनी। ।६।।

या पोषिता पुरा पुण्यैर्जनैः प्राणार्पणैरपि।
कामं विघटिता सैव साम्प्रतं मुक्तिवाहिनी।।७।।

किं करिष्यन्ति दुर्वृत्तदावानलशिखात्विषः।
स्यन्दते यदि सन्तापनाशिनी मुक्तिवाहिनी।।८।।

# १८. राजते राजनीतिः

यदपि कुटिलकालातङ्कनिष्क्रान्तलक्ष्मीः
क्षपितविरुदमानो नाद्य राजैव कश्चित्।
न च दलितजनानामुन्निनीषेति नीति-
स्तदपि जगति काचिद् राजते राजनीतिः।।१।।

असुलभसुखभोगासक्तचित्तः प्रशास्ता
जनधनमपहर्त्तुं यत्तनोति व्यलीकम्।
तदिह भरतभूमौ स्वार्थसम्पादयित्री
खलविभवसवित्री राजते राजनीतिः।।२।।

सपदि न गणनीया योग्यता काचिदास्ते
शुभगुणमणिमाला नाधिकण्ठं चकास्ति।
प्रतिदिशमभिलाषान् पूरयन्तीव पुंसा-
मधिभुवनमिदानीं राजते राजनीतिः।।३।।

व्यवहरति न नीतिं दैन्यसैन्यं निहन्तुं
स्मरति न जनतायास्तापनाशाय योगम्।
निजविजयसमृद्धेरिन्दिराकामराजो-
भयकुशलकलाया राजत राजनीतिः।।४।।

क्षपयितुमतितीव्रं मात्स्यवृत्तिं जनाना-
मिह जगति कृताभूद्दण्डनीतेर्व्यवस्था।
सपदि सकलबङ्गेषूग्रभङ्गप्रवृत्ते-
रभिनय इव मञ्चे राजते राजनीतिः।।५।।

व्यथितहृदयशान्तेः स्यान्न वा स्यात् प्रबोधः
परमतिसुविधाया आसनं मेऽस्तु सुस्थम्।
इति मनसि समीहां रक्षतां दक्षतायाः
प्रकटितबहुरूपा राजते राजनीतिः।।६।।

शिथिलितपरिवारस्नेहबन्धाद् गृहेषु
क्षतविनयविभूत्या भारतीमन्दिरेषु।
मनसि वचसि कार्ये भिन्नतायाः प्रसारात्
प्रतिदिवसमिदानीं राजते राजनीतिः।।७।।

सेवाभावो गलितविभवः शासनस्याधिकारात्
सौहार्दं तु व्यपगतमितश्छद्मतायाः प्रसारात्।
नैवाचारो रुचिररुचिरो धर्मनीतिर्न मान्या
राजन्यानां तदिह जयिनी राजते राजनीतिः।।८।।

प्रीतिः कौटुम्बिकी क्व, क्व विगतविभवे श्रीमतां स्निग्धदृष्टिः
प्राचार्येषु क्व भक्तिः क्व च विनयधनाधानयत्नप्रसक्तिः।
विद्यागारे क्व शान्तिः, क्व तरुणनिवहे पूर्णसन्तोषवृत्ति-
र्वैपुल्यं विप्लवानां जगति यदि जवाद् राजते राजनीतिः।।९।।

सङ्कल्पः स्वार्थमूलः, परिजनविभवोत्कर्षकार्येऽनुरक्ति-
र्नानुष्ठानं जनानां महितहितविधिप्राप्तये निर्व्यलीकम्।
सङ्घानामङ्गभङ्गे प्रवचनपटुता, लोककल्याणवार्त्ता-
वार्तास्वेव प्रसक्ता जनमनसि ततो राजते राजनीतिः।।१०।।

# १९.ग्रीष्मः

ग्रीष्मर्तुमध्यदिवसेऽपि सहस्त्ररश्मिः
कृत्यं नयस्य विनियन्तुमभूत् समर्थः ।
सोद्यानपालकथमद्य शुभेऽपि काले
त्यक्तक्रियः प्रियतमोपवनं जहासि? [१]।।१।।

आनीय नन्दनवनादधिरोपिता या
वल्ली स्वजीवनरसैरभिषेचितापि ।
सा शुष्यतीव सलिलार्द्रधरातलेऽपि
तत्कारणं मृगयितुं यतसे कुतो न? ।।२।।

नाप्तो यदा निजपरिश्रममूल्यलाभः
शश्वत्तदा समुचिताचरणं विधाय ।
पुष्पैः फलैः किसलयैर्ललितैः समृद्ध-
मुद्यानमारचयति स्म भवान् भवेऽस्मिन् ।।३।।

किन्त्वद्य सर्वविधसौख्यसमृद्धिपूरे
दूरीकृते स्वपरितापकरे विषादे ।
अर्थागमेऽपि जठरज्वलनेऽपि शान्ते
किं सुन्दरोपवनरक्षणसक्षणो नो? ।।४।।

# २०.जलधरावाहनम्

वर्ष सहर्षं नवं जीवनं जलधर! तप्तधरायाम् ।।
दिशि दिशि वहत्यभिनवा वात्या
यत्र विह्वलो जनो जगत्याः ।
चण्डांशुस्तापयति नितान्तं
यतो भूतलं नितरां क्लान्तम् ।।
रसा नीरसाऽभवत्ततः शुष्यन्ति दलानि लतायाम् ।।१।।

---

*१. पाठान्तरः नश्यत् प्रियोपवनमुज्झितमीक्षसे त्वम्।*

प्राप्य शीतलं स्वच्छं सलिलं
त्यजति कर्षको मानसकलिलम् ।
नृत्यति मुदा कलापिकलापः
प्रसरति कोकिलकण्ठालापः ।।
तव स्वागतं गायन्तु प्रमदा मुदिता दोलायाम् ।।२।।

दृशं नाशयति यस्य क्षीरं
कुरुतमर्कमपत्रमधीरम् ।
बीजमङ्कुरय सुखलतिकायाः
वितरतु येन जनो वसुधायाः ।।
नवं सौरभं भवतु सुमनसां चिरसभ्यता रसायाम् ।।३।।

शोषणशक्तिर्यातु विनाशम्
दलितं सुमनो व्रजतु विकासम् ।
विकसितहेमम्भोजैस्तूर्णम्
जनमानसं भवतु परिपूर्णम् ।।
भवतु मङ्गलं स्फुरतु नन्दनं नित्यं जनमुदितायाम् ।।४।।

# २१. कृष्णमेघः

शमयितुमिव तीव्रं लोकसन्तापजातं
मदयितुमिव मित्रं नीलकण्ठं समुत्कम्।
पुलकयितुमिवान्तर्मेदिनीं मोदमानां
जनयितुमिव हर्षं सङ्गतः कृष्णमेघः।।१।।

वियति विततताप भूतले चाग्निकल्पे
सरसि रसविहीने व्याकुले सर्वलोके।
नवरसपरिपूर्णो विद्युदालिङ्गिताङ्गः
स्फुरति नभसि कश्चिन्नूतनः कृष्णमेघः।।२।।

लीलावत्यो नवयुवतयो गौरभासा, हिमांशो-
र्ज्योत्स्नाः स्वच्छाः कुमुदविपिनश्वेतलक्ष्म्या सरांसि ।

शुभ्रैः श्रृङ्गैर्हिमगिरिशिरः सम्पदो भान्ति भव्याः
सर्वं शुक्लं प्रियमभिमतः केवलं कृष्णमेघः ।।३।।

उद्दण्डचण्डकरपीतरसारसस्य
पङ्क्तीकृतार्यजनशोषितमानसस्य ।
दुःशासनस्य महसः प्रशमाय कश्चिन्-
मोदाय तप्तजगतोऽजनि कृष्णमेघः ।।४।।

सत्कार्मुको जनितमन्मथबालकेलि-
र्योगिप्रमोदजननः परिपूरिताशः ।
आनर्तितः स्वचरितार्चितनीलकण्ठः
किं त्वां विडम्बयति भूरि न कृष्ण! मेघः ।।५।।

आरुह्य मारुतरथं विहरन् दिगन्ते-
ष्वङ्के निधाय दयितां चपलां स्फुरन्तीम् ।
वर्षन् नितान्तममृतं मधुरं च गायन्
लोकार्चितो वियति नन्दति कृष्णमेघः।।६।।

कस्तूरिकातिलक एष दिगङ्गनानां
व्योमश्रियः कुटिलकुन्तलतामुपेतः ।
उत्कण्ठिकर्षकवधूनयनाञ्जनाभो
भव्यागमो नभसि दीव्यति कृष्णमेघः ।।७।।

मानग्रहं समदमानवतीजनस्य
चण्डस्य चण्डमहसोऽप्युपतापदर्पम् ।
शुष्यन्मुखस्य बतचातकपोतकस्य
तृष्णां क्षणेन परिकृन्तति कृष्णमेघः ।।८।।

# २२. मेघमाला

परं दुस्सहोदग्रकंसादिचण्डप्रतापार्कतेजोऽपहा मेघमाला।
चिरं देवकीदीव्यदङ्काम्बरे विद्युदुल्लासिता शातयेन्मेऽघमालाम्।।१।।

यामम्बु पञ्चषकणानपि याचमानस्त्वं निर्निमेषनयनप्रसमीक्षसे खे।
सा ते समर्पयति जीवनबिन्दुमद्धा श्रद्धान्विताय किमु चातक मेघमाला।।२।।

चण्डांशुतीव्रकरतापनिपीतहर्षामप्राप्त-वारिवरसीकरवृद्धतृष्णाम्।
शुष्यत्सुजीवनरसामधुना रसां द्राक् सम्यग्रसां वितनुतामिह मेघमाला।।३।।

रविहृतवसनायाः पांशुलाया अवन्या
नवहरितदुकूलैरङ्गमाच्छादयन्ती ।
स्फुटकुटकदम्बामोदमापादयन्ती
प्रियललितसखीवाभ्युद्गता मेघमाला ।।४।।

📖

# २३. वारिवाहः

उष्णांशुशोषितरसा विरसा रसा द्राक्
श्यामं नवं घनमुदीक्ष्य चिरादुपेतम्।
रोमाञ्चकञ्चुकवतीवयतोऽस्ति तस्मात्
तां संस्करोति हरितामिह वारिवाहः।।१।।

भाति प्रचण्डकिरणोऽथ रजस्वलां तां
सन्तापयन् वसुमतीमपि शुष्ककायाम्।
कर्त्तुं प्रशान्तमिव दुर्ललितं तमुग्रं
व्योमाङ्गणे विशति सम्प्रति वारिवाहः।।२।।

किं गर्जसि, स्फुरसि, नृत्यसि चाम्बरस्थः
सम्भावयन्नमृतगर्भतया स्वमुच्चम्।
भूदेवतास्नपनकर्मणि संनियुक्त-
स्त्वं किङ्करोऽसि चरमो ननु वारिवाहः।।३।।

त्वय्यागते वियति नन्दतु केकिवृन्दं
गायन्तु हर्षभरकर्षकगेहलक्ष्म्यः ।
प्राणाः प्रयान्ति विकला वियुजां परन्तु
सत्यं ततो भवसि तत्र न वारिवाहः ।।४।।

आच्छादयत्यमलमित्रमपि प्रसह्य
ध्वान्तं विवर्धयति, वारयति प्रभां च ।
उन्मादयत्यतितरामिह निम्नगाश्चेत्
तस्मान्नितान्तमलिनोऽटति वारिवाहः ।।५।।

आशाङ्गनाललितविभ्रमकल्पनायां
कस्तूरिकातिलकमण्डनतामुपेतः ।
आकाशपद्मनिलयाननसौम्यलक्ष्म्याः
केशोऽस्ति कृष्णवपुषाञ्चितवारिवाहः ।।६।।

भूमिश्रियो मरकताभरणाञ्चिताया-
श्छायासमाहरणकौतुकितातपत्रम् ।
प्रीतिप्रदो मदिरकेकिकुलस्य शश्वन्
नीलाचलो वियति राजति वारिवाहः ।।७।।

नैदाघतापपरिवर्धितवारितृष्णे
चेच्चातके क्षिपति नाम्बुपृषन्ति रक्ते।
पात्रीकृतस्तदिह हन्त, कदर्यतायाः
सर्वात्मना समुदितोऽपि स वारिवाहः।।८।।

# २४.घनं प्रति

यत्त्वं विषं वमसि, पुष्यति निम्नगा त्वत्,
यन्मित्रमण्डलमपि स्थगयस्युदारम् ।
यच्चञ्चलां श्रयसि यच्च वियोगिनोऽसि
तच्चातकावनपरस्य न दूषणं ते ।।१।।

शक्रप्रियोऽपि महिषप्रमदप्रदोऽसि
कृष्णोऽपि निर्मलजलोज्ज्वलितान्तरङ्गः ।
पान्थान् विपोथयसि जीवनदोऽपि यस्मात्
पर्जन्य, कोऽन्य इह ते तुलनामुपैति ।।२।।

अर्कस्य मर्षयसि हर्षनवाङ्कुरं चेत्
न प्रावृषेण्य निजपोषणकारिणोऽपि ।
तन्मौक्तिकाभसलिलस्य समर्पणेऽपि
देहे नवे धवलता लवतो न तेऽस्ति ।।३।।

सर्वं सहासहनशक्तिहृदुग्रतापं
संप्लावयन्नमृतवर्षणलीलयैव ।
यो जीवनार्पणपरोऽप्यवतीह सर्वान्
सोऽयं घनो न सहते किमु विप्रयोगम् ।।४।।

व्योमामितं सपदि मातुमिवाशुगस्य
वाहस्य पृष्ठमधिरूढतनुः पयोदः ।
उद्घुष्यतीव परिमाणमिवाम्बरस्य
यद्गर्जितं वदति मुग्धतयाऽद्य लोकः ।।५।।

श्यामोऽपि शीतलयति स्फुटमेव तीव्र-
...मिलां विमलजीवनदानवृत्त्या ।
पुण्यस्य तस्य परिपाकवशादुपैति
किं वार्धके धवलता वपुषो घनस्य ।।६।।

अङ्के निधाय चपलांदयितां स्फुरन्तीं
स्मेरानने किमपि गायति वारिवाहे।
सद्यो मही पुलकितेव महीयतेऽद्य
प्रोद्यत्तृणाङ्कुरमिषेण महीयमाना।।७।।

आशावधून्नतपयोधरमण्डलस्य
विद्युच्छटोच्छलितमौक्तिकदामदीप्तिः ।
कस्यान्तरेऽङ्कुरयति प्रसभं न कामः
कन्दं द्रुतं नयननन्दसमर्पणेन।।८।।

स्वप्रेयसीमिव धरां हरिताम्बरेण
भ्राजत्तनुं जलद! नीपसुमावतंसाम्।
सन्दर्शयन् मुदितकेकिकुलैकलास्य-
मास्यं प्रमोदमधुरं कुरुषे प्रियायाः।।९।।

सौदामिनीललितकेलिकुतूहलेषु
सक्तं विलोक्य धरणीरमणी भवन्तम्।
कामातुरेव पुलकावलिभासमाना
द्राक् पिच्छिला भवति केनचिदुत्सवेन।।१०।।

हर्षाङ्कुरोत्करकरोऽवनिमण्डलस्य
चण्डस्य चण्डमहसः प्रशमैकहेतुः।
दिङ्नायिकानयनयोरसि कज्जलं त्वं
भूषाम्बरस्य शरणं घन! चातकस्य।।११।।

उल्लासभूमिरखिलस्य कृषीवलस्य
लोकोत्तरोत्सवकरश्च शिखावलस्य।
प्रस्थानहेतुरयुजश्चरमोत्सुकस्य
भूतिप्रदोऽसि सरितो हरितः प्रियोऽसि।।१२।।

दोषा विभान्ति भवतो घन! साहचर्याद्
...... प्रियाभिमतमुत्कतया चरन्ति।
घोषा मयूरकुलमुन्मदयन्ति कामं
प्लोषाः प्रयान्ति विपिनस्य शमं समन्तात्।।१३।।

मित्रप्रतापशमनं तिमिरप्रकर्ष-
सम्पादनं हिमकरावरणं सुनीलम्।
त्वामुन्नतं समवलोक्य पयोधर! द्राक्
खद्योत एव निशि दीव्यति दिव्यदीप्तिः।।१४।।

सर्वेषु सद्‌गुणगणेषु विराजितेष्व-
प्येकं वियोगिजनमारणदूषणं ते।
मुक्तोत्करं विकिरतोऽपि वदान्यमान्य!
श्यामात्मता न मुखतः कथमप्यपैति।।१५।।

उत्सारयस्यथ सरोवरतो मरालं
मार्गञ्च कर्दमयसि प्रसभं सुगम्यम्।
भेकस्य कण्ठरवमुत्प्लवनञ्च धत्से
स्वच्छं जलं च मलिनं घन! सन्तनोषि।।१६।।

यां दक्षिणां पिशुनकोकिलवाक्यसारः
सूरोऽञ्जसा परिविहाय गतोऽतिदूरम्।
तस्यां भृशं विदधती पुनरुत्सुकं तं
प्रावृट् तदन्तिकगमाय समादिदेश।।१७।।

## २५. गन्धवाहः

न भवति हृदि यस्य क्वाप्यनन्यानुराग-
स्त्यजति यमिह नैव प्राणबाधोद्‌गमेऽपि।
सपदि जगति नैवं दृश्यते कोऽपि बन्धु-
स्त्ववसरसुहृदेको राजते गन्धवाहः।।१।।

यदपि पयसि मग्ना पङ्कमध्ये स्थितापि
प्रियतममुखमेवालोकसे पद्मिनि! त्वम्।
परमकृतविशेषाञ्चञ्चलश्चञ्चरीकः
सततगतिमयस्ते वल्लभो गन्धवाहः।।२।।

ललितगुणविहीनः स्पर्शमात्रैकगम्यो
भुजगनिवहभक्ष्यो गत्वरः सर्वदैव।
पतदिव तरुकायात् पातयन् पीतपर्णं
वहति तदपि गन्धं दुर्वहं गन्धवाहः।।३।।

सुरभिमसुरभिं वा योऽन्यसंसर्गमात्राद्
वहति, चरति नित्यं पुष्पवत्यां विहारम्।
मधुकरकुलमङ्कात् पातयन् वल्लरीणां
तदपि बुधवरेण्यैः सोऽर्च्यते गन्धवाहः।।४।।

वल्लीं वियोगविधुरां शिशिरे शयानां
म्लानाननां मलिनजीर्णदलावलग्नाम्।
तैस्तैर्विलासविभवैः परिरम्भमुग्धा-
मामोदयत्युपगतः प्रियगन्धवाहः।।५।।

स्निग्धे चिरादुपगते कुसुमाकरेऽपि
तावन्न मुञ्चति शुचं विपिनान्तलक्ष्मीः।
यावन्न केलिकुशलः स्मितशालिवल्ली-
माश्लिष्य नर्तयति दक्षिणगन्धवाहः।।६।।

मुखं परावृत्य सखीमुदीची-
माचुम्बितुं प्रस्थित एव भानौ
त्यत्वाऽङ्कपालीमपि दक्षिणस्या
मन्दं तदा समागच्छति गन्धवाहः ।।७।

# २६.वाताः

विज्ञैर्जगत्प्राणतया प्रतीताः प्राणान् हरन्त्यल्पबलस्य जन्तोः ।
हिमस्य पातात् तु हिमाचलान्ते तुषारसंसर्गतयाऽद्य वाताः ।।१।।

कुर्वन्तस्त्रस्तचित्ताननुपदमतुलं वेपमानान् दरिद्रान्
वृद्धान् पर्याप्तवस्त्रानपि निशि शयितानाशु सङ्कोचयन्तः ।
अस्थ्नामन्तर्विभेदं जनयितुमुदितास्तीक्ष्णबाणाग्रकल्पा
अल्पप्राणान् परेतान् विदधति नितरां हन्त! हेमन्तवाताः ।।२।।

प्रालेयाद्रेः पुरस्तादपहृततुहिना निर्भरं पीनपीना
दीनानां भाग्यदोषादुपचितविभवा जाड्यतो जातदोषाः ।
अद्यत्वे सापराधानपि निजदयितान् प्रत्यनाक्रोशभाजो
वाता वा ता रजन्यो युवतिजनहृदो मानमुत्सारयन्ति ।।३।।

साम्यादसीममुदितामुपपादयन्ति
ये प्रत्यहं सकलसौख्यनिदानभूमिम्।
उत्पाद्य रोगनिवहान् विषमास्त एव
व्यापादयन्ति मनुजान् कफपित्तवाताः।।४।।

उद्दामविभ्रमवशान्नितरामसार-
वस्तून्यवन्यममितान्यपि नर्तयन्ति।
उत्कम्पयन्ति,१ रजसा परिपूरयन्ति
वामा इवाक्षियुगलं सुदृशोऽपि वाताः।।५।।

# २७.पूर्णचन्द्रः

ह्रासे विकासं, तिमिरे प्रकाशं चण्डातपे नूतनमेघमालाम्।
दुःखे सुखं, संहरणे च सृष्टिं निवेदयत्येष न पूर्णचन्द्रः?।।१।।

अङ्के कलङ्कं कलयन् कलाभिः समं समन्तादभिरामरूपः।
भूपो द्विजानां नवनीतपिण्डो नीलाम्बरे राजति पूर्णचन्द्रः।।२।।

अनुदिनमविरामं कर्म सम्पादकानां
सकृदधिकरकञ्जं वेतनं मासि लभ्यम्।
क्षयसमुदयभावं भावयन् पक्षयुग्मे
शमयति परितापं दैन्यजं पूर्णचन्द्रः।।३।।

आमोदयन् कुमुदिनीमपनीततन्द्रो
विश्लेषयन्नथ रथाङ्गमपेतनिद्रः।

आपूरयन् परमया रमयाऽम्बरस्य
नीलाकृतिं विजयते परिपूर्णचन्द्रः।।४।।

क्षिप्रोऽपि हन्त, शिरसः परमेश्वरेण
जाग्रत्कलङ्ककलयाति विलेपितोऽपि।
राहोः करालदशनेन विचूर्णितोऽपि
दोषाकरो वियति हृष्यति पूर्णचन्द्रः।।५।।

न्यासान्नृणां चरणयोर्द्विजराजता तु
लुप्ता नु किं गुरुपराभव पापहेतोः।
वैज्ञानिकैरसकृदाक्रमणेन सद्यो
व्यर्थीकृतो जगति सम्प्रति पूर्णचन्द्रः।।६।।

तापं निवारयति, शीतलतां तनोति,
ध्वान्तं निहन्ति, नयनोत्सवमादधाति।
नीलाम्बराञ्चलमलङ्कुरुते, धरित्रीं
दुग्धेन च स्नपयतीव स पूर्णचन्द्रः।।७।।

दारिद्र्यमुद्रितसमग्रमनोरथानां
राज्याधिकारहरणोद्यतशात्रवाणाम् ।
सन्त्रासकातरहृदा वियुजां च चित्तं
नैव प्रसादयितुमर्हति पूर्णचन्द्रः।।८।।

# २८.चन्द्रः प्रवालप्रभः

मन्दारद्रुममञ्जरीविरचितस्त्रग्दामभिर्मण्डिते
सामोदे मणिदीपपीततिमिरे श्रीधाम्नि केलीगृहे ।
शम्भोर्मन्मथमेदुराध्वरसमारम्भेऽभवत् पार्वती-
पादालक्तकलिप्तगात्रविभवश्चन्द्रः प्रवालप्रभः ।।१।।

सिन्दूरैरनुलेपिते तिलकिते काश्मीरजैः कुङ्कुमै-
र्माल्यैर्मञ्जुजपाप्रसूनरचितै रक्तोत्पलैरर्चिते ।
शोणक्षौमविनिर्मिताम्बरवृते भक्तानुरक्ते परे
देवे श्रीमति ऋद्धिसिद्धिरमणे चन्द्रः प्रवालप्रभः ।।२।।

दग्ध्वा व्योमवसुन्धराङ्गसुषमां हृत्वेन्दुताराश्रियं
पीत्वा हन्त कुमुद्वतीप्रमुदितामस्तङ्गते भास्करे ।
नृत्यन्त्याः क्षितिजेऽथ गीतरसिकानालापयन्त्या द्विजान्
सन्ध्याया नवसङ्गमात् समुदितश्चन्द्रः प्रवालप्रभः ।।३।।

अन्यालिङ्गनलक्ष्म वक्षसि किमप्यालक्ष्य दन्तच्छदे
लग्नं कज्जलमाकलय्य विरसं वीक्ष्य प्रियस्यान्तरम् ।
जातेऽलक्तकलोहिते सुनयने गण्डे च रक्तोत्पले
मानिन्याः समभून्मृणालधवलश्चन्द्रः प्रवालप्रभः ।।४।।

स्निग्धं बन्धुजनं प्रसादमधुरः प्रह्लादनो मादनः
पूर्वं यः स्मितचन्द्रिकामृतझरैरानन्दयन् राजते ।
सोऽयं सागसि वल्लभे मृगदृशः शोणद्युतेरुद्गमात्
सञ्जातो नवनीतनिर्मलरुचिश्चन्द्रः प्रवालप्रभः ।।५।।

शुक्ले शुक्लयशोऽवतंसितजगज्जाले प्रतापानलो-
द्भासा भास्वरकेसरद्युतिमयो जातः प्रपञ्चोऽधुना ।
सर्वेषामनुरञ्जितं सुमनसामन्तर्निसर्गोज्ज्वलं
शम्भोर्भालविभूषणं च समभूच्चन्द्रः प्रवालप्रभः ।।६।।

📖

# २९.कौमुदी

शब्दागमे महप्राये भ्रमतां सतृषामपि ।
जीवनालम्बनी लोके द्योतते काऽपि कौमुदी।।१।।

जलधरस्य जलैरभिषेचितां दिनकरस्य करैरतिभूषिताम्।
विटपिनां सुमनोभिरलङ्कृतां वसुमतीमभिनन्दति कौमुदी।।२।।

बहुविधैः कुसुमैर्नवपल्लवैर्द्विजगणैर्मधुरस्वरमेदुरैः।
श्रियमुपैति न तां तु वसुन्धरा शरदि यां तनुते शशिकौमुदी।।३।।

लयं गते वारिधरेऽतिनिर्मलनभो विताने, लसिते च कानने।
कलिन्दजाकूलतले विहारिणी विराजते श्यामघनाङ्गकौमुदी।।४।।

सुधामुचं वाचमचिन्त्यवैभवा मुदार्पयन्तीव चकोरके द्विजे।
तदीयसत्कीर्त्तिविभानुलेपनाद् भुवं विभूत्या तनुतेऽथ कौमुदी।।५।।

# ३०.वसुन्धरा

समुत्थिता मानवता-लता यतः
समुद्गता दुर्लभसभ्यताऽसमा ।
प्रसारिता विश्व-जनीन-बन्धुता
विभासते सा भुवनेवसुन्धरा ।।१।।

पयोधरो विन्ध्यहिमालयौ कचा
वनानि रत्नाकर एव मेखला ।
स्फुरन्ति यस्या मलयानिलोऽसवो
जगन्नमस्या भुवि सा वसुन्धरा ।।२।।

# ३१.मञ्जरी

मलयमारुतसङ्गमनन्दिता
नवरसालवनी जयति श्रिया ।
लसति यत्र मिलिन्दकुलाञ्चिता
पिकनुता मधुमन्दिरमञ्जरी ।।१।।

मधुपमण्डलमुन्मदयन्त्यलं
मुखरयन्त्यतुलं कलकोकिलम् ।
सुरभयन्त्यनिलं विपिनस्थले
लसति काचन मञ्जुलमञ्जरी ।।२।।

नहि परागमरन्दकरम्बिता
न मधुपेन विलासकलाञ्चिता ।
लसति किन्तु वसन्तसमागमे
मधुमतीव नवा मृदुमञ्जरी ।।३।।

नवे द्रुमे मारकतश्रियाञ्चिते
चिरन्तने पत्रचयेऽपि सङ्गता ।
वसन्तवाताङ्कगतेव मञ्जुला
विराजतीयं सहकारमञ्जरी ।।४।।

द्विजाङ्गनानां कलगीतनिस्वनै-
र्वसन्तलक्ष्मीपरिरम्भविभ्रमैः ।
पुरातनानामपि जीर्णशाखिनां
तनोति तारुण्यसुखानि मञ्जरी।।५।।

प्रमोदिताशेषरसज्ञमण्डली
मधुद्रवामोदसुवासितानिला ।
प्रियोऽवतंसो वनदेवताश्रुते-
र्विभाति लावण्यलवङ्गमञ्जरी।।६।।

प्रियेण सोत्कण्ठमुदीक्षिते भृशं
त्रपाकुलाया जयतीव केलिभिः।
परस्परालोकनजातसम्भ्रमात्
स्मितप्रभोद्भासितकर्णमञ्जरी ।।७।।

वन्धान् बन्धुरगन्धवन्धुविसरैराहूय दिग्व्यापिनो
भृङ्गानात्ममरन्दविन्दुममृतं सम्पाययन्त मुदा।
ङ्कसाफल्यं वनवासिनामपि भृशं भूमिरुहां तन्वती
संबध्नाति मनो मनोहरदृशामौधानिको मञ्जरी।।८।।

तावत्तां परितश्चरन्ति सुहृदो गुञ्जन्त एवालयः
शाखायां निवसन्ति तत्पितुरिमे भूमीरुहः कोकिलाः।
यावद्यच्छति निर्भरं मधु मुदा दत्ते शुभं सौरभं
सानन्दं मलयानिलेऽभ्युपगते नृत्यत्यलं मञ्जरी।।९।।

विन्यस्ता सुरभारतीश्रवणयोः, सौन्दर्यलीलास्थली
दिव्यामोदमरन्दमेदुरमुखी कल्याणवत्कर्णिका।
पीयूषप्रतिमै रसैर्मधुलिहामाकर्षयन्ती गणं
प्रत्यग्रेव पुरातनी विजयते मन्दारसन्मञ्जरी।।१०।।

दिगन्तादागतैर्भृङ्गैर्भूषिता भासतामलम्।
विज्ञानभवनोद्याने भारती श्रुतिमञ्जरी।।११।।

# ३२.कमलिनी

सतीनां सम्मानं सततमुपलेभे पयसि या-
स्थिता शश्वत् सूर्योऽपचितिमुपचित्य प्रियतमे।
परं सा चुम्बन्तं मधुपमनिवार्य स्ववदनं
जहौ कीर्त्तिं शुभ्रां युवतिकुलनम्यां कमलिनी।।१।।

जनिस्तावत् पङ्काद् वसतिरपि नित्यं बहुजले
सुधांशुर्विद्वेष्यो मधुपनिवहोऽयं सहचरः।
प्रियो रात्रौ हित्वा प्रतिदिवसमन्यत्र रमते
तथापीयं फुल्ला प्रकटयति गन्धं कमलिनी।।२।।

प्रदिम्नो निर्यासैरसमसुषमाया रसभरैः
परामोदोत्कर्षैरथ च मकरन्दैरनुपमैः।
मिलिन्दानां पुण्यैरनिलकुलसौभाग्यविभवैः
सरोलक्ष्म्या हर्षैर्जगति रचितेयं कमलिनी।।३।।

वनान्ते राजन्ते कति न सुकुमाराः सुमनस-
स्तदीयैः सद्गन्धैर्विलसति न चाल्पः परिसरः।
परं धन्याऽवन्याः सुकृतशतजन्या निरुपमा
रमाया माङ्गल्यं कुलभवनमेषा कमलिनी।।४।।

प्रियं पद्मासद्मालिकुलविपुलोल्लासजननी
मरालीनां केलीकरणनिपुण काचन सखी।
वयस्या सारस्या दिवसनृपतेः प्राणदयिता
कवीनां सर्वस्वं जयति ललितेयं कमलिनी।।५।।

# ३३.मधुलिहाम्

लताया नृत्यन्त्या मलयपवनाश्लेषविकसत्
स्मितामोदोच्छ्वासैर्मुखरितमुखानां मदयताम्।
मुदं वर्षत्यन्तः श्रवसि रसिकानामनुपमां
सुधास्यन्दिस्फीतं मधुमधुरगीतं मधुलिहाम्।।१।।

द्विजानामुद्गीते किसलयितरागे विलसिते
वनश्रीसौभाग्यं प्रभवति समृद्धे परिमलैः।
दिगन्ते सौरभ्यच्छुरितमधुरामोदभरिते
जनानामानन्दं प्रथयति विरावो मधुलिहाम्।।२।।

निशान्ते निःशङ्कं विरुतनिरते कोकिलकुले
द्विजानां स्वाध्याये चलति मुदितानामनुपमे।
लताभिः फुल्लाभिर्विकसति विलासे तु मरुतो
विलीना सा केलिः शयितनलिनीभिर्मधुलिहाम्।।३।।

# ३४.सौरभम्

वल्लीनां सुकुमारपल्लवदलं भृङ्गं तथा नाञ्चति
श्लेषान्नो मलयानिलस्य ललितो नृत्यस्य वा विभ्रमः।
धन्यं गन्धवहं सुबन्धुमधिकीकृत्यात्मनो वैभवात्
सामोदं कुरुते यथा सुमनसां लोकोत्तरं सौरभम्।।१।।

शास्त्रव्रातमहावनेषु चरतां श्रान्तिं तु नैसर्गिकीं
दूरीकर्त्तुमुपास्यते सुकविता मुग्धस्मिता वल्लरी।
यद्वर्णावलिसुप्रसूनविसरत्सौरस्यसारो विदां
स्वान्तं वासयति स्वभावसुभगं पुष्पोद्भवं सौरभम्।।२।।

ललितवीचिविजृम्भितवैभवा
न सरसी सरसं कुरुते तथा।
मदयतीह यथा विपिनान्तरे
सुरभिमाससमुद्भवसौरभम् ।।३।।

न कुरुते कमला खगवाहिनी
सुमनसां वदनं मुदितं तथा।
सहृदयालिकुलप्रणतं यथा
सुकवितापदपङ्कजसौरभम् ।।४।।

# ३५.सुमनसाम्

सवित्री सिद्धीनां श्रवणपुटपेया भुविसुधा
पवित्रं चारित्र्यं किमपि जनयन्ती त्रिभुवने।
सदा भुक्तिं मुक्तिं युगपदुपहर्त्तुं समरसा
पुराणी वाणीयं जयति वसुधायां सुमनसाम्।।१।।

अलङ्कारे लक्ष्म्या मधुरमधुमासस्य महसाम्
अपूर्वैः सौन्दर्यैर्ललितसुकुमारेऽप्युपवने।

मिलिन्दानां वृन्दं चिरपरिचितास्वादविधुरं
न विन्दत्यानन्दं सपदि मकरन्दैः सुमनसाम्।।२।।

चलद्वात्याचक्रे तपति तपने मध्यगगने
समन्तादाशुष्केऽप्यखिलसरसां जीवनरसे।
वनान्तेष्वामोदं वितरति तथाप्येष ललितो
विकासो मल्लीनामद्यमयनिदाघे सुमनसाम्।।३।।

न वीराणामर्चास्वमखरपूजास्वपि च नो
न शृङ्गारे सम्यग् भवति विनियोगो मृगदृशाम्।
इदानीमुद्यानं विविधविधवर्णेन सुभगं
विधातुं सार्थक्यं गणयति विदग्धः सुमनसाम्।।४।।

निदाघज्वालाभिः कवलितविलासेऽप्यनुपमं
सुभव्यं सौरभ्यं यदिह गतवन्नैव विलयम्।
तदेवास्यां प्रावृष्यमितजललाभैर्विदलितं
विलोके लोकेऽस्मिन् विलुलितलतानां सुमनसाम्।।५।।

प्रयातं स्वारस्यं मधुकरकुलानन्दजननं
विलीनं सौगन्ध्यं विशदमहदामोदमधुरम्।
लसन्तीमुद्याने मलयपवनाङ्के स्मितमुखी-
मिदानीं पश्यामः क्रमकलितपङ्क्तिं सुमनसाम्।।६।।

अपूर्वं सद्वस्तु स्फुरितगुणमौचित्यरुचिरं
परिस्पन्दीभूतं किमपि वचसां जीवितफलम्।
सुधीन्द्राणां चित्तद्रवजनिमसारस्वतरसै-
र्नवीनं निर्माणं भणति महिमानं सुमनसाम्।।७।।

# ३६.वैश्वानरः शीतति

औचित्याद् विमुखस्य केवलमहाहङ्कारवश्यात्मनः
क्रोधावेशवशाद् हिरण्यकशिपोर्दत्ताज्ञयाग्निस्पृशः।
रामे रक्तहृदः सदा व्यपगतत्रासस्य भक्तेशितुः
प्रह्लादस्य कृते नितान्तजटिलो वैश्वानरः शीतति।।१।।

पत्युर्जीवितमेव जीवितमिति स्वान्ते निवेश्यादराद्
या जीवन्ति तथा मुदानु मरणात्तस्य म्रियन्तेऽङ्गनाः।
तासां वीरमहाव्रतादपि महत् तीव्रं तपो दुश्चरं
कृत्वा प्राणविसर्जनप्रणयतो वैश्वानरः शीतति।।२।।

दृप्यद्वैरिभटोत्कटामपि घटां संघट्टयन् पाटवात्
प्रालेयाचलतुङ्गशृङ्गसविधे नेफादिके दुर्गमे।
अस्मद्भारतदेशसैनिकगणोऽजैषीत् पराँस्ताँस्तदा
शैत्याधिक्यवशाद् यदातिजटिलो वैश्वानरः शीतति।।३।।

अत्यन्तं द्रुतमम्बु संविदधती प्रायः शिलासन्ततिं
हेमन्तान्तदिनेषु शीतलहरी सञ्चारिणी सन्ततम्।
अल्पप्राणवती निहन्ति विफलो यत्नस्तदा जायते
तूलस्यास्ति कथैव का यदि दहन् वैश्वानरः शीतति।।४।।

लङ्कायामपराङ्गनापहरणप्रीतस्य रक्षः पते-
रुद्याने वसतिं विधाय समनुप्राप्ता चिरान्मैथिली।
न ग्राह्येति विनिश्चये प्रकटिते रामेण पुण्यात्मना
वैदेह्या वपुषो हुतिप्रकरणे वैश्वानरः शीतति।।५।।

# ३७.तुहिनागमः

मधुसमृद्धिपुषः सरसीरुहो
दुःखलेपमलोपयदुन्नतम् ।
मधुकरानकरोच्च मुनिव्रतान्
समुदितो मुदितस्तुहिनागमः।।१।।

वसुमतीं सुमनोभिरलङ्करो-
त्यभिनवैः कनकद्युतिसार्षपैः।
नवयवाङ्कुरकल्पितशाटिका-
परिवृतां तनुते तुहिनागमः।।२।।

ललितशालिविलासिकृषीवलां
रतिविलोकमराललसज्जलाम् ।
विविधधान्यविवर्धितधन्यतां
भुवमलङ्कुरुते तुहिनागमः।।३।।

मधुरतां परिरम्भरसेऽमितां-
मनलतूलसुखे स्पृहयालुताम्।
सपदि सञ्जनयन्नथ रञ्जयन्
युवजनं भजते तुहिनागमः।।४।।

चहितुवादि निरर्थकशब्दकैः
कुकवयः कवयन्ति महोद्धताः।
सरससूक्तिषु किन्तु महाकवे-
र्मिलति किं विफलस्तुहिनागमः।।५।।

# ३८.हिमागमः

असुन्दरस्याहनि या हिमांशोः
कलां विलोक्योल्लसतीव पद्मिनी।
ततोऽतिकोपात् कुलमेव तस्या
निहन्ति तन्मित्रतया हिमागमः।।१।।

द्विजमथामृतमप्यखिलप्रियं
सरसिजं च विरूपयितुं भृशम्।
जगति मित्रमतिप्रणयास्पदं
शिखिनमातनुते च हिमागमः।।२।।

नहि धनं न सुशासनजासनं
समधिकर्त्तुमनाचरितं शुभम्।
अपनयादपयाति रसातलं
चिरसमर्जितसन्महिमागमः ।।३।।

प्रियं द्रुतं गन्तुमिवाम्बराञ्चलाज्
झटित्यकस्मादुपसंहृतश्रियम् ।
मुहुर्मुहुः प्रार्थयते सरोजिनी
निशागमे नाथ, बहिर्हि मा गमः।।४।।

# ३९.वर्षितम्

वसुन्धरा पांसुलतामुपागता
प्रतीक्षमाणा दयिता उपेक्षिताः।
न जीवनं धान्यतृणाङ्कुरेऽर्पितं
पयोधराद्यावधि यन्न वर्षितम्।।१।।

कृषीवलानां नहि नन्दिताऽऽवलि-
र्न नर्तिता मुग्धमयूरमण्डली।

न चावनिः पिच्छलिता समागमात्
ततो वृथा तेऽम्बुद वारिवर्षितम्।।२।।

अतीतशीते सहसा समुत्थिते
रणे जवाद् भारतपाकदेशयोः।
नरैरनल्पैर्निगृहीतमोचितै-
रजस्रमस्त्रं स्वजनेषु वर्षितम्।।३।।

समुज्झिताशेषसमत्वसंविदां
प्रशासकानामनुकुर्वता विधिम्।
क्वचित् प्रपूर्णां क्वचिदल्पमम्बुद,
त्वयापि वैषम्यधियैव वर्षितम्।।४।।

दिगन्तलक्ष्मीपरिरम्भसम्भव-
प्रमोदपीयूषभराञ्चितश्रिया ।
चिरात् समुत्कण्ठितचातकानने
न किञ्चिदप्यम्बुधराम्बु वर्षित्तम्।।५।।

स्वधर्मवल्लीषु मरन्दवन्दित-
प्रसूनसौगन्ध्यमवन्ध्यविभ्रमम् ।
जगन्मुदे वर्धयितुं विदम्बुदेः
सुगर्जितं भूरि न किन्तु वर्षितम्।।६।।

कठोरकारासु निरुद्धदेवकी-
प्रसूमनोव्योम्नि विवृद्धमातपम्।
निजोदयेनाशु निराकरिष्णुनो
घनेन कृष्णेन मुदम्बु वर्षितम्।।७।।

अम्भोदो जलविदुभिः कतिपयैराराधितश्चेद् भुवः
कोण कञ्चन सिञ्चतीव नहि तन्मन्यामहे वर्षितम्।
धारासारशतेन यज्जलनिधेरारभ्य शैलान्तरं
भागं प्लावयति प्रकाममनिशं तद् वर्षितं वर्षितम्।।८।।

नयननीरजकोशतिरोहितं
हृदयसन्निहितं मधुरद्रवम्।
प्रियजने सुचिरेण समागते
प्रणयिनां भवति प्रियवर्षितम्।।९।।

# ४०.शरद्

वनान्ते दूर्वाया हरितपरिधानेन सुभगां
तुषाराणां हारावलिमिव दधानां वसुमतीम्।
प्रसूनानां पुञ्जैरुषसि शरदारम्भदिवसे
प्रफुल्ला शेफाली ललितललिताभ्यर्चतितराम्।।१।।

कुमुद्वत्या हासैः, परिमलविलासैः सुमनसां,
स्फुरज्ज्योत्स्नाजालोच्छलितधवलिम्ना च पयसाम्।
द्विजानामारावैर्मधुरमधुरैः स्तोत्रनिवहै-
र्निशान्ते गायन्ती शरदवनिमामोदयति किम्?।।२।।

पयोदानां शुभ्रैर्लसति शकलैरम्बरवपुः
पयोभिश्च स्वच्छैर्वहति सुषमां कामपि धरा।
सुधांशोरुल्लासैर्धवलललितोत्फुल्लकुमुदै-
र्विजेतुं द्यौर्भूमिं दिवमपि च भूमिः प्रयतते।।३।।

नवैरन्नैर्दैन्यादवसि सकलान् कर्षकगणान्
प्रवीराणां सैन्यैररिकुलविनाशं वितनुषे।
अमर्यादं यान्तीं नियमयसि कूलेषु सरितं
धरित्री-सैरन्ध्र्या रचयसि च नेपथ्यमतुलम्।।४।।

वृतं मेघैर्मित्रं कलयसि सहस्रांशुमचिरात्
सुधास्यन्दैरिन्दोः स्नपयसि रसां पङ्कमलिनाम्।
कृतातिथ्यं प्रीत्या मदयसि नवं खञ्जनकुलं
दिशामास्ये हास्यच्छविमभिनवां त्वं प्रकुरुषे।।५।।

# ४१.शरन्नितान्तम्

उद्दामयौवनविवर्धितकाममाया-
जायां पयोधिनृपतेरपि कान्तिहीनाम्।
मर्यादया विरहितामहितां प्रजानां
सद्यो नियन्त्रयति धन्यशरन्नितान्तम्।।१।।

वर्षासु हर्षभरनिर्भरजातवेगा-
मुन्नादिनीमिव विलेपितगाढ़पङ्काम्।
कूलङ्कषामपि नियम्य विनिर्मलाङ्गीं
गाङ्गीं श्रियं वितनुतेऽद्यशरन्नितान्तम्।।२।।

सान्द्राम्बुदोन्नतघटावृतमित्रवृत्तं
ज्ञात्वा मरालकुललोपमिलाङ्गणाच्च।
श्यामं धनं द्रुतमतो विनिहन्तुकामा
सज्जीकरोति धनुरद्य शरन्नितान्तम्।।३।।

वर्षातपाद्यसहदुःखशतानि मूर्ध्ना
धृत्वाकृषीवलकुलं कृषिकर्मसक्तम्।
धान्यैः समेधयति सम्प्रति शारदीयैः
सद्यः फलार्पणपरेव शरन्नितान्तम्।।४।।

पद्मप्रसूनमकरन्दकदम्बितश्रीः
शेफालिकाकुसुमसौरभसंभृतापि ।
भानुं दिवा कुमुदबान्धवमप्यमन्दं
रात्रौ प्रसादयति किन्न शरन्नितान्तम्।।५।।

सन्तर्पयत्यथ पितॄनथ चाम्बिकायाः
पूजोत्सवं वितनुते जनहर्षहेतुम्।
लक्ष्मीं समर्चयति दीपकमालिकाभि-
रामोदयत्यथ नरं च शरन्नितान्तम्।।६।।

नीलाम्बरां कुमुदसुस्मितशोभितास्यां
कञ्जश्रियं धरणिमञ्चितखञ्जनाक्षीम्।
द्रष्टुं समुत्सुकयतीव हरिं प्रसुप्त-
मुद्‌बोधनोत्सवमिषेण शरन्नितान्तम्।।७।।

# ४२.सन्ति सन्तो वसन्तः

दुरितहिममहिम्ना जातजाड्यातिरेकान्
मृदितसुरभिसम्पन्मानसाम्भोजभाजः ।
खलनिवहसहस्त्रोदग्रकर्माभिभूताः
क्व दिशि सपदि हृष्टाः सन्ति सन्तो वसन्तः।।१।।

अनुपदपदचिन्ताः सद्गुणग्रामलुब्धा
अनुपमरमणीयानर्थसार्थान् स्मरन्तः।
अभिमतशतवामा दक्षिणासक्तचित्ताः
कवय इव महान्तः सन्ति सन्तो वसन्तः।।२।।

सूक्ष्मे तत्त्वे यदि मतिमतां नास्ति चित्तानुरक्ति-
र्नो बन्धुत्वं व्यवहृतिवशात् प्रीयते क्वापि लोके।
न श्रद्धास्ते विहितसुकृते, न प्रतीतिः प्रियेऽपि-
प्रायेणास्मिन्नहनि न ततः सन्ति सन्तो वसन्तः।।३।।

अनुदिनमभिवृद्धिं प्राप्य दुर्दान्तवर्गः
प्रशममुपगतानां हिंसया खेलतीव।
परिभवमुपयाताः साहसायत्तचित्ताद्
इह हतमहिमानः सन्ति सन्तो वसन्तः।।४।।

परहितमभिहर्तुं कूटकौटिल्यसारात्
प्रतिदिशमधुनास्ते दस्युवृत्तेः प्रवृत्तिः।
सुजननिधननीत्या धन्यतां मन्यमानै-
रिह हृतधनमानाः सन्ति सन्तो वसन्तः।।५।।

विततविभवतृष्णैर्भूरिकृष्णाभियोगै-
रनुपदभवभूतिप्राप्तयत्नप्रयोगैः ।
शकलितकलितश्रीसौमनस्यैकबन्धा
जगति गलितगन्धाः सन्ति सन्तो वसन्तः ।।६।।

सुरगिरमनुरक्ताः सादरं ये भजन्ते
विदधति पणलोभाद् विक्रयं ये न तस्याः।

नयविनयनदीष्णा आस्तिकाचार्यवर्याः
शुचिसरलहृदस्ते सन्ति सन्तो वसन्तः।।७।।

नैवाद्यत्वे पथि रतिरतिप्रीतिरप्यद्य नाद्ये
हाहाकारः प्रचयमयते केवलं चार्थसार्थे।
सुप्ता शक्तिः सहजसहजा कृत्रिमैरभ्युपायै-
र्नीता लोके मुदितमनसः सन्ति सन्तो वसन्तः।।८।।

धन्यं धन्यं सुजनहृदयं ह्लादतेऽन्यप्रसादै-
स्तोषे पोषं गतवति हतं दैन्यसैन्याभियानम्।
गर्वोऽखर्वो गलति नितरां तत्त्वबोधप्रवृत्त्या
सर्वं सुस्थं भवति भुवि चेत् सन्ति सन्तो वसन्तः।।९।।

आज्यं प्राज्यं जठरदहने प्रक्षिपन्तोऽनुरागाद्
भोगासक्त्या मधुरमधुरं प्रत्यहं ये यजन्ति।
स्थूलाकारा अशनवसन-प्रेम-मात्र-प्रसारा-
स्तीर्थे तीर्थे बृहति च मठे सन्ति सन्तो वसन्तः।।१०।।

यत्र श्रेयोऽनुरागादधिसदनमथोत्साहवन्तः स्वधर्मे
सत्कर्माराधनार्थं सततमतितमां बद्धकक्ष्या मनुष्याः।
तत्रैवाद्यानवद्या विगलिततमसः पुण्यवन्तो महान्तो
नो दृश्याः शस्यचित्तासुरुचिरचरिताः सन्ति सन्तो वसन्तः।।११।।

# ४३. हेमन्तः

आमोदमेदुरमुखीं सरसोऽधिलक्ष्मीं
मृद्वीममन्दमकरन्दकरन्विताऽङ्गीम्।
त्वं पद्मिनीं हिमकणैर्विनिपात्य हन्त!
हेमन्त, चेतसि बिभर्षि मृषाभिमानम्।।१।।

त्वं वेपयस्यतितरां स्थविरानशक्तान्
दीनान् विमर्दयसि शक्तिमतोऽप्यवस्त्रान्।

लक्ष्मीर्दुनोषि नितरां वनदेवतायाः
तत्ते बलं[१] हसति सन्निहिता हसन्ती।।२।।

जाड्यं समेधयसि संहरसि प्रकृत्या
सन्तं सरोजनिवहं तुदसीन्दुलेखाम्।
त्वं जीवनादपि पृथक्कुरुषे रसत्वं
कामं द्विजेन्द्रमहिमानमपि क्षिणोति।।३।।

शाल्यन्नमिक्षुरसमीप्सितसेव्यवस्तु
यूनामलभ्य परिरम्भसुखं युवत्याः।
त्वं प्रत्युवन्नपि शरीरमृतामुदग्रां
तापस्पृहां शमयितुं सफलत्वमेषि?।।४।।

सर्वत्र यौवमदेन हृते विवेके
जाड्यं यथा तरुणचेतसि संनिविष्टम्।
किं तस्य कामपि कलां लभते कदापि
युष्मत्प्रसादपरिवर्धिततीव्रजाड्यम्? ।।५।।

पीनां विधाय रजनीं रजनीकरस्य
सर्वप्रियत्वमपनीय विभूष्य निद्राम्।
प्रेमास्पदं दहनचण्डयूखतापं
सम्पाद्य किं न रुचिरां रुचिमुच्छिनत्सि।।६।।

तारुण्यमाप्तवति ते विभवे भवेऽस्मिन्
सर्वत्र वृद्धिमयते परुषप्रवृत्तिः।
दूरे निधाय सुषमामसमां रसाया
हेमन्त, हस्तयसि किं न जनापवादम्?।।७।।

प्रालेयसानुमति नापि तरङ्गिणीनां
स्रोतस्यथो न विपिने न सुधाकरेऽपि।
पद्माकरे न कमलानिलयेऽपि नापि
सौन्दर्यमुन्मिषति सम्प्रति शासने ते।।८।।

---

*१. पाठान्तारः जयं।*

स्तब्धः सदागतिरपेतमहाप्रभाव-
श्चन्द्रोऽथ नीरसतया सरसोङ्कलक्ष्मीः।
व्योमापि सोमकलया लभते न कान्तिं
क्लान्तिं विमुञ्चति न चाल्पबलोऽद्य जन्तुः।।९।।

वल्ली न पल्लवदलैर्लभतेऽङ्गलक्ष्मीं
नो चन्दनं हृदयनन्दनतामुपैति।
प्राणांस्त्यजन्त्यधनिनो भुवनेषु चाल्प-
प्राणाः प्रसारयति तीव्रबले त्वयीह।।१०।।

खाभिष्पतत्तुहिनविन्दुपराहतश्रीः
प्रातस्तरुस्त्यजति वाष्पकणान् धरायाम्।
स्नात्वा हिमेन निशि पाटलगेन्दकादि-
त्वन्निष्ठुरत्वमुषसि क्षिपतीव हासैः।।११।।

कम्पं करोषि वपुषि प्रथसेऽश्रुपातं
रोमाञ्चकञ्चुकमुदञ्चयसि प्रगल्भः।
वैवर्ण्यमाकलयसि स्वरभङ्गहेतुः
शृङ्गारबन्धुरिव सम्प्रति चेष्टसे त्वम्।।१२।।

उत्सेकमात्मनि विकर्मरतिं च चित्ते
क्षेत्रे परस्य परमामभिलाषवृत्तिम्।
पारुष्यमेव वचसि द्विजकण्ठमूले
मूकत्वमेधयसि यूनि नवो गुरुस्त्वम्।।१३।।

याता दिवं कमलिनी मलिनीकृता द्यौ-
र्मूका द्विजाः सुमनसो गलितप्रसादाः।
विच्छायमुपगता कमला वनस्य
त्वच्छासने सपदि भूरवसादितेव।।१४।।

📖

# ४४.कालस्य लीलायितम्

या धातुर्वदनोम्बुजात् प्रकटिता व्यासादिभिर्लालिता
दिव्यामोदकरम्बितैः सुमनसां स्तोमैश्च सम्पूजिता।
सेयं कल्पलतेव देवभणितिर्मुग्धैर्द्विजैरुज्झिता
म्लानत्वं भजतेऽद्य हन्त तदिदं कालस्य लीलायितम्।।१।।

नाज्यं, नैव पयो, न वा दधि, फलं न स्वादु भोज्यं समै-
राहर्तुं सुलभं, कयापि शतकैरस्तंगतैतादृशी।
यत्पूर्वं पणकेन लभ्यमधुना तद्रूप्यकेणापि न
प्राप्यं वस्तु यदस्ति तत्तदखिलं कालस्य लीलायितम्।।२।।

गोपालभूपालकुलस्य बालो
गोपालिकाकेलिकलासलीलः ।
नीलोऽपि शुक्लात्मभिरर्च्यते तत्
कालस्य लीलायितमेव मन्ये।।३।।

# ४५.जीवितम्

न निर्भरं हर्षमुपास्महे वयं
लभामहे नो सुहृदं विमत्सरम्।
सुखं न शान्तिं न मनोरथागमं
नितान्तमेतन्मृतमेव जीवितम्।।१।।

श्वसन्ति भस्त्रा इव मानवा नवाः
पशुप्रवृत्त्या विचरन्ति भूतले।
परापकारव्रतशालिनोऽधुना
वहन्ति लोकक्षयहेतु जीवितम्।।२।।

धनेन धन्येन जनेन सङ्गतं
सदा सदाचारविचारचर्चितम्।
नितान्तमार्द्रं करुणामृतोक्षितं
सतां समुत्कर्षमुपैति जीवितम्।।३।।

न येन लोकस्य सुखं विवर्धितं
न चापि शीलं हृदये सुरक्षितम्।
न चार्जवं येन जवेन नन्दितं
निरर्थकं तस्य नरस्य जीवितम्।।४।।

प्रसादमासादयते मनोरमं
वचश्चमत्कारमयं निरामयम्।
सचेतसश्चेतसि यस्य सत्कवेः
सदाभिनन्द्यं भुवि तस्य जीवितम्।।५।।

अखण्ड - पाखण्ड - विखण्डनेहितु-
र्निसर्गतो निर्मलचारुचेतसः।
परोपकाराय समर्पितात्मनो
फलत्यलभ्यानि फलानि जीवितम्।।६।।

# ४६ .लाभो महान्

स्वाध्यायो न विधीयते न च तपोऽनुष्ठीयते यत्नो
नो सारस्वततत्त्वबोधविषये जागर्तिरालम्ब्यते।
शास्त्रं नैव विरच्यते न च नवं काव्यं विनिर्मीयते
भूयः पण्डितसंज्ञया लसति यन्मन्ये स लाभो महान्।।१।।

नापाङ्गेन निरीक्षते न मधुरालापेन संभाषते
नौत्सुक्यं प्रकटीकरोति न रहःसङ्गं समाकाङ्क्षति।
इत्थं यद्यपि खिन्नता न हृदयं मुञ्चत्यभीक्ष्णं तथा-
प्यस्मत्प्राणधनास्यदर्शनसुखालम्भेन लाभो महान्।।२।।

स्वच्छन्दं भ्रमणं गतं मृतमहो स्वेच्छानुसाराशनं
सङ्गो बन्धुजनस्य हन्त विहतो दूरीकृता च प्रिया।
सर्वं पिञ्जरबद्धकीरयुवकस्याभून्महासङ्कटं
रामेत्यालपने परं यदुदिता शक्तिः स लाभो महान्।।३।।

# ४७.लम्पटाः

प्रीयन्ते कतिचित्प्रभोश्चरणयोः प्रीतौ नितान्तादरात्
केचित् संविदि चात्मनोऽपि रसिकाः कामं रमन्तेऽन्वहम्।
कीर्त्तौ केऽपि रताः, परे तु विरतौ सक्ताः प्रशस्ताशयाः
सज्जन्ते वनितासु विभ्रमवतीष्वन्ये स्फुटं लम्पटाः।।१।।

धन्यास्ते पुरुषा धिया भगवतीं ध्यायन्ति ये भारतीं
भोगेच्छां शमयन्ति शान्तिमनिशं संचिन्तयन्तो हृदि।
अन्ये हन्त! विषोपमेषु विषयेष्वासक्तिभाजो भृशं
स्त्रीणामङ्गमनङ्गवर्धनपरं श्लिष्यन्त्यलं लम्पटाः।।२।।

ते पुनर्विरचयन्तु निर्भरं लौकिकं किमपि सूत्तमं यशः।
कुर्महे मनसि तादृशं वयं स्याम येन रससारलम्पटाः।।३।।

# ४८.नारी

पुंसां बलेन सबलापि परं पुमांस-
मानर्तयत्यविरतं नयनेङ्गितेन।
शक्तिं विरुद्धघटनास्वपि सन्दधाना
नानाकृतिर्विजयते भुवनेषु नारी।।१।।

स्तन्येन, मुग्धवचनेन, निजाङ्कमध्ये
क्रीडारतेन शुचिलालनपालनेन।
स्नेहामृतेन, विमलीकरणेन, शश्वत्-
सेवाव्रतेन पृथुकान् परिपाति नारी।।२।।

उद्दामयौवनमदोर्जितविभ्रमेण
मुग्धेन मन्मथकलाललितक्रमेण।
प्राणप्रियाङ्कपरिरम्भकृतस्मितेन
पुंसो वशे नयति शक्तिमतोऽपि नारी।।३।।

वामापि दक्षिणतमा, परुषापि मृद्वी,
वक्रापि पूर्णसरला, समदापि मुग्धा।
मुक्तापि संयमवती, मलिनापि भव्या,
कामं भुजङ्गसहितापि शिवास्ति नारी।।४।।

नीतिर्निवार्थघटनासु, पुमर्थसिद्धौ
रीतिर्मनोरथविधिष्वथ कल्पवल्ली।
आमोदमेदुरमुखी कुसुमावली सा
पुंसां मरूपमगृहेषु विभाति नारी।।५।।

यस्यां स्थितावपि न शान्तिरुदेति सम्यग्
या प्रस्थितापि हृदये न शमं विधत्ते।
सेयं सुधागरलयोरिव मोदमूर्च्छा-
माविष्करोति पुरुषेषु विचित्रनारी।।६।।

सेवा, समर्पणमतिः, करुणा, तितिक्षा,
दीक्षा, क्षमोपकृतिरच्छमनःपरीक्षा।
रक्षा धृतिः, स्मृतिरलङ्कृतिरालयस्य
श्रद्धा, समृद्धिरुदिता मुदितारार्यनारी।।७।।

वैचित्र्यमात्मनि निधाय पस्फिुरन्ती,
पुंवर्गगर्वगिरिरङ्गमधःक्षिपन्ती ।

पुंभिः सुदुष्करमपि द्रुतमुन्नयन्ती,
लोकोत्तरं किमपि कर्म करोति नारी।।८।।

आधाराधेयभावेष्वधिकसमरसेष्वाधिकारं वहन्ती
त्रैगुण्येषु त्रिरूपेष्वतिशयसरसं रञ्जनं सज्जयन्ती।
राधाकृष्णादिसंज्ञास्वनुपमसुखदां लालितीं लालयन्ती
यत्रैवास्ते धरायाममृतविलसितं सैव सैवास्ति नारी।।९।।

# ४९.शरदिन्दुमुखी

अरविन्दमरन्दझरैर्मधुरा नवरवञ्जनगञ्जनकृन्नयना।
विमलाम्बरमञ्जुलतालसिता मुदितोदयते शरदिन्दुमुखी।।१।।

रसिकेषु मुदं, तरुणेषु मदं भुवनेषु परां सुषमां दधती।
कमलेव पदन्यसनेन सुखं ददती रमते शरदिन्दुमुखी।।२।।

मधुरैर्मधुपावलिगीतभरैर्लतिकाललितोत्सवलास्यरसैः।
कलहंसकुलैरभिनन्दनतो भुवि नन्दति सा शरदिन्दुमुखी।।३।।

विगतं सुकृतं, परमेशरतिर्विरता, परलोकमतिस्तु मृता।
न मनागपि खेद इतःस्वदते यदि साभिमुखं शरदिन्दुमुखी।।४।।

अधुना जगति स्पृहणीयतमं द्वयमेव हृदम्बुजमाश्रयते।
विभवो भवभूतिकरोभवने मदनाय तथा शरदिन्दुमुखी।।५।।

रसिकं प्रियमुन्मदयन्त्यनिशं शिशुलालनमाकलन्त्यसमम्।
विषमं परिवारकलिं दमयन्त्युदयं लभते शरदिन्दुमुखी।।६।।

जननं नमनीयमनन्तफलं नवयौवनमुत्सवधाम तदा।
यदि चुम्बति सद्गुणिनी कविता परिरम्भवती शरदिन्दुमुखी।।७।।

धनधान्यसमृद्धिविलासमयं भवनं कलशिल्पकलाललितम्।
श्रियमेति तदैव यदा वसति स्मितशोभिमुखी शरदिन्दुमुखी।।८।

# ५०.सर्वत्र सा दृश्यते

नो रामा न रमा न वामनयनापाङ्गच्छटामाधुरी
नो वासन्तिकलोकनीयसुषमा चान्द्री कला नोत्तमा।
आराध्यास्ति, परन्तु मञ्जुलपदन्यासा प्रसादान्विता
सद्वृत्ता कविभारती मम पुरः सर्वत्र सा दृश्यते।।१।।

न स्वाध्यायरतिर्न भारतभुवो रीतिर्न चार्यस्थिति-
र्न प्रीतिर्विनये न संयमधनाधाने प्रसक्तिः क्वचित्।
छात्राणां निवहेऽधुना तु नितरामुद्दामदर्पोद्धुरा
विध्वंसैकविभीषिकात्र भुवने सर्वत्र सा दृश्यते।।२।।

नो सन्तोषकथा न चार्जवरतिर्न ज्ञानदानोन्नति-
र्नाचारे हृदयस्थितिः सुमनसां नो वा प्रवृत्तिः शुभे।
अद्यत्वे तु परापकारनिरता दम्भक्रियाचातुरी
तृष्णा काचन नग्ननर्तनपरा सर्वत्र सा दृश्यते।।३।।

कल्याणस्य कथा तु वाचि निहिता, साध्वी क्रिया कुण्ठिता,
सन्त्यक्तैव सहिष्णुता, विकलिता कौटुम्बिकी सत्क्रिया।
दुर्वृत्तिः शिरसि स्थिता परजनोत्कर्षाद् भृशं वर्धिता
लोके सम्प्रति कापि लब्धविसरा सर्वत्र सा दृश्यते।।४।।

यो देशः पृथिवीतलस्य समभून्नृणां पुरा शिक्षकः
सोऽयं नाधिकरोति शिष्यपदवीमप्युत्तमां साम्प्रतम्।
अन्योऽन्यं कलहप्रवृत्तिरतुला नैव प्रतिष्ठा श्रम-
स्यास्ते हन्त! दुरायतिस्तदधुना सर्वत्र सा दृश्यते।।५।।

सम्भूता जलधेः कलङ्कमलिनस्येन्दोः स्वसा चञ्चलो
हन्तोलूकसुवाहना भगवती लक्ष्मीर्न मे रोचते।
हंसासीनतनुर्विवेकजननी वीणानिनादोत्सवा
वाणी मङ्गलदायिनी नयनयोः सर्वत्र सा दृश्यते।।६।।

# ५१. माधुरी

न रमणीरमणीयतमेऽधरे न मधुरे सहकारफलेऽपि सा।
विपदि सम्पदि तुल्यरसोत्सवा मिलति या कवितासु सुमाधुरी।।१।।

करतले कलिता कलितापहा मुरलिका मधुराधरचुम्बिता।
ललितकेलिकलाभिरलङ्कृता जयति काचन माधवमाधुरी।।२।।

मृदुलमञ्जु-लतोत्कलिकाप्रसूः सुरभिवैभववर्धनतत्परा।
कमलयाऽमलयानिललीलया सपदि नन्दति माधवमाधुरी।।३।।

मलिनकर्मशताहतसौभगा कुटिलताकुलटापहतस्थितिः।
जगति सम्प्रति नाद्रियते भृशं सुरगवी गलितामृतमाधुरी।।४।।

उदग्ररोषारुणलोचनप्रभं स्फुरन्नितान्ताधरपल्लवाञ्चलम्।
वशीकरोत्याशु शुभाशयोद्गताद् वचःप्रसूनान्मकरन्दमाधुरी।।५।।

ऋजून् सुशान्तांस्तृणमात्रभोजिनो वनौकसो मुग्धमृगान् मुनीनिव।
प्रगृह्य कर्णौ प्रसभं यमान्तिके नयत्यहो! काचन नादमाधुरी।।६।।

असंख्यकामोज्ज्वलकान्तिवन्दिता विलोचनानन्दसुधासमर्चिता।
निपीततारुण्यमनोरथामृता विभाति वृन्दावनमोदमाधुरी।।७।।

निरन्तरास्वादितनिम्बबर्बुरं मरुस्थले दर्शितसद्गतिक्रमम्।
क्रमेलकं मोदयितुं, क्षमेत किं सुधारसार्द्रा सहकारमाधुरी?।।८।।

# ५२. हा हतो मन्दभाग्यः

उपचितमकरन्दां पद्मिनीं सानुरागां
परिमलललितास्यां मल्लिकां चापि भुक्त्वा।
अनुपमसुषमाढ्यां वीक्ष्य चम्पामकम्पा-
मनुवदति मिलिन्दो हा हतो मन्दभाग्यः।।१।।

सुललितकवितायाः सत्पदन्यासलक्ष्मी-
र्जनयति रसिकानां चेतसि स्फीतहर्षम्।

कुकविघटितवृत्तात् किन्तु चित्तेऽतिखिन्ने
प्रलपति हि सचेता हा हतो मन्दभाग्यः।।२।।

वियति गतिरुदारा वर्णकान्तिश्च तुल्या
द्विजकुलजनिरेकैवास्ति काके पिके च।
जगति निजमहिम्नः किन्तु दृष्ट्वापकर्षं
रटति झटिति काको हा हतो मन्दभाग्यः।।३।।

स्वमतिकृतसुयत्नैः शास्त्रतत्त्वावमर्शे
गुरुजनवचनानामात्मनि स्थापनेन।
जगति विततकीर्त्तिः सन्नपि प्रान्तजाति-
प्रभृतिगुणविहीनो हा हतो मन्दभाग्यः।।४।।

अधिकृतशुभशिक्षोऽप्यात्तसूपाधिपत्रो-
ऽप्यभिमतपदलाभे वञ्चितः स्वार्जवेन।
तरुणमणिरजस्रं हीनमानो विपन्नो
विलपति जगतीत्थं हा हतो मन्दभाग्यः।।५।।

# ५३.मौक्तिकम्

काले सज्जनसङ्गमोऽतिकुटिलं पापादुपेतोदयं
नीचं कुत्सितकर्मरक्तहृदयं सद्यः पुनीते ध्रुवम्।
सन्देहो न मनागपीह मनुजैः कार्यो यतः शुक्तिका-
कायं वारिकणो विशन् भवति सच्छायं स्फुरन्मौक्तिकम्।।१।।

यत्तत्तीक्ष्णशलाकयास्ति नितरां विद्धं पुनर्लीलया
सूचीभिर्ग्रथितं नितान्तसुदृढे सूत्रे समायोजितम्।
यच्चैवायसपेटिकासु निहितं तत्सुन्दरीणां स्तन-
द्वन्द्वं हारि सुदुर्लभं भजति सद्भाग्याधिकान्मौक्तिकम्।।२।।

यासामुन्नतकर्कशस्तनयुगान्मातङ्गकुम्भस्थलं
मात्सर्येण पराजितं नहि पुनस्तत् स्पर्धितुं चेष्टते।
तासामेव कुचद्वयं निजपदन्यासैः सदा मर्दयत्
पुत्रत्वं सफलीकरोति नितरां मातङ्गजं मौक्तिकम्।।३।।

अद्यत्वे भुवि कृत्रिमं बहुविधं भासा समुद्भासितं
स्तोकद्रव्यसमर्पणेन सुलभं रत्नं लभन्ते नराः।
लुप्ता वैकटिका, गता नृपतयो, रामारतिर्भूषणाच्-
छिन्ना, तन्मृगयेत को विपणिषु त्वां मूल्यवन्मौक्तिकम्।।४।।

न जननीं, जनकं, न सहोदरं गणयतीह जनो गुणिनोऽङ्कने।
स्मरति कोऽपि न वेणुगजादिकं समुपलभ्य सुदुर्लभमौक्तिकम्।।५।।

जटितमाभरणे रमणीतनोर्नरपतेर्मुकुटे च विमण्डितम्।
कनककान्तिमुपेत्य विभासते स्फुरति केवलमत्र तु मौक्तिकम्।।६।।

जगति सा न विराजति शुक्तिका सपदि या जनयेदिह मौक्तिकम्।
किमधुना न जलं जलदेऽस्ति तद् भवति यत्तु विभास्वरमौक्तिकम्।।७।।

स्फुरतु रत्नमनर्घ्यमतिप्रभं बहुविधं विबुधैरपि काङ्क्षितम्।
जयति माल्यतया विहरत् परं युवतिवक्षसि मञ्जुलमौक्तिकम्।।८।।

# ५४.करोति

यत्राधुनाधिकृतसर्वविधाधिकाराः
स्वार्थाभिभूतमनसः प्रभवो जगत्याम्।
नृत्यन्ति हन्त! निरपत्रपतां वहन्त-
स्तत्र प्रशस्यमिह कः सुकृतं करोति।।१।।

पुण्यात्मनाममितधामसमृद्धिभाजां
शास्त्रानुमोदितशुभायतिसिद्धवाचाम्।
दुर्वासनादुरभिसन्धितमोऽभिभूतं
स्वान्तं किमुज्ज्वलवचोऽप्यमलं करोति।।२।।

कार्कश्यवश्यवचनां स्वकुटुम्बमध्ये
फुल्लाननामपरपूरुषसङ्गमेषु ।
रत्नाञ्चिताभरणमप्युपजातकामां
वामां सतीत्वरहितां किमलङ्करोति?।।३।।

स्वाध्यायसौरभमनारततीर्थसेवा
धर्मक्रियाभिनयकौशलमप्यनल्पम् ।
पुण्योपदेशनकलोपचिता समृद्धि-
रन्यापकारनिरतान्न परिष्करोति।।४।।

मालिन्यमग्नमनसां विमलाकृतीना-
मुच्चासनाधिकरणोर्जितनाटकानाम् ।
कार्पण्यमात्मनि निसर्गतयाधिरूढ-
मार्योचिताचरणमद्य तिरस्करोति।।५।।

लोकोत्तरं किमपि कर्म विधाय राष्ट्र-
सम्मानमात्मचरितेन समुन्नयन्तम्।
प्रेम्णा नयेन विनयेन च देशभक्तः
पूर्णादरेण विभवेन पुरस्करोति।।६।।

प्रत्यब्दमद्यतनसंसदि लब्धवित्तान्
संक्षोभयन्ननुदिनं परिवर्धमानः।
नव्यः पुरातनतमोऽप्यतिभारभूतो
मूल्यप्रवर्धनमनेककरः करोति।।७।।

रुचिरपदकदम्बं भव्यनव्यार्थरम्यं
ललितविधिविधानं कल्पनाया वितानम्।
सुकविरचितकाव्यं हृद्यवक्रोक्तिगर्भं
सहृदयहृदि हर्षोत्कर्षमाविष्करोति।।८।।

# ५५.अद्वैतं सुखदुःखयोः

दम्पत्योर्मधुरं प्रेम सौहार्दं निश्छलात्मनाम्।
मनस्विनामाचरणमद्वैतं सुखदुःखयोः।।१।।

आचार्योपासनादाप्तमभ्यासाच्च विवर्धितम्।
मननादुन्नतं ज्ञानमद्वैतं सुखदुःखयोः।।२।।

देशप्रेमप्रवीणानां कारुण्यप्रवणात्मनाम्।
वर्त्म धर्मात्मनां शश्वदद्वैतं सुखदुःखयोः।।३।।

भारतीं भजमानानां श्रद्धापूरितचेतसाम्।
धैर्याद् धामाद्भुतं धन्यमद्वैतं सुखदुःखयोः।।४।।

राष्ट्ररक्षासु दक्षाणां शत्रुसंहारकारिणाम्।
वीराणां साहसं शस्यमद्वैतं सुखदुःखयोः।।५।।

प्रियाङ्कपालीपीयूषसिन्धौ कामं निमज्जताम्।
प्रायः सञ्जायते चित्तमद्वैतं सुखदुःखयोः।।६।।

ध्येयध्यानपरानन्दसन्दोहस्थिरचेतसाम् ।
मनोऽनुभवति प्रायेणाद्वैतं सुखदुःखयोः।।७।।

ऐकमत्यसुधास्वादतृप्तानां गृहमेधिनाम्।
योगिनामिव संस्थानमद्वैतं सुखदुःखयोः।।८।।

सञ्चये चिरलुब्धानां त्यागे सर्वहुतात्मनाम्।
स्वान्तं भवति निःस्पन्दमद्वैतं सुखदुःखयोः।।९।।

अमृतस्यन्दिनी कापि सत्कवीन्द्रसरस्वती।
सतां जनयति स्वान्तेष्वद्वैतं सुखदुःखयोः।।१०।।

शीतातपादिकं सर्वं सहतां कर्म कुर्वताम्।
कर्षकाणां च यमिनामद्वैतं सुखदुःखयोः।।११।।

# ५६.अपौरुषेयम्

समुत्थितोत्पातकरालहिंसया नवीनतापादनकौतुकेन वा।
सरस्वतीमानहरेन्दिरार्चया प्रशासनं प्राप्तमपौरुषेयम्।।१।।

विराजते द्यूतकलाऽधिभारतं प्रवर्धते कामकथा निरन्तरम्।
चिरन्तनं तत्त्वमुपेक्ष्यते यतः प्रशासनं प्राप्तमपौरुषेयम्।।२।।

चारित्र्यचामीकरचारुतार्थं हुताशनं निर्मलशास्त्ररत्नम्।
अनेकातायां विमलैकताया विभासते मूलमपौरुषेयम्।।३।।

सदा सदाचारविवर्जनार्जितं विभिन्नवैचारिकचर्चयोर्जितम्।
पदे पदे सङ्गतमापदां पदं निवारयेत् तत्त्वमपौरुषेयम्।।४।।

# ५७.गुणानां गणः

त्वत्सेवासु रतास्तथा विदधते कार्याण्यनार्योचिता-
न्युत्सिक्ता अपि राक्षसा अपि यथा कर्त्तुं क्षमन्तेऽद्य नो।
मातर्भारति, भारतीयसमुदाचारे विनाशं गते
ब्रूहि त्वं, क्व निवासमाप्स्यति तव श्लाघ्यो गुणानां गणः।।१।।

श्लाघामञ्चतिवञ्चने, विलसितेऽलीके, व्यलीकेऽर्चिते,
पैशुन्ये परमादृते, समुदिते दम्भेऽपि संरम्भिते।
कर्त्तव्यव्रतकर्शितस्य कुशलस्य स्वच्छताशालिनो
वैगुण्यं भजतेऽपशासकपुरो गण्यो गुणानां गणः।।२।।

नो वित्तं प्रचुरं, न शीलनिलयः स्वामी सदाचारवान्
वश्यो नैव सुतः, सुहृन्न च शुचिर्भार्या न चार्या प्रिया।
नातिथ्यानुरतिर्न देवयजनं, न त्यागवृत्तिर्यतो
गार्हस्थ्यस्य ततोऽधुना व्यपगतः कृत्स्नो गुणानां गणः।।३।।

# ५८.परिवर्तनीयम्

वैदग्ध्यभावमनिशं बुधमण्डलीषु
संमुग्धता युवतिवृन्दबले विधातः।
शैत्यं च वारिनिचये नलिने सुगन्धिः
सर्वं विधानमिह तेऽपरिवर्तनीयम्।।१।।

चीने समुत्थितबले गतपञ्चशीले,
व्यावर्तितेऽपि बहुधेह विशीलशीले।
पाकेऽप्यरुन्तुदबले सहसम्मते च,
नीतेस्तु वर्त्म सहसा परिवर्तनीयम्।।२।।

सोऽयं कलिस्तपति पूर्णबलैः समाढ्यः
क्रोधादिकाममदलोभविभूषिताङ्गः ।
त्वं चाक्षिवन्द्यमधुना हि विधाय शेषे
धर्मो धृतिः कथय किं परिवर्तनीयम्।।३।।

अध्यात्मवादशुभभावमपास्य रागात्
यद्भौतिकत्वमनुसर्त्तुमुरुप्रयासः ।
देशे विदेशविभवं प्रति लोलुपत्वं
प्रागेव तद्बुधवरैः परिवर्तनीयम्।।४।।

धर्मे धियं सुकवितासु रुचिं विचारे
चारुत्वमार्जवमयस्वजनस्वभावे ।
आधातुमुत्तमतयाऽद्य कवीन्द्रवृन्दै-
र्लोकस्य सम्प्रति मनः परिवर्तनीयम्।।५।।

# ५९.नामापि न ज्ञायते

आर्हन्तीमसमां परैरसुलभां स्वस्मिन् सदा भावयन्
आत्मानं विबुधार्चनीयचरणं विज्ञापयन् पण्डितः।
सर्वेषां धुरि दृश्यते, परमहो वाग्देवतामर्चतो
निस्वार्थं तदनुव्रतस्य विदुषो नामापि न ज्ञायते।।१।।

रम्याद्रम्यतरस्य भव्यभवनस्यालोक्य शिल्पोन्नतिं
प्रीयन्ते भुवि दर्शका नयनयोरानन्दलाभान्विताः।
आधारेषु परन्तु लीनवपुषः पिष्टस्य चैवेष्टका-
पिण्डस्यास्फुटदर्शनस्य भुवने नामापि न ज्ञायते।।२।।

ये तु ग्रन्थसहस्रपङ्क्तिनिचयाद् हृत्वा नवं पुस्तकं
निर्माय प्रथिता भवन्त्यथ विदां वर्गेऽपि गर्वान्विताः।
ख्यातास्तेऽद्य परन्तु यैरुपहृतं तन्त्रादिशास्त्रं पुरा
तेषां लोकहितावधानमनसां नामापि न ज्ञायते।।३।।

📖

# ६०.भारो भुवः

नो शाखी, न शिलोच्चयो, न च महान् स्तूपो, न चाभ्रङ्कषं
हर्म्यं, यन्त्रगृहं, न चायसमहायानं तु भारायते।
दीनो दुर्ललितो दुरात्मतिलको लोकप्रमोदान्तको
दुर्नीतिप्रवणो दुरन्तदुरितासक्तोऽस्ति भारो भुवः।।१।।

सभ्यः सज्जनरञ्जनो गुणनिधिः प्रेमप्रशस्तास्पदं
कोऽप्येकः परमादरेण सुजनैरुत्कण्ठयाभ्यर्च्यते।
अन्यो मानवतारिपुर्मधुमुखो हालाहलान्तःस्थितिः
कामं धिक्क्रियते व्यलीकहृदयो लोकेन भारो भुवः।।२।।

📖

# ६१.सन्तप्यते

ये संसत्सु परान् बुधान् रचयितुं मूकान् जयाकाङ्क्षया
कण्ठे कीरवदाकलय्य कतिचिद् ग्रन्थान् लभन्ते यशः।
तेषामेव मनो नितान्तमलिनं स्वच्छात्मनां वञ्चने
दुर्वृत्ते च रतं विलोक्य विमलस्वान्तेन सन्तप्यते।।१।।

यैर्नाराधित ईश्वरो न च सतां सङ्गेऽनुरागो धृतः,
शास्त्राण्याकलितानि नो न सुकृताचारो हृदाऽनुष्ठितः।
तेषां नैव कथा व्यथां जनयति प्रायः परं पण्डितान्
दृष्ट्वा हन्त परापकारनिरतान् कैः कैर्न सन्तप्यते।।२।।

पीत्वा प्रमादमदिरां विषयाभिलाष-
हालाहलं च कवलीकुरुषे यदि त्वम्।
क्लेशाधिकं वहति मूर्च्छितचेतनश्चेत्
सन्तप्य ते तदनुरूपमिदं समग्रम्।।३।।

# ६२.वदन्तु धीराः

प्राप्नोति विद्याव्यसनी निकारं
लग्नः प्रपञ्चे लभतेऽधिकारम्।
उपासनीया शठता ततः किं
सरस्वती वेति वदन्तु धीराः।।१।।

मनुष्यता-मान-विवर्धनार्हे
पुरा स्तुते गण्यगुणे मृतेऽद्य।
दोषे प्रवृद्धे च कथं मनुष्या
वयं भवेमेति वदन्तु धीराः।।२।।

# ६३.प्रबुद्धां न सुप्ताम्

सर्गारम्भान्मनुजहृदयक्षेत्रमासिच्य भव्यान्
भावाङ्कूरानसृजदमृतस्यन्दिनी भारती या।
मन्दावेगा विहतविभवेवाक्षमा भूरिभूत्यै
सैवाद्यत्वे भजति नियतिं न प्रबुद्धां न सुप्ताम्।।१।।

येन प्राप्य प्रथिततपसा नित्यतत्त्वप्रकाशं
त्यक्तः सर्वो जगति विषयो मेदुरोऽपि प्रकामम्।
बन्धान्नित्यं ललितललितादप्युदस्तः प्रियार्थाद्
रामां रक्तामपि स भजते न प्रबुद्धां न सुप्ताम्।।२।।

मल्लीवल्लीं कुसुमलसितां भृङ्ग! नाङ्गीकरोषि
प्रत्याख्याय भ्रमसि मधुभृन्माधवीमप्युदाराम्।
किन्तु स्निग्धामभिनवसखीं पद्मिनीं मञ्जुकोषा-
मत्यासक्तस्त्यजसि मधुरां न प्रबुद्धां न सुप्ताम्।।३।।

शास्त्राभ्यासश्चिरमनुसृतः, पूजितोऽपीष्टदेवो
धर्माचार्योऽसकृदवसरेऽभ्यर्चितः श्रद्धयैव।
किन्त्वायाते जरसि वयसि क्षिप्तबुद्धेर्ममान्त-
र्वृत्तिं तृष्णोज्झति बलवती न प्रबुद्धां न सुप्ताम्।।४।।

श्रेयः प्रेयोघटननिपुणामीश्वरस्यानुकम्पा-
मेवाकम्पां हृदि धृतपदां चित्त! सञ्चिन्तयेस्त्वम्।
कल्याणं ते कलयितुमलं सा चिराराधितापि
न स्याद् यां त्वं त्यजसि दयितां न प्रबुद्धां न सुप्ताम्।।५।।

# ६४ .किं चिन्त्यते

कठोरशिशिरोद्गमे गलितवैभवं वारिजं
प्रसूनमितरत्तथा न मधु सौरभैरर्च्यते।
दुरन्तनियतिक्रमे स्फुरति संहृताशारसे
रसालनवमञ्जरी हृदि मिलिन्द! किं चिन्त्यते।।१।।

महद्भिरपि शासकैर्मनसि चिन्तितं पूरितं
विशेषबलशालिभिः सततमीक्षितं यन्मुखम्।
तथैव पुनरीदृशं जगति जीवितं गर्हितं
गृहीतमिति दुर्विधेः फलमिदं न किं चिन्त्यते।।२।।

प्रचण्डरिपुमण्डलं झटिति दण्डितं खण्डितं
विमण्डितमनारतं चरणचुम्बि मित्रं भृशम्।
प्रशस्तमपि पौरुषं हुतमथ प्रतापानले
तदेव दिनमुन्नतं विजितया न किं चिन्त्यते।।३।।

जनुष्यसुलभं फलं पदमनामयं काम्यते
पुमर्थनिकरं करे यदि निधातुमस्ति स्पृहा।
समस्तविषमस्थितिं यदि निहन्तुमेवेष्यते
तदाशु करुणार्णवो हरिरहो न किं चिन्त्यते।।४।।

अशेषजगतीतले जयति भूतिदा भौतिकी
तदुन्नतिरिहापि सा ध्रुवमुपासनीया बुधैः।
परन्तु मनुजात्मनि स्थिरविकारजातक्षयं
विधातुमिह संस्कृतं शिवमयं न किं चिन्त्यते।।५।।

# ६५ .का कथा

निःश्रेयसस्याभ्युदयस्य चापि
स्फुरत्यतुल्या यशसः पताका।
सुखस्य शान्तेश्च समृद्धिरूपा
श्रुतिं प्रयाता न गिरः कथा का?।।१।।

पद्भ्यां मर्दितुमुद्यमेष्ववसितेष्वह्नाय कृत्वा स्मितं
श्लेषायात्मकरं प्रसारयति या क्रोडे चिकीर्षुः परम्।
तस्यात्यद्भुतशीलशालिपुरुषस्योत्कर्षलाभोदयम्
नो वक्तुं प्रभवेत् सहस्त्ररसनाऽप्यन्यस्य तत् का कथा।।२।।

# ६६.विजयते

तृणीकृत्य प्राणान् निखिलसुखमुत्सृज्य जनुषो
गृहीतं स्वातन्त्र्यं प्रबलतमवैदेशिकनृपात्।
वदान्यैः सम्मान्यैरनुपमतपोभिः सुचरितै-
रुपानीतं स्फीतं तरुणगणतन्त्रं विजयते।।१।।

सतां सङ्गाभावादनुचितकथोत्थापनभया-
दवाच्ये मूकत्वादपकृतिविधानेऽतिविमुखात्।
छलानङ्गीकारादनृतपिशुनत्वादिरहितात्
खलानां पाण्डित्यं प्रतिदिशमिदानीं विजयते।।२।।

प्रशास्तॄणां मौनादसितविपणीनां प्रचलना-
दसन्तोषाद् यूनां विघटनपराणां समुदयात्।
विमुक्त्यै दारिद्र्यान्मधुरवचनोद्घोषकलना-
दिदानीं कुण्ठाया भरतभुवि नृत्यं विजयते।।३।।

समृद्धानां लोकायतमतपराणामुपचयात्
तपस्यायास्त्यागान्मठपतियतीनामुपगमात् ।
अनाचारोत्कर्षान्मदनमदिरारम्भजनिताद्
इदानीं देशेऽस्मिन् किमपि नववृत्तं विजयते।।४।।

प्रमादस्योत्कर्षः परिभवकरो दर्पदहनो
युवत्याः संक्षोभो दयितमरणाद् वृद्धिमयते।
पदार्थानां मूल्यं स्पृशति गगनं दैन्यजननं
प्रभावस्त्वत्याज्यो जयवति समाजे विजय! ते।।५।।

कृतार्थप्रायेऽपि स्थविरविदुषि द्वेषरहिते
पदन्यासे सूक्तेः सरसमनसां प्रौढनिवहे।
विभिन्नेऽप्येकस्मिल्ललितकविताप्रेमनिरते
समाजे संस्थानं किमपि कमनीयं विजयते।।६।।

# ६७.धीमहि

गतं गतं केवलमद्य पश्यता-मनागतं नाल्पमपि प्रतीयते।
वयं भविष्यत्समयेऽपि सुस्थितिं गिरो विधातुं हृदयेन धीमहि।।१।।

अजस्रदानार्द्रकरं मतङ्गजं स्तुवन्तु केचिच्चतुरङ्गिणीश्वरम्।
वयं तु शक्तेरपि वाहनोत्तमं मृगाधिराजाद्भुतधाम धीमहि।।२।।

तीर्थानां महिमोज्ज्वलं बलमलङ्कारं भुवो भासुरं
ब्राह्मं धाम परोपकारनिरतं श्रेयः समुन्नायकम्।
कल्याणप्रवणं समर्पणपरं सीमन्तिनीनां महः
तेजः किञ्चन निर्मलं निरुपमं सारस्वतं धीमहि।।३।।

निर्व्याजाचरितं विदां सुरगवीसेवैकहेवाकिनां
कल्याणाय निरन्तरं श्रमवतां ब्राह्मीं स्थितिं ध्यायताम्।
मर्यादापरिपालनाय सततं प्राणार्पणं कुर्वतां
धन्यानामिह भारते निवसतां सत्त्वं सतां धीमहि।।४।।

सम्राड्विक्रमहर्षभोजनिवहैरभ्यर्चितां निर्भरं
कौटल्यादिनयज्ञनन्दितपदां ब्रह्मर्षिभिः सेविताम्।
वाल्मीक्यादिकवीन्द्रवृन्दमहितां श्रीनारदादिस्तुतां
वाग्देवीमतुलप्रभावभरितां श्रेयस्करीं धीमहि।।५।।

ये सांसारिकसौख्यचिन्तनमपि त्यक्त्वा परैर्दुस्त्यजं
संयम्यात्ममनश्चिरं गुरुकुलेऽकार्षुस्तपो दुष्करम्।
तेषामुज्ज्वलमात्मबोधमतुलं भूतप्रभूतोदयं
वृत्तं पावनजीवनक्रम-मुदाहार्यं मनो धीमहि।।६।।

धर्मब्रह्मकथां धनाप्त्यभिनयप्रस्तावनां नूतनां
सम्मानार्जनपद्धतिं बुधजनाः प्रेम्णाधुनोपासते।
तैस्तैरिङ्गितचेष्टितैरनुपमान् भक्तव्रजान् सज्जना-
नादातुं यजमानमोहनविधिं नित्यं नवं धीमहि।।७।।

# ६८.करुणार्द्रचेताः

वाग्देवतापदसरोरुहचञ्चरीक-
स्तुच्छीकृताखिलजगद्विषयाभिलाषः ।
भक्तिप्रसादितनिजेष्टमहाधिदेवो
योगीश्वरो विजयते करुणार्द्रचेताः।।१।।

अङ्गप्रभाविजिततप्तसुवर्णकान्ति-
र्वाग्वैभवापहृतदेवगुरुप्रभावः ।
सारस्वतद्युतिविकासितबुद्धिसारो
योगीश्वरो विजयते करुणार्द्रचेताः।।२।।

भूमीश्वरोऽनुभवति द्विषतां प्रहारं
भोगीश्वरो भ्रमति भोगवनावनीषु।
एको जगत्यनुपमो विजितारिवर्गो
योगीश्वरो विजयते करुणार्द्रचेताः।।३।।

सन्त्यज्य सर्वविषयान् विषमप्रभावान्
जित्वाऽऽत्मनः सततसेवितषट्सपत्नान्।
मग्नं विपत्तिजलधौ जनमुद्दिधीर्षु-
र्योगीश्वरो विजयते करुणार्द्रचेताः।।४।।

छायां सुमान्यमृतगर्भफलानि शश्वत्
संवर्धयन् सुकृतशाखिनि जीवनेन।
आनन्दयन् जगति दुस्सहतापतप्तान्
योगीश्वरो विजयते करुणार्द्रचेताः।।५।।

# ६९.कथं वर्तताम्

रवीन्दुमहसां चये घनघटाभिराच्छादिते
तमस्युपचितेऽचिरादुदिततीव्रझिल्लीरवे ।
निशीथसमयाञ्चले प्रियवियोगतापाकुलो
जिजीविषुरयं जनोऽधिविपिनं कथं वर्तताम्।।१।।

श्रुतिस्मृतिकथा मृता, विलयमाप यज्ञक्रिया,
पुराणवचनामृतं विषमितं जनैर्दुर्भगैः।
मनोः कुलमनाकुलं त्यजति तत्पथं सर्वथा
युगेऽत्र कथयाधुना सुकृतवान् कथं वर्तताम्।।२।।

मदान्धतिलके प्रभौ, सुहृदि सर्वदोषाकरे,
कुटुम्बिनि कलिप्रिये, प्रियजनेऽपि शाठ्याञ्चिते।
परापकृतिशालिनि प्रकटरागरक्ते जने
करालकलिकालके कथय रे कथं वर्तताम्।।३।।

प्रियस्य सुषमारसस्नपनदीपिताच्छाकृते-
र्निरन्तरदिदृक्षया मनसि लालसां या व्यधात्।
समागतवति प्रिये स्वपिति, वीतनिद्रा पुन-
र्न पश्यति यदि प्रियं कथय सा कथं वर्तताम्।।४।।

# ७०.गणयति

समृद्धं विद्याभिर्मधुरवचनैः शुभ्रयशसं,
गुणैर्गण्यैर्नम्यं सकलजनवन्द्यं सुचरितैः।
महात्मानं धन्यं प्रथितमहिमानञ्च भुवने,
खलोऽत्यन्तक्रूरस्तृणमिव न किञ्चिद् गणयति।।१।।

प्रवालैरुद्दीप्तं विशदसुमनोभिर्विलसितं,
नवाभिर्लीलाभिः सुरयुवतिवृन्दस्य ललितम्।

प्रमोदैरामोदैरतिशयसुखं नन्दनवनं,
न चोष्ट्रो निम्बाशी निजवसतियोग्यं गणयति।।२।।

न वीणायाः कर्णामृतमतिधुरीणानुरणनं
न वेणोरुद्गीर्णं क्वणनमपि कल्याणकलितम्।
न गान्धर्वं धन्यं ललितमपि नृत्यं च शिखिनः,
सुखासीना दीना महिषमहिषीयं गणयति।।३।।

श्रमेणात्यन्तेन प्रथयति न कर्मेह नियतं,
न वा वाचं मुग्धा व्यवहरति सत्यां च मधुराम्।
न विद्या नो वृत्तं प्रवितरति शिष्याय विबुधः
परं मासस्यान्ते प्रचुरतरमुद्रां गणयति।।४।।

कथालापे सर्वं मम तु भवदीयं भवति भोः
स्फुटं प्रायेणेत्थं प्रतिदिनमुदारं वदति यः।
स एवातिक्षुद्रे कतिपयपणप्राप्तिविषये
विरोधे स्वार्थस्य क्षणमपि न मैत्रीं गणयति।।५।।

# ७१.महीयते

राम-कृष्ण-गौतम-प्रतापवीर-गोखले-
मालवीय - गांधि - नेहरुप्रभृत्युपासिता।
भारतीयनायकादिसंनता समन्ततो
देवलोकलालिताऽञ्चिता मही महीयते।।१।।

भारतीपदाब्जनूपुरानुशिञ्जनामृतं
कर्णपेयमप्रमेयमोदमङ्गलार्चितम् ।
सादरं निपीय यत्र सामगायनो मुनि-
र्गायतिस्म सा महीयसी मही महीयते।।२।।

भासकालिदासबाणदण्डिहर्षपर्वतात्
स्यन्दमाननिर्भरापगारसोर्मिभिश्चिरात् ।
स्नातभातकायकान्तिदीपिता सरस्वती
भावकान्तरङ्गभूविहारिणी महीयते।।३।।

कल्पवृक्षकल्पविक्रमार्कभोजभूपति-
प्राप्तसत्कथामृतोर्मिभव्यनव्यनर्मदा ।
चेतसि प्रसुप्तलोकमङ्गलैकसत्क्रिये
दानवीरताङ्कुरप्रवर्धिनी महीयते।।४।।

लोकशोककृत्प्रचण्डदस्युमुण्डखण्डन-
स्वीकृतार्यराजपुत्रविक्रमप्रथार्चिता ।
मातृभूमिमानवर्धनार्थमुच्चवृत्तिभिः
पूजिता समूर्जिता नुता मही महीयते।।५।।

दुस्त्यजैहिकाभिरामभोगभावनाहुतिं
त्यागपावके समर्प्य सर्वथा तपोमयैः।
भूमिदेवतासुतैरुपासिता विभूषिता
विश्वसभ्यताभिवन्दिता मही महीयते।।६।।

कौत्सवाञ्छितार्थसार्थपूरणव्रतोल्लस-
न्निःस्वरामपूर्वजप्रभावभूरिभूषिता ।
भारतीयराजलोकलोकविश्रुतक्रिया
पावनप्रयोगयोगिनी मही महीयते।।७।।

फुल्लपुष्पसौरभप्रभामरन्दमारुता
धूतवल्लरीलसन्मिलिन्दवृन्दवन्दिता ।
आम्रमञ्जुमञ्जरीमरन्दबिन्दुनन्दित-
प्रीतमत्तकोकिलैककाकली महीयते।।८।।

अकिञ्चनस्योपशमो महीयते
महीपतेर्दानरतिर्महीयते ।
विदां गुणग्राहकता महीयते
कवीश्वराणां कविता महीयते।।९।।

गृहेऽतिरम्या वनिता महीयतेप्रभातकाले सविता महीयते।
वसन्तलक्ष्म्या मुदिता महीयते सभापते र्वागुदिता महीयते।।१०।।

प्राप्ताल्पविद्यो बहुवादचुञ्चुश्चञ्चत्पदो देश विदेशयाने।
दलन् दलं दत्तजलः सुनीतौ स एव नेताद्य महीयतेऽत्र।।११।।

प्राप्ताधिकारो विनयानुवीतिस्तुत्यादिभिर्मन्त्रिपदादिभाजाम्।
कर्माण्यकर्माण्यपि तद्दृशैव कुर्वन् स शास्ताऽपि महीयतेऽद्य।।१२।।

व्याख्यातृभूतोऽनुभवैर्विहीनो हीनः सदाचारलवेन यो वै।
शिष्यैः समं चित्रपटादिदर्शी विद्यालयस्तेन महीयते किम्।।१३।।

त्यक्तश्रमोऽधीतिविधौ नितान्तं व्यर्थीकृतामूल्यपलो भ्रमीषु।
आडम्बरे दत्तमनावमानी गुरोः स शिष्यो नु महीयतेऽग्रे।।१४।।

वसादमुत्साद्य प्रयस्य सर्वतो विधातुमद्धाऽभ्युदयोऽद्यशक्यते।
यतो हि लोकः शशिनोऽपि वैभवान् मनुष्यबुद्धेरधुना महीयते।।१५।।

# ७२.कादम्बिनी

नैव स्थैर्यमपाकरोति विषमे प्राभञ्जनीये रये
नैवामन्दरसप्रवर्षणमनु क्षीणा भवत्युन्नता।
साहित्ये पथि नैव पङ्ककलनामाविष्करोति क्वचि-
न्नैवाच्छादयतीह मित्रमुदिता सत्काव्यकादम्बिनी।।१।।

भारे भारयति प्रकोपदहने दाहाधिकं तन्वति
क्रूरे मोहमहाविषे विकलयत्युद्दामशक्त्यान्वहम्।
लोभे जाग्रति मत्सरे व्यथयति प्राणान्हरत्युन्मदे
तापं नः शमयेत्कदा भगवतः कारुण्यकादम्बिनी।।२।।

यस्मादाविरभूस्तमेव नितरामावृत्य सन्तिष्ठसे
मार्गं पङ्किलमातनोषि वियुजां प्राणान्हरस्युन्मदा।
पुष्टिं कामपि सन्दधासि सततं त्वं निम्नगानां मुदा
ध्वान्तं साधु समेधयस्यनुपदं लोकेऽत्र कादम्बिनी।।३।।

## ७३.समुज्जृम्भते

तावद्वन्यपशोः पुरोऽधिविपिनं वप्रक्रियापाटवं
मातङ्गः प्रकटीकरोति नितरां मत्तोऽवलिप्तो महान्।
यावत्कन्दरिकन्दरध्वनिभरैरारण्यकांस्तर्जयन्
नोद्धूयात्मसटां समुत्कटतमः सिंहः समुज्जृम्भते।।१।।

न ज्ञानं न तपो न साधुचरितं नैवार्ज्जवं न क्षमा
सन्तोषो न परोपकार-रचना नो वा तितिक्षा धृतिः।
नो मैत्री करुणा न चापि मुदिता लोकेऽधुना दृश्यते
नग्नः केवलमेक एव कुटिलः स्वार्थः समुज्जृम्भते।।२।।

# ७४.चातुरी

प्रोद्दीप्ते प्रबलप्रभञ्जनरये व्याप्तेऽम्बरे पांसुभि-
र्लुप्ते भास्वति विस्तृतेऽथ तिमिरे झिल्लीरवे प्रोत्थिते।
सम्प्राप्ते समुपद्रवे दिशि दिशि त्रासे समुन्मीलिते
लोकत्राणपरायणा विजयते काचिद्विधेश्चातुरी।।१।।

📖

# ७५.निरोधः

प्रतिक्षणं सम्प्रति जायमानशिशोरिहप्रादुरभूत्प्रभारः।
नियन्त्रणार्थं तत एव पुंसामाविष्कृतोऽपत्यजनेर्निरोधः।।१।।
अज्ञातबोधे वद कः प्रबोधः पदाधिरूढे न गुणानुरोधः
निर्वैरभावं प्रति को विरोधो मनो निरोधे सति को निरोधः?।।२।।

📖

# ७६.तावदेव

यावत्कवीन्द्रकविता न रसज्ञवृन्द-
मानन्दयत्यमृतवर्षणतोऽधिकर्णम् ।
यत्नेन वृत्तपरिधौ पदबन्धनेन
ख्यातः कविर्भवति कश्चन तावदेव।।१।।

यावत् खगेन्द्र इव पक्षयुगं प्रसार्य
नाक्रामति प्रबलभारतसैन्यसङ्घः।
त्वं पाक, काक इव कर्णकटुप्रलापै-
र्दृप्तान्निजानभिजनान्नय तावदेव।।२।।

यावत्कृपापरवशे परमेश्वरे नः
सञ्जायते न चरमा परमानुरक्तिः।
आसक्तिरत्र सुतवित्तकलत्रमित्रे-
षूज्जृम्भते हृदयसद्मनि तावदेव।।३।।

यावद् विरज्यति मनो न मनोऽनुकूला-
दर्थादनर्थनिलयाज्जगतः प्रपञ्चात्।

कामादयः परिभवं सहजाः सपत्ना-
स्तन्वन्ति यत्नरहिता अपि तावदेव।।४।।

यावद् विनाशपिशुनो भुवि सभ्यताया
द्रोहोऽभिमानसहितो नहि हुंकरोति।
सौहार्द्रमार्जवरसोपचितं जनेषु
सञ्चारय प्रबलराष्ट्रिय! तावदेव।।५।।

यावन्महेश इव शास्ति न मण्डेलशो
गुण्डाभिधान् दमयितुं नितरां प्रचण्डान्।
ते लंघयन्ति नियमानपमानयन्ति
मान्यान् सतीमपहरन्ति च तावदेव।।६।।

# ७७.उत्तरायणम्

तुषारविन्दुप्रकरास्त्रवर्षणाद्
वनश्रियो दुःखनिदानमीक्षितुम्।
समेत्य धामोन्नतमित्रमण्डलं
समासदत् साधुभृदुत्तरायणम्।।१।।

चिरेण वन्दीकृतमुज्झितश्रियं
प्रियं स्वमित्रं समुदीक्ष्य दक्षिणे।
विमुक्तये तस्य लसत्त्विषोर्जितं
व्यनक्ति स्वं विश्रममुत्तरायणम्।।२।।

सहस्यमासस्य विवृद्धवैभवे
नितान्तजाड्यप्रसरोन्मुखे दिने।
अतीव भीतानिव दीनकोकान्
अतीतशोकानकृतोत्तरायणम् ।।३।।

अनल्पकालेन नितान्तकीलितं
क्रियाकलापं किल मङ्गलालयम्।

महोत्सवं वैदिकधर्मनन्दितं
विधातुमभ्यागमदुत्तरायणम् ।।४।।

निजेच्छया मृत्युवरं प्रपन्नो-
ऽप्यपेतभीर्भीष्मपितामहोऽपि ।
शरेषु सुप्तः समराङ्गणे श्वसन्
प्रतीक्षमाणोऽभवदुत्तरायणम् ।।५।।

धनुष्युपागते रवौ निवृत्तमङ्गलोत्सवा-
मिलामतीव शीतभीतसङ्कुचत्तनुद्युतिम्।
रसालकुन्द-पाटलप्रसूनसौरभोत्करैः
करोति गौरवान्वितां नितान्तमुत्तरायणम्।।६।।

कलिन्दनन्दिनीनिलिम्पसिन्धु सङ्गमस्थले
सनातनार्यधर्मकर्ममेदुरोत्सवाञ्चिते ।
मिलन्ननल्पकल्पनालसत्सतां समागमं
तनोति मङ्गलालयं पवित्रमुत्तरायणम्।।७।।

📖

## ७८.तासु तासु

स्वच्छाशया विजितमन्मथदुर्विकाराः
पुण्यक्रियासु सततोदितसद्विचाराः।
धन्याः स्नुषासु भगिनीष्वनुजप्रियासु
कन्यासु तुल्यमतयो वनितासु तासु।।१।।

विद्यास्ववद्यरहितासु कलास्वनल्प-
प्रीतिप्रदासु कवितासु रसोर्मिलासु।
चैरन्तनीषु विमलश्रुतिषु स्पृहावान्
रागं विवर्धयति कश्चन तासु तासु।।२।।

कालान्तरे परिणयात् पतिसद्मभूषा-
भूतासु पूतचरितासु गृहाद् गतासु।

मुग्धासु दुग्धहृदयासु मनोरमासु
पित्रोर्निसर्गमधुरा ममता सुतासु।।३।।

वासन्तिकानिलसमागमनन्दितासु
पुष्यत्प्रसून-मकरन्द-करम्बितासु ।
गुञ्जन्मिलिन्दमिलितासु सुपल्लवासु
नन्दन्ति कस्य न मनांसि लतासु तासु।।४।।

दाम्पत्यरागमधुरासवमोदितासु
वात्सल्यमुग्धहृदयासु गृहेन्दिरासु।
सेवाव्रतासु शुचितार्चितचेतनासु
श्रद्धां दधामि ललनासु न तासु तासु।।५।।

दीनोद्धृतौ मुखरितास्वपि कुण्ठितासु
घोरासु गर्हितदुरायतिदूषितासु।
को नाम नार्त्तिमयतेऽद्यतनप्रवृत्त-
मायामयीषु नृपनीतिषु तासु तासु।।६।।

वक्रोक्तिगर्भरचनावचनाञ्चितासु
नृत्यत्पदोल्लसितनूपुरझङ्कृतासु ।
ओजः प्रसादमधुरासु मुदं विधत्ते
कोऽलङ्कृतासु कवितासु न तासु तासु।।७।।

फुल्लारविन्दसरसीषु मिलिन्दमञ्जु-
गीतिष्वमन्दमुदितासु वनस्थलीषु।
रिङ्गत्तरङ्गतटिनीषु शरन्निशासु
कस्यान्तरं न रमते ललितासु तासु।।८।।

छद्मानृतापहृतिदुर्वचनार्चितासु
स्वार्थैकसाधनपरासु विजृम्भितासु।
अन्यापकाररचनोर्जितजीवितासु
स्निह्यन्ति नीतिषु न बुधा अपि तासु तासु।।९।।

# ७९.सम्भ्रमी बम्भ्रमीति

उन्मत्तं लोकशोकप्रदमहिषबलं सङ्गरे संहरन्ती
चण्डं मुण्डं गृहीत्वा जगति विदधती कन्दुकारम्भकेलिम्।
देवीं सम्पत्तिमाप्तेष्वपि विकटरणोत्साहमुत्सेधयन्ती
वन्द्या देवीन्दिरा वः शमयतु सकलं प्रस्तुतं वस्त्वशस्तम्।।१।।

मार्गे प्रत्यूहशैलं जवजनितमहाघातपातैः क्षिपन्ती
प्रत्यर्थिक्षेत्रजातेष्वतिशयमलिनं जीवनं पङ्कयन्ती।
धारासारैरसारे रजसि विलुलितां क्षालयन्ती धरित्री-
मुद्वेलं प्लावयन्ती जयति विजयिनी वाहिनी भारतस्य।।२।।

नो शान्ति न प्रसादं कलयति न कलामुज्ज्वलां मञ्जुकीर्त्तेः
सौभाग्यं नाभिवन्द्यं न च रुचिररतिं निश्छलाचारभाजाम्।
नैव श्लाघां दुरापामनुभवति कदाप्यात्मसद्बन्धवानां
न प्रीतिं न प्रतीतिं भजतिं परिजने सम्भ्रमी बम्भ्रमीति।।३।।

औचित्यं पालयन् यः सदपि परिभवैरर्दितोऽप्यात्मतुष्ट्या
स्थैर्येणैवात्मगेहे भजति निजजनैः सार्धमानन्दपुञ्जम्।
हुङ्कारोद्दामदर्पस्त्वमलमतिमतस्तापयन् स्वप्रतापैः
सन्तप्तो विह्वलोऽन्तर्जगति हतमतिः सम्भ्रमी बम्भ्रमीति।।४।।

शान्तस्वान्ताशयानामुपरि कटुतरं टङ्कयन् कण्टकाग्रान्
स्फोटं कोदण्डखण्डात् प्रकटयति पटुं चण्डदोर्दण्डपिण्डः।
कष्टं प्राणापहारप्रभृति निरुपमं प्रापयत् पुण्यभाजा-
मुद्दण्डो भारतीयान् दमयितुमनिशं सम्भ्रमी बम्भ्रमीति।।५।।

वाचाटो दुर्दुरूटो दुरितरतमना विग्रहायत्तचित्तो
भुट्टो लुण्ठाकभट्टो विघटनघटनो याहियापट्टशिष्यः।
शस्त्रास्त्रव्रातयाच्ञापटुरतिकरुणं निक्सने बद्धचक्षु-
श्चाओसाहाय्यमीप्सुर्जगति बहुतरं सम्भ्रमी बम्भ्रमीति।।६।।

हेम्नां वर्चोभिरर्च्या जयति वसुमति भव्यसौभाग्यभूमि-
र्धाम्नां पुञ्जैरजेया तरुणमणिगणैर्बांगलादेशलक्ष्मीः।

पापः पाकप्रधानो विकटभटनटैस्तामवज्ञातुमिच्छु-
र्देशे देशेऽस्त्रभिक्षुः समरसमरसः सम्भ्रमी बम्भ्रमीति।।७।।

प्रीता पौरस्त्यवंगप्रभवयुवजनेनार्चिता मुण्डमाल्यै-
र्नव्या स्वातन्त्र्यलक्ष्मीर्दिशि दिशि भुवने भ्राजते भूरिभाग्या।
यस्या वर्चस्वितायाः नवनवकिरणैरुष्णतेजोनिधानै-
श्चाक्षुष्याभाभिभूत्या विकल इव खलः सम्भ्रमी बम्भ्रमीति।।८।।०

## ८०. दिव्यौषधम्

सम्यक् त्रासयतोऽतिभीरुहृदयान् वन्यानधन्यान् मृगान्
कामं कम्पयतस्तरूनपि भृशं कण्डूयनैर्गण्डयोः।
पद्मं मर्दयतः किशोरकलभं भीतं स्फुटं कुर्वतो-
मातङ्गस्य मदज्वरप्रशमने सिंहोऽस्ति दिव्यौषधम्।।१।।

कोशाभ्यन्तररक्षितार्थनिचयैरुत्कृष्टलक्ष्मीवता-
मेवोत्कर्षमवेक्ष्य तान् वितरितुं सामान्यलोकेऽधुना।
मित्राणामपि गर्हणं स्वशिरसि न्यस्येन्दिरासाहसाद्
उक्त्वा राष्ट्रियसम्पदं कृतवती दैन्यस्य दिव्यौषधम्।।२।।

ज्योतिर्ध्वान्तचयस्य, वारि सुतृषः, क्षान्तिविरुद्धागसः
सन्तोषोऽर्थजुषो, विवेककिरणो जाड्यागमस्यान्वहम्।
निर्वाणोन्मुखदीपकस्य रुचिरस्नेहो, गिरो व्याकृति-
र्दुर्व्याधेःप्रथते रसायनमिहामोदाय दिव्यौषधम्।।३।।

उत्सेके दमनं, मनोजविजये धैर्यं, विलासे बलं,
चाञ्चल्ये स्थिरसंयमः, समुदये सर्वोदयाकांक्षिता।
भूतौ दानमुदारता च मनसः प्राप्तेऽधिकारे, द्विजे
निर्व्याजाचरणं भवे भवरतिर्गीयेत दिव्यौषधम्।।४।।

शासितानां कुलं व्याकुलं कुर्वतस्तामसं मानसं दुष्प्रभोः सर्वथा।
न प्रकाशेत तावत्स्फुटं निर्मलं यावदाप्नोति न ज्ञानदिव्यौषधम्।।५।।

# ८१.वेदाभिधानं महः

विज्ञानप्रसरेण भौतिकसुखासङ्गं भृशं वारयद्
गाढध्वान्तसमाकुलस्य जगतस्त्रासं निरस्यन्नवम्।
आत्मज्योतिरनाकुलं विशदयत्त्यागे समृद्धादरं
भूयो भारतवर्षमाशु कुरुताद् वेदाभिधानं महः।।१।।

श्रद्धां साधु विवर्धयेदतितरां वर्णाश्रमे निर्मले
संस्कारे श्रुतिबोधितेऽपि नितरां प्रीतिं समुल्लासयेत्।
हिंसामाशु निवारयेन्निरुपमां मैत्रीं जनेषून्नयेद्
आचारे रमयेन्मनः सुमनसां वेदाभिधानं महः।।२।।

स्वाध्यायेऽनुरतिं, प्रतीतिममलाचारे, सतां सङ्गतिं,
प्रीतिं प्राणिनि, दुर्गतेऽतिकरुणां, मैत्रीं दृढां सद्गुणे।
कल्याणे प्रणयं नितान्तविनयं वृद्धे, रिपौ विक्रमं,
सत्ये सख्यमतिस्थिरं विशदयेद् वेदाभिधानं महः।।३।।

# ८२.महती महार्घता

वनस्पतेरद्यतन - प्रचारणाद्
घृतं मृतं गोपकुमारभारते।
पयोऽप्यपायाभिमुखं प्रवर्तते
प्रवर्धते यन्महती महार्घता।।१।।

घृतस्य दुग्धस्य कथापि केवलं
व्यथामजस्रं तनुते प्रजास्वलम्।
न लभ्यतेऽन्नं जठराग्निशान्तये
कुतोऽभ्युपेता महती महार्घता।।२।।

न भेषजं नापि जलं न भोजनं
न वस्त्रमप्यद्य सुलभ्यमस्ति नः।
समाजवादस्य गुणानुवादना-
दुपस्थितैषा महती महार्घता।।३।।

पयो न विदन्ति निकाममर्भका
न वा युवानो मुदितामुपासते।
न तूलगर्भं स्थविरा हिमागमे-
ऽप्यहो लभन्ते, महती महार्घता।।४।।

प्रयत्नशीलेऽपि जनानुमोदिते
प्रशासने सा सुरसेव निष्कृपा।
मुखं विवृत्योत्सहतेऽद्य भक्षितुं
जनं कपीन्द्रं महती महार्घता।।५।।

रिपूत्तमाङ्गं चरणेन मृद्नती
रणाङ्गणे या विजयश्रियार्चिता।
विजित्य तामप्युदितांशुमिन्दरां
हसत्यजेया महती महार्घता।।६।।

न काव्यधारासु मनोऽवगहते,
न लीयते शास्त्रविचारसंहतौ।
न वा रतिर्गानकलाविलासिते,
विचिन्तितैका महती महार्घता।।७।।

कथं भवेदन्नमहो कथं तथा,
पटः कथङ्कारमहो चिकित्सितम्।
इतीव चिन्तापरिवृद्धिमन्थरं,
करोति दैन्यं महती महार्घता।।८।।

# ८३. धवलितम्

प्रबोधं सम्प्राप्ते भवगति रमायाः परिवृढे
समायातैर्हंसैः सरसि कुमुदैश्च प्रमुदिते।
घनान्तेनानन्ते निरतिशयशोभामुपगते
शरज्ज्योत्स्नापूरैर्जगदिदमशेषं धवलितम्।।१।।

स्रवन्तीनामोघैरुपचितपरीवाहसलिलैः
स्फुरद्विद्युद्वल्लीललितजलदासारनिवहैः ।
तिरोधानाद् धान्याङ्कुरतृणगणानामपि भृशं
प्रवाहैर्मुक्ताभैरवनितलमेतद् धवलितम्।।२।।

गते श्यामश्यामे जलदतरुणे क्वापि निभृते
चलल्लीलालास्ये विगलितविलासे च शिखिनाम्।
इदानीमुत्फुल्लैः सितकचनिभैः काशकुसुमै-
र्वनप्रान्तं भूम्याः शिर इव नितान्तं धवलितम्।।३।।

# ८४.त्वयि स्थिरगुणे

आशापूर्त्तिकरेऽपि, सिद्धमुनिभिः सेव्येऽपि भव्याशयः,
सच्छायेऽपि, समुच्छ्रितेऽप, विहगश्रेणीशरण्येऽप्यलम्।
सर्वश्लाघ्य, वर प्रशंसितगुणोऽप्येकोऽस्ति दोषो महान्
नान्येषां सहसेऽन्तिके स्थितिमतां द्रूणां कदाप्युन्नतिम्।।१।।

कौशेयैर्वसनैर्महार्हमुकुटैरुद्यत्प्रभावः प्रभुः
स्वस्मिन्नातनुतेऽभिमानुमुदितं पश्यन् विपन्नान् जनान्।
दीने हीनगुणे नितान्तमलिने दृश्ये ह्यसौ पूज्यते
सूचीभेद्यतमोवितानवितते दीपप्रभद्योतते[१]।।२।।

अत्यन्तोन्नतभूरुहोच्चशिखरारोहेण चेद्वायसः
सर्वान् हंसमयूरकोकिलशुकान्निन्दन्सुखं विन्दति।
एतद् भङ्गुरमित्यपेत्य पिशुनैस्त्याज्यं सतां गर्हणं
रात्र्यन्ते दिवसो दिनान्तसमये यामाहि विभ्राजते ।।३।।

---

१. पाठान्तार : कीट/दीपोऽपि/सूर्यायते।

माता दित्सति मोदकान् प्रतिशिशुव्रातं पवित्राशया
किन्त्वेकः प्रबलो विलुण्ठति करादाच्छिद्य भुङ्क्ते सुतः।
अन्ये वीक्ष्य तदीयसाहसकलां क्रन्दन्ति युध्यन्ति वा
मात्स्यन्यायपरम्परा प्रचलति प्रायोऽधुना भूतले।।४।।

स्थूलः प्रांशुतरोऽतिशक्तिनिलयो मेधाविनामग्रणीः
सौम्यो नात्मबलेऽपराध्यति महारण्ये वसन् सिन्धुरः।
अस्थाने न बलप्रदर्शनपरो नान्यान् मृगान्घर्षयन्
प्रीतस्तिष्ठति नैव युध्यति विना हेतुं मृगेन्द्रायितुम् ।।५।।

# ८५ .होलोत्सवः

सम्यग्विस्मृतभारतीयसमुदाचारादपेताध्वनां
यूनां वृत्तविवेकबोधविनयाधानावधीनुज्झताम्।
छात्राणामिह राजकीयपुरुषैर्दुर्वारजल्पक्रमो
विद्यामन्दिरसुन्दरे परिसरे जागर्ति होलोत्सवः।।१।।

अद्यत्वे नगरीषु वैभववतां गेहेऽथवा वर्त्मनि
प्रायेणापकथातिसाहसविधिप्राणापहारादिभिः ।
कामं शोणितकर्दमैः प्रसृमरज्वालावलीविभ्रमै-
र्धूलीभिर्युवविक्रमाङ्कचरितैर्जागर्ति होलोत्सवः।।२।।

नाश्लेषः सुहृदां न कुङ्कमलवालेपोऽपि रक्तात्मनां
नो मातङ्गकुलेषु निर्मलहृदां स्पर्शोऽपि हर्षप्रदः।
नो दुग्धं न घृतं न चापि मधुरं मुग्धं फलं नोत्तमं
नोल्लासो मनसो न पानकरसः को नाम होलोत्सवः।।३।।

शुद्धं वस्तु न लभ्यतेऽद्य विपणौ मूल्यं परं वर्धते
दुर्भिक्षं विकृताननेन जनतामत्तुं समुज्जृम्भते।
सामान्यजनजीवनं न रमते न प्रीयते सज्जनो
विश्वासःक्रमते न बन्धुषु ततः को नाम होलोत्सवः।।४।।

सम्मानेऽपगते शमे शकलिते, दीप्ते प्रतीपानले
लीने दुर्लभकौशले, समुचिताचारे चिरं निद्रिते।

सद्भावे प्रलयं गते, खकुसुमप्रख्येऽथ सख्येऽधुना
म्लाने कीर्तिमुखे, सुखेऽपि विमुखे को नाम होलोत्सवः।।५।।

प्रान्तेषु प्रचुरेषु भारतभुवो दुर्भिक्षकोलाहला-
दार्त्ते कोट्यधिकेऽधुना न जठरज्वालां निरोद्धुं क्षमे।
दैन्ये शासनसैन्यमर्दनपरे दग्धे विदग्धे जने
स्वार्थान्धे जननायके विलुलिते लोके क्व होलोत्सवः।।६।।

हन्तुं मानवतां पदा दलयितुं दैवीं शुभां सम्पदं
मर्यादामपहर्त्तुमस्थिरयितुं सामाजिकीं प्रक्रियाम्।
दुर्वादैः कलिकौतुकैर्निरुपमैः पङ्कप्रलेपैर्नवै-
रुष्णैः शोणितवर्षणैरनुदिनं जागर्ति होलोत्सवः।।७।।

कामे कन्दलिते, नितान्तदलिते धर्मेऽर्थतन्त्रे प्रिये
मुक्ते मङ्गलतुन्दिले कवलिते काये निसर्गोज्ज्वले।
स्वेच्छाचारविचारकौतुकजुषः पुंसः स्त्रिया विभ्रमै-
रद्यत्वे प्रतिसद्म नन्दतितरां प्रायेण होलोत्सवः।।८।।

श्लिष्यन् पुष्पवतीं मन्दान्धमधुपैराचुम्बितां वल्लरीं
लोकान् संस्नपयन् रजोभिरमलान् स्नातानुलिप्तानपि।
कामं मञ्जुलमञ्जरीषु मदिरामाचामयेत् सद्द्विजान्
पञ्चेषु परिपूजयन्नृतुपतिः प्रीणाति होलोत्सवः।।९।।

गोधूमोऽपि तिरोहितोऽद्य निभृतं क्वाज्यं स्वराज्ये पुनः
क्षीरं क्षीणतमं सिताप्यवसिता रम्भापि जम्भारये।
का वार्त्तास्ति फलस्य निष्फलतमे जातेऽधुना जीवने
दैन्ये नृत्यति मूल्यवृद्धिसमये को नाम होलोत्सवः।।१०।।

दग्धं चेन्न मनोमलं न च रजः सम्मार्जनीभिर्हृतं
रागेणेश्वरसंश्रयेण विमलं स्वान्तं न चेद् रञ्जितम्।
अप्राप्तप्रणयाश्लिरेण दलिता नालिङ्गिताश्चेद् दृढं
व्यर्थस्तद् बहुजल्पितेन विजयापानेन होलोत्सवः।।११।।

दुष्पूरे जठरेऽर्धनग्नवपुषि प्राप्ते जरामक्रमात्
नित्यं दुर्वहगेहभारवहनात् सुप्ते प्रियाविभ्रमे।
लालाक्लिन्नतयापि शुष्कवदनेष्वर्भेषु चीरावृते-
षूच्छ्वासं श्रयतां विपन्नगृहिणां खेदाय होलोत्सवः।।१२।।

दुर्व्यापारशतेन शान्तमनसामातङ्कमातन्वतां
सङ्घीभूय मुदैव पङ्किलयतां सामाजिकं जीवनम्।
लोकानन्दनसाधनानि दहतां, शब्दान् सदारुन्तुदान्
निःशङ्कं वदतां, मदेन चरतामाभाति होलोत्सवः।।१३।।

धूलीधूसरितोऽन्नपानविकलो भूमौ शयानोऽन्वहं
तारुण्येऽपि गतस्मितोऽद्य मनुजो भग्नेप्सितो भारते।
सद्यानैर्भ्रमते, पयांसि पिबते, स्वच्छां तनुं बिभ्रते,
रामालिङ्गनचुम्बनैर्मदयते, तुभ्यं शुनेऽसूयति।।१४।।

# ८६ .लास्यम्

रोमाञ्चकञ्चुकमुदञ्चति शीर्षभाग-
मान्दोलयत्युपहरत्युरु साधुवादम्।
रङ्गे निमज्जयति नूपुरनादरम्यं
दिव्याङ्गनावलितविभ्रमवल्गु लास्यम् ।।१।।

वासन्तिकानिलसमागमसस्मिताना-
मारुण्यपूर्णपरिधानविभूषितानाम्
उद्यानवीथिषु विजृम्भितवल्लरीणां
कस्याभिनन्दति मनो न मनोज्ञ लास्यम्?।।२।।

स्वार्थप्रपञ्चभरिते कलिकौतुकेऽस्मिन्
सर्वत्रनग्नमिह ताण्डवमेव वीक्षे।
अद्यानवद्यमिह केवलनाट्यशास्त्रे-
ष्वाबद्धमेव परितः प्रतिभाति लास्यम्।।३।।

# ८७ .यज्ञोपवीतम्

न विद्या, न वृत्तं, न चित्तं पवित्रं,
प्रियं सत्यमेवामृतं चेन्न वाक्यम्।
न च त्यागवृत्तिस्तपो निर्मलं नो
कुतो रक्ष्यते तर्हि यज्ञोपवीतम्।।१।।

सदाचाररक्तैरुदारान्तरङ्गै-
र्मुदा ब्रह्मविद्यानुरागप्रसारैः।
प्रशान्तैः समप्राणिसेवाव्रतैश्च
द्विजै रक्षणीयं स्वयज्ञोपवीतम्।।२।।

दृषद्भित्तिकासु प्रसह्यारिभिर्ये
चिरं शायिता हन्त, जीवन्त एव।
कुले सम्प्रभूतैः प्रभूतैस्तु तेषां
मुदे रक्षणीयं स्वयज्ञोपवीतम्।।३।।

शिखासूत्ररक्षासु संदीक्षितानां
द्विषः खड्गलेखाभिरुत्खण्डितानाम्।
परं तुष्टये भव्यसम्भावनाभि-
र्द्विजै रक्षणीयं स्वयज्ञोपवीतम्।।४।।

अशेषस्य विश्वस्य तत्त्वानि सम्यक्
तथैव श्रुतेर्दिव्यसन्देशरत्नम्।
सदा चिन्तयद्भिः परात्मप्रतीकं
गले धार्यते पूतयज्ञोपवीतम्।।५।।

अजेयानि जित्वेन्द्रियाणि, प्रगल्भं
मनश्चात्मवश्यं विधाय स्ववश्यम्।
उदग्रैषणां मर्दयित्वा पदाभ्यां
द्विजै रक्ष्यतामात्मयज्ञोपवीतम्।।६।।

न कार्पाससूत्रप्रणीतं स्वरूपं
द्विजानामिदं बोधकं लिङ्गमात्रम्।

परं वन्द्यसूत्रात्मनो विश्वमूर्त्ते-
र्वपुर्धार्यते दिव्ययज्ञोपवीतम्।।७।।

गुणानां गणं स्कन्धदेशे स्वधर्म-
प्रतीकं प्रबोधप्रभारत्नसूत्रम्।
अनर्घं निधानं च शीलस्य बिभ्रद्
द्विजो राजतेऽद्यापि यज्ञोपवीतम्।।८।।

धनं यातु, यातु प्रशास्तृप्रभावो
लयं यातु भव्या विशालापि शाला।
परं राजतां श्रेयसां सन्निधानं
निधानं गुणानां च यज्ञोपवीतम्।।९।।

न भूभागमात्रस्य संरक्षणेनो-
दयो भारतस्याधुनाप्यर्थनीयः।
अशान्तेरसन्तोषवृत्तेः प्रजानां
विनाशाय रक्ष्यं तु यज्ञोपवीतम्।।१०।।

समत्वानुभूतेः प्रभूतप्रभावं
सदा प्रेमवृत्तेः सुवृत्तं पवित्रम्।
तपोज्ञानतेजोनिधानं विधानं
शुभानामिदं पाहि यज्ञोपवीतम्।।११।।

चिराद् भारतोदारसद्बोधरत्न-
प्रभोद्भासकं नाशकं तामसानाम्।
श्रुतेः सौरभं लोभनीयं गुणानां
गणं वन्दतां वन्द्ययज्ञोपवीतम्।।१२।।

सुकृतशतनिधानं मन्त्रसिद्धिप्रधानं
सुमति-गति-निदानं सर्वसंस्कारसारम्।
विदितनिगमतत्त्वाचार्यसामीप्यतन्त्रं
सवनसमुपनीतं नौमि यज्ञोपवीतम्।।१३।।

कलिकवलितशीलं त्यक्तमर्यादमार्य-
प्रथितकुलयुवानं भोगमात्राभिमानम्।
गतशमदमवित्तं घोरसंघर्षसक्तं
पुनरुपशमयेद्द्राक् ब्रह्मयज्ञोपवीतम्।।१४।।

भवतु भुवि समृद्धं भारतं यन्त्रतन्त्रं
फलतु फलमनल्पं नव्यविज्ञानवल्ली।
परमिह परमात्मप्रीतिरीतिप्रसारं
जयतु शुभनिधानं ब्रह्मयज्ञोपवीतम्।।१५।।

# ८८ .दक्षिणा

सिंहीदृप्तमृगेन्द्रमप्यनुपदं प्रेम्णा विधत्ते वशे
क्रूरं दस्युमपि प्रणर्तयतियल्लीलवती लीलया।
शुद्धं ब्रह्म मृशं प्रपञ्चनिरतं माया करोत्यञ्जसा
चण्डांशोरपि चण्डतां व्यपनयह्यायदिग् दक्षिणा।।१।।

नाट्यैः सर्वविधैर्विगर्हिततमैर्लब्ध्वोत्तमणादि ऋषां
राष्ट्रस्याभ्युदयस्थले कतिपये पुष्णन्ति कोषं निजम्।
अत्यन्तोन्नतशासनासनसमासीनैः स्वदेशश्रियो
लुण्ठाकैरपहृत्यवेतनधनं सम्मन्यते दक्षिणा।।२।।

श्रौतस्मार्तमहामखेषु निखिलेनामूलचूलक्रिया-
पौर्वापर्यविधानसाधनसमाधानेन विद्यावताम्।
आहुत्या, श्रुतिमन्त्रमञ्जुलसमाम्नायेन पूर्त्या क्रतो-
र्हर्षोत्कर्षभरेण याज्ञिकजनैः प्रस्तूयते दक्षिणा।।३।।

यूनोः प्रीतिमयेऽध्वरे प्रणयिनी तिर्यग्दृशा वीक्षणं
निर्माणं रतिमण्डपस्य, मधुरालापश्च मन्त्रध्वनिः।
अन्योऽन्यप्रणयप्रबोधनपटुः कान्ताङ्कसङ्गोत्सवः
स्वाहाकारविधिश्च चुम्बनमुरोजालिङ्गनं दक्षिणा।।४।।

दलेऽखिले नृत्यति नेतरि स्थिरे
जने विभिन्ने कलिकीलितोद्यते।
ज्वलत्यशेषेऽखिललोकवासिनि
दुरन्तदुःखस्थितिरद्य दक्षिणा।।५।।

न यागविद्यापटुता पुरातनी
न वैदिकी बुद्धिरशुद्धिनाशिनी।
न कर्मकाण्डेऽभिरुचिर्न सन्मति-
स्तथापि काम्याऽमितभूरिदक्षिणा।।६।।

न शिष्यवर्गस्य जडत्वहारिणी
क्रिया, प्रियानापि वितन्यते मतिः।
सदसदाचाररतिर्न साध्यते
गुरोस्तथापीप्सितभूरिदक्षिणा ।।७।।

देशान्तरेऽपि जनितो मुदितान्तरङ्गो
वेदोक्तसंस्कृतिमुपासितुमीहमानः।
चित्ते चिरं स्थिरयितुं शुचितां सुचारु-
सद्वृत्तमाप्तुमिव वाञ्छति शुद्धिकामः ।।८।।

यो भारतीयभुविलब्धजनिर्मनुष्यो
विस्मृत्य सर्वमपि जीवनशुद्धिहेतुम्।
स्थूलेषु भौतिकसुखेषु विवृद्धतृष्णः
कृष्णार्पणव्यसनमुज्झति मोहमग्नः।।९।।

आस्तां स्थिरं रजतनिर्मितचारुपात्रं
वर्तिर्नितान्तविमलाज्वलनानुकूला ।
स्थाने निरुद्धपवनेऽपि घनान्धकारं
स्नेहं विना किमपसारयति प्रदीपः।।१०।।

# ८९ .मयूरः

उदयति कविमेधे सूक्तिशम्पासमृद्धे।
नवनवरसपूरं वर्षति क्लान्तभूमौ।।१।।

जयति युगलजिह्वाऽऽस्वादसञ्जातहर्षः।
सहृदय इव नृत्यारम्भरम्यो मयूरः।।२।।

किं रे भुजङ्ग! निजजिह्मगतिप्रभावान्-
नीडे शयानमपि हंसि विहङ्गवृन्दम्।
सर्वं क्षणात् क्षयमुपैति सहायुषा ते
प्राप्तोऽधुनाऽधिविपिनं बलवान् मयूरः।।३।।

कान्तावलीललितविभ्रममङ्गलेऽपि
काले कदम्बमुकुले विपिनान्तराले।
दुर्वारमारमपि मारयितुं समर्थ
आरण्यको जयति कोऽपि यतिर्मयूरः।।४।।

न तावदारोहति शृङ्गमुन्नतं समुन्नतेर्लब्धपदोऽपि पूरुषः।
न यावदुन्नायकनायकान्तिके निधीयते जोषमुदात्तदक्षिणा।।५।।

# ९० . काकली

समुल्लसन्मञ्जुरसालमञ्जरी-
मरन्दबिन्दुस्नपितां मधुश्रियम्।
प्रसादयन्ती स्तुतिगीतमङ्गलै-
र्विराजते कोकिलकण्ठकाकली।।१।।

समृद्धिसंवर्धितरामणीयके
नवीनदाम्पत्यविराजिताजिरे ।
तनोति शोभां विरलद्विजोल्लसन्-
मुखार्भकाकुण्ठितकण्ठकाकली ।।२।।

सदर्थविश्लेषणलब्धगौरवं
चिरन्तनं शास्त्रमहावनान्तरम्।

विभासयत्युन्मदमाधुरी झरी
सुधारसस्यन्दिकवीन्द्रकाकली ।।३।।

सुरभिमञ्जरिताम्रवनावनी
मधुसमेधितमादनतानुता ।
जयति कोकिलकण्ठविनिर्गता
कलकलोल्लसिता कलकाकली।।४।।

जयति दुर्गतिहेतुमकुण्ठितां
विविधसंहरणास्त्राबिभीषिकाम्।
परिभवत्यखिलश्रवणामृतं
मधुसमृद्धकला कविकाकली।।५।।

मलयमारुतनन्दितवल्लरीं
कुसुमसौरभमेदुरिताञ्चलाम् ।
जनयतीव नवामिव मेदिनीं
प्रमुदितामुदिता पिककाकली।।६।।

शिशिरशीर्णदलापहृताम्बरां
धरणिमुज्झितहर्षपरम्पराम् ।
किसलयैः कुसुमैर्मुखरद्विजै-
र्मदयतीव मधौ पिककाकली।।७।।

सदृशवर्णतया भुवि वायसे
परभृते च भिदा नहि जायते।
पिककुलं तु वसन्तमहोत्सवे
पृथगलङ्कुरुते कलकाकली।।८।।

विपदुदग्रविषादविषोग्रता
मनसि यस्य चिरं प्रतितिष्ठति।
न च कदाचन तस्य सुखप्रदा
भवति कोमलकोकिलकाकली।।९।।

# ९१.अमृतकणाः

चिन्तां स्वजीवनविधेरपनीयचित्ता-
न्मातः सरस्वति! निनादय मञ्जुवीणाम्।
यत्सर्वथोन्नतिकृते तव बद्धकक्ष्यो
जागर्ति भिक्षुरपि नर्तयितेन्दिरायाः।।१।।

व्यर्थं कमर्थयसि किं मृगतृष्णकाभिः
सम्मोहितो भ्रमसि निन्दसि किं स्वभाग्यम्।
अन्यं कमाश्रयसि लब्धुमभीप्सितं स्वं
चेच्छङ्करस्त्वयि विभर्ति कृपामकम्पाम्।।२।।

दोषाकरोऽपि भवता शिरसा गृहीतो
भूषास्थलेऽधिकृत एव सदा द्विजिह्वः।
अङ्गीकृतं जगदुपेक्षितवस्तु सर्वं
गृह्णासि किं न भगवन्निह मां तथैव।।३।।

प्लक्षप्रियङ्गुवटपिप्पलतालसाल-
हिन्तालशाल्मलितमालतरून्विशालान् ।
आनन्दकाननगतानपि जीर्णशीर्णा-
नुत्कोरकानकृत दक्षिणमारुतोऽद्य।।४।।

त्वय्यागते मलयचन्दन! सन्निधाना-
दामोदिताः सुमनसो मदयन्ति भृङ्गान्।
मूका अपि द्विजवरा मधुवर्षि गीतं
गायन्ति काननसमृद्धिमथोन्नयन्ति।।५।।

मेरौ मरौ जलनिधावपि तुल्यधारां
वारां किरन्तमतुलं घनमुल्लसन्तम्।
त्वां चातकस्य शिशुरर्दति बद्धरागो
न प्राप्य विन्दुमपि वारिद! जीवनस्य।।६।।

स्म्यग्वितीर्य चिरसञ्चितकोषरत्नं
पुष्णासि वारिधर! भूरुहमुच्चशीर्षम्।
स्वल्पेन जीवनरसेन परन्तु तन्वीं
वल्लीमिमां किमभिषिञ्चसि नाद्वितीयाम्।।७।।

वासन्तिकेन पवनेन सुलालितेयं
नृत्यत्यनल्पकुसुमस्तबकस्मितास्या ।
विस्तारयत्यनुपमां ललितां दिगन्ते
मुग्धीकरोति कविकल्पलता विदग्धान्।।८।।

# ९२. सुभाषितानि

भ्रातर्नाविक! दुस्तरामतितरां कल्लोलिनीं लङ्घितुं
श्लाघ्यानेव जनान् सतामभिमतान्नावि त्वमारोहयेः।
चेदेकोऽपि दुरन्तपातककुलानुष्ठाननिष्ठो जनो
दैवादत्र समेति हन्त! सुजनैः सार्धं तरिं मज्जयेत्।।१।।

माकन्द! त्वदुदारतामिव महाशाखां विशालां श्रयन्
दिग्भ्योऽभ्येत्य खगः परस्परमतिप्रेमाङ्कुरं वर्धयन्।
कीर्त्तिं ते सकलासु दिक्षु वितरंस्त्वत्कोटरस्थायिना
सर्पेण प्रतिहन्यते यदि ततः कीदृग् यशस्ते भवेत्।।२।।

उत्फुल्लैः कमलैर्मरन्दमुदिरैर्गुञ्जद्भिरेवालिभि-
र्हंसैः सारसमण्डलैर्मुखरितैः सच्चक्रवाकैर्द्विजैः।
लक्ष्मीं कामपि बिभ्रदुज्ज्वलजलै रम्यं समृद्धं सरो
दुर्भाग्यायतनं करोति नितरामेकोऽपि भेको वसन्।।३।।

नीचाः सन्ति सहस्रशोऽधिभुवनं किन्तु क्षमाक्षामता-
हेतुः श्येन! भवादृशो न विदितो बन्धून् मुधा मारयन्।
नो रक्तासवपानपीनपरमोत्कण्ठा न मांसाशन-
प्रीतिस्फीतरुचिश्च तेऽस्ति तदपि क्षीणान्निहंसि द्विजान्।।४।।

स्तम्भे निःसारतैवानिलमिलनवशाद्दीर्यते ते सुपत्रं
वन्ध्यत्वं जीवनस्य प्रकटयति फलोत्पत्तिराद्यैव सद्यः।
नो छाया नापि शाखा न खलु सुमनसः सौरभं लोभनीयं
रम्भे, किं गर्वगन्धं भजसि निजमनस्याशु नश्यद्विभूत्या।।५।।

कीर्त्तिः का तव का च सिद्धिरतुला विश्वस्य सम्प्रीणने
काये का सुषमा सुदुर्लभतरा का लोककाम्या स्थितिः।
लक्ष्मीः का वनदेवतास्तुतपदा का माधवाराधिता
शोभा तेऽस्ति पिकेति पृच्छति मुहुः काकाध्वनिर्वायसः।।६।।

सच्छायद्रुमकृन्तनाय परशुर्दग्धोऽपि वैश्वानरे
भूयश्चायसपिण्डताडनसहस्तीक्ष्णो भवन् भ्राजताम्।
तावन्नैव भयं ततो न लभते यावत्स तक्ष्णः करं
दुष्टः किन्तु परापकारकरणे ह्येकोऽप्यनीकायते।।७।।

ये स्वार्थप्रतिपत्तये प्रतिपलं नव्यानभव्यानपि
प्रह्वीभूय महाप्रभूननुनयन्त्युच्चावचैः कर्मभिः।
निन्द्यास्तेऽपि परन्तु हन्त सुजनोत्कर्षासहिष्णुः खलो
व्यर्थं सर्वहितक्षयाय विचरन् गर्हास्पदं जीवति।।८।।

प्रीतिर्मास्तु परानुरक्तहृदये दाक्ष्यानभिज्ञप्रभो-
र्मा सेवावसरोऽस्तु दैन्यविनतिः नैवास्त्वदातुः पुरः।
श्रद्धा दम्भिनि मास्तु मास्त्वरसिके काव्यामृतप्रापणं
वैमुख्यं परमेश्वरात्र भवतु ब्रह्मन्निति प्रार्थये।।९।।

वन्यं स्वादुतृणं न लभ्यमधुना ग्रासो न घासस्य ते
प्राप्यं नैव कडङ्गरं न सुरभे पेयं जलं शीतलम्।
नो पूजा न समादरो न परमा सेवा न रक्षाव्रतं
चित्ते नैव विचिन्त्यतां शुनि यतो रक्तः प्रभुः साम्प्रतम्।।१०।।

# ९३.प्रणामाञ्जलिः

यः संभूय महाकुलेऽपि महतां सङ्गे वसन् साक्षरः
प्राप्योच्चैः पदवीमपि प्रतिपलं कौटिल्यलीलारतः।
स्वार्थान्धोऽथ परापकारनिरतो जाग्रद्व्यलीकाशय-
स्तस्मै मानवताविनाशपटवे दूरात् प्रणामाञ्जलिः।।१।।
गेहे यस्य शुभाशयाः परिजना वश्यः प्रशस्यः सुत-
श्छायेवोत्तमवल्लभा प्रणयिनः सद्बन्धवो निश्छलाः।
कायोऽनामयमण्डितः सहृदयः स्निग्धः सुहृत्सेवकः
श्रद्धालुः प्रभुरत्युदारहृदयस्तस्मै प्रणामाञ्जलिः।।२।।

# ९४ .वन्दामहे

दूरादेत्य परिभ्रमन् प्रतिसुमं यत्नात्तदीयं रसं
कोशे सङ्गमयन् मिलिन्दनिवहो विन्दत्वमन्दां मुदम्।
सर्वस्वं प्रतिपादयन्ति मुदिता दीनाय ये चार्थिने
धन्यास्ताननतिदुर्लभान् नरवरान् सप्रेम वन्दामहे।।१।।
रम्यारामवरे निसर्गसुषमा राजन्ति ये भूरुहा
धन्यास्तेऽपि समाश्रयन्ति ललिताः फुल्ला लता यान् सदा।
दीर्घे किन्तु मरुस्थले तरुवरैर्वल्लीभिरप्युज्झिते
छायामात्रफलं द्रुमं वयमिमे तोषाय वन्दामहे।।२।।

## द्वितीयं सोपानम्
## शतकानि

# ९५.श्रीअरविन्दशतकम्

वन्देऽरविन्दनयनं नयनाञ्जनाभं
वन्देऽरविन्दनिलयां निलयाधिलक्ष्मीम्।
वन्देऽरविन्दकुसुमासनमादिदेवं
वन्देऽरविन्दसुषमां सुरभारतीं च।।१।।

मृद्वी रसार्द्रहृदया ललिता कलाभि-
र्मुग्धा श्रिया मरकतांशुकमादधाना।
दाम्ना चिराद् वलयिता प्रियपद्मिनीनां
श्यामेव राजतितरामिह बङ्गभूमिः।।२।।

रत्नप्रसूर्विपुलशालिसमृद्धशोभा
मीनाम्बुजोल्लसितपुष्करिणीभिराढ्या।
रम्भाभिनन्दितपदा धृतनारिकेला
केलिस्थली जयति काचन मञ्जुतायाः।।३।।

सर्वासु कोमलकलासु नदीष्णतायाः
सिद्धिः समुल्लसति यत्र जगत्प्रणम्या।
तर्काटवीषु विहरन्मृगराजशौर्य-
गर्जापि तर्जयति यत्र महामतङ्गान्।।४।।

या कोमलापि परुषा मधुरापि तीक्ष्णा
क्रान्तिप्रियापि शुभशान्तिनिशान्तलक्ष्मीः।
प्राच्यां स्थितापि धृतपश्चिमदिग्विभूति-
र्दिव्यप्रसूतिरपि मानवमानभूमिः।।५।।

नीराजिताः सुमनसः सुरसिद्धिलक्ष्म्या
गौराङ्गदेवमधुसूदनरामकृष्णाः ।
सम्पूजिता जितजगद्विभवा विवेका-
नन्दारविन्दयतयो मतिमत्समाजे।।६।।

पूजास्पदं सुमनसामभिमानभूमि-
र्विद्यावतां नृपतिलक्ष्मणसेनसंसत्।
अद्यापि मानसमलंकुरुते कवीनां
हेमारविन्दकमलेव मरन्दवन्द्या।।७।।

वैज्ञानिके जगति विश्रुतनामधेयं
ध्येयं सुधीन्द्रनिवहैर्जगदीशचन्द्रम्।
वन्दे रवीन्द्रमपि विश्वकवीन्द्रमेक-
मुन्नायकं भरतभूतलभाललक्ष्म्याः।।८।।

स्वातन्त्र्ययुद्धविजयाय लसत्प्रताप-
श्चण्डांशुतामुपगतोऽत्रसुभाषचन्द्रः ।
श्यामाप्रसाद उदयाय च मातृभूमेः
श्यामाप्रसाद इव कोऽस्त्यपरो जगत्याम्?।।९।।

लोकोत्तरैरनुपमाचरितैरसंख्यैः
संख्यावतां सदसि पूज्यपदैरुदारैः।
दीव्यत्प्रभैः पुरुषरत्नवरैर्वरेण्यै-
रुद्भासिता जयति बङ्गवसुन्धरेयम्।।१०।।

अस्या नमस्यकमलामलदर्पणश्री-
र्भोगीन्द्रवृन्दपरिवर्धितराज्यलक्ष्मीः।
धन्या धरायुवतिभालतले ललाम-
सिन्दूरविन्दुरिव राजति राजधानी।।११।।

वैदेशिकैरधिकृते खलु भारतेऽस्मिन्
संवर्धितानि नगराण्युपकूलमब्धेः।
अद्यापि यानि विपुलानि समृद्धिमाञ्जि
गण्यन्त एव कृतिभिर्भुवनान्तराले।।१२।।

यन्त्रैर्विशालभवनैः पथिभिः प्रशस्तै-
र्भव्यापणैर्विपणिभिर्नृपमन्दिरैश्च।
विद्युत्प्रभाभिरथ यानसहस्रभेदैः
प्राच्या विभूतिरिव राजति कालिकाता।।१३।।

आंग्लाधिपप्रतिनिधिप्रणयोपभोगी
पद्मालयाधिकृतसद्गुणदामबद्धः ।
तत्रान्वयो वसुमतां वसुबान्धवाना-
मद्यापि भाति नितरामभिजातवन्द्यः।।१४।।

कालाद्बहोः परवशीकृतभारतस्य
स्वस्थः क्रमोऽपि सहसा लुठतिस्म लोके।
झञ्झानिले प्रचलिते सुदृढोऽपि वृक्ष
उत्पाटितः पतति पङ्किलभूमिभागे।।१५।।

दृक् पूरिता परुषपांसुकणैरजस्रैः
पुंसां प्रभञ्जनरयेण तु भारतस्य।
अभ्युद्गतो जगति पश्चिमदिग्विभागाद्
वातो हि शातयति दर्शनशक्तिमक्ष्णोः।।१६।।

कर्त्तुं करे विपुलमर्थमथाधिकारं
लोकतिगं किमपि कौशलमाप्तुकामः।
सप्ताब्दिकं स्वतनयं परिशिक्षितुं द्राग्
इंग्लैण्डमुन्नततमं जनको न्यवेशीत्।।१७।।

तस्मिन्नवप्रणयिनि प्रथितेऽपि वंशे
जाता स्पृहाभिनवशासनदक्षतायाः।
रीतिं पुराणपुरुषार्चितभारतस्य
त्यक्त्वाग्रहीदनुकृतिं नृपसभ्यतायाः।।१८।।

राष्ट्रे चिरात् परवशेऽतिपवित्रवृत्ते
बालस्य चेतसि न यावदुदेति रागः।
ऋद्धं समुन्नतमतिं स्पृहणीयरूपं
तावद् ब्रिटेनमुपसंगमितोऽरविन्दः।।१९।।

अष्टादशेऽल्पवयसि प्रविशन् स्वपित्रो-
राकांक्षितं सफलयन्निव बुद्धियोगात्।
सर्वोच्चशासनपदे प्रथमार्हतां स
प्रापत् प्रवीणविदुषामपि विस्मयाय।।२०।।

निष्पक्षपातविधिनैव परीक्षितेषु
च्छात्रेष्वनुत्तमपदं प्रतिपद्य सद्यः।
अश्वाधिरोहणविधौ विमते परन्तु
तत्याज कृत्स्नमपि गौरवमूलभूतम्।।२१।।

सम्प्रेषितः स्वजनकेन करेऽधिकर्त्तुं
सौभाग्यहेतुमधिकारमलभ्यमिद्धम् ।
भिन्ने मते सपदि सर्वमिदं विहाय
स्वाभाविकं स्वगरिमाणमुरीचकार।।२२।।

आमन्त्रितःसबहुमानतया बड़ौदा-
भूमीश्वरेण तिलकेन नरेन्द्रतायाः।
अङ्गीचकार पदमुन्नतमर्चितोऽयं
मानी वृणोति हि समादरमेव नार्थम्।।२३।।

यूरोपमण्डलविमण्डितभव्यभाषास्वासीत्
स षट्सुनिपुणोऽधिवसन् ब्रिटेनम्।
तेजस्विनी प्रकृतिरन्यजनैर्दुरापां
सिद्धिं झटित्यधिकरोति हि बुद्धिभाजाम्।।२४।।

अल्पीयसापि वयसातिकुशाग्रबुद्ध्या
वृद्धैर्जनैरपि सुदुष्करकार्यसिद्धिम्।
क्षिप्रं प्रशासनविकाससुयोजनाद्य-
रध्यापनादिभिरयं प्रकटीचकार।।२५।।

कार्यं यदेव कुरुतेस्म तदेव सम्यग्
जातं फलेन सहितं हितसाधनेन।
अस्मिन् प्रशासति चिराय नरेन्द्रलक्ष्मी-
रुल्लासपूर्णहृदयेव ननर्त राज्ये।।२६।।

कार्यान्तराणि विधिवद् विदधत् स विज्ञः
प्राप्ताधिकार इह भारतभारतीषु।
तत्रापि देवगिरि गौरववर्धनेन
रागं स्वकीयमतुलं सततं ततान।।२७।।

वाचं सुधामुचमिमां महतीं सुराणा-
माचम्य संस्कृतिमुदारतमां पपौ सः।
प्राच्यप्रतीच्यसुविचारपरम्पराया
एवं बभौ परमपावनतीर्थराजः।।२८।।

दूरे स्थितोऽप्ययमतीव पितुः प्रयासात्
पाश्चात्यनव्यतमसभ्यतया गृहीतः।
यां संस्कृतिं नहि विवेद पुरा पुराणीं
तत्रैव पूर्णमतनोदनुरागमूत्कः।।२९।।

नारोपितो गुणगणः सहजां प्रवृत्तिं
रोद्धुं समर्हतितरां नितरामलङ्घ्याम्।
सम्यक् प्रतापितमपि प्रसभं किमम्भो
निर्वापणाय न भवत्यनलस्य शश्वत्?।।३०।।

अर्थाधिकारजननेऽप्रतिमं नरेन्द्र-
सम्मानवैभवसमर्पणसिद्धिपीठम् ।
त्यक्त्वा पदं स दुरवापमपि प्रकामं-
प्रत्यागमच्चिरसमीहितबङ्गभूमिम् ।।३१।।

आंग्लाधिपप्रथितसंस्कृतिसभ्यतादि-
सम्पत्समृद्धकुलसेवितकालिकाताम्।
राष्ट्रोदयाय परिशिक्षणमन्दिरस्य
प्राचार्यतामनुबभूव जनानुरोधात्।।३२।।

श्रद्धाभरैः सपदि भारतमातुरङ्घ्रेः
पाशं दृढं श्लथयितुं परतन्त्रतायाः।
मृत्योर्मुखेऽपि पतितुं कृतनिश्चयानां
क्रान्तिप्रियप्रणयिनां शुशुभेऽग्रद्तः।।३३।।

दुःशासनेन पवनेन समिद्धमन्यु-
वह्नौ बभूव घृतमेव स बङ्गभङ्गः।
यज्ज्वालया कवलिता मनुजेन्द्रलक्ष्मीः
शोभां निजां निरुपमामपि नाभिमेने।।३४।।

यो लोकमान्यतिलकेन सहोग्रवादि-
वर्गस्य नायकपदं सहसाधिकृत्य।
आन्दोलनं प्रचलितं तु [1]चतुःस्वरूपं
भूपप्रतीपमतुलं प्रबलं चकार।।३५।।

क्रान्तिस्फुलिङ्गमयवर्णभरैः समृद्धं
पत्रं स दैनिक[2]मलंकृतमुच्चभावम्।
प्रारभ्य भव्यजनवन्दितकीर्त्तिरेखा-
मासादयन्निखिलदेशसमर्चिताङ्घ्रिः।।३६।।

एतादृशे ब्रिटिशशासननाशदक्षे
क्रान्तिप्रियेऽतितरुणे ज्वलदग्निकल्पे।
वैदेशिकः प्रबलशासक एव राज-
द्रोहाभियोगमनयन्नयवर्त्म हातुम्।।३७।।

मुक्तःसकृत्, पुनरपि प्रबला[3]भियोग-
बद्धो निरुद्धचरितो बत बन्दिगेहे।
तत्र स्थितः स 'भगवानथ वासुदेवः
सर्वं, पवित्रमनसाऽनुबभूव सम्यक्।।३८।।

साक्षात्कृतः स भगवान् करुणावतारः
कारागृहं निवसता विमलाशयेन।
येनातिदुर्लभ उदग्रमहात्मवर्यो
लोकेन कौतुकवता स सता व्यलोकि।।३९।।

---

१. *स्वदेशी, असहयोगः राष्ट्रीयशिक्षा, विदेशिबहिष्कारश्च।*
२. *वन्देमातरम् नामकं दैनिकं पत्रम्।*
३. *अलीपुरबमकाण्डम्।*

सन्दर्शने भगवतो न विभावनीयं
चित्रं मनागपि सतां चरितानुविद्धम्।
अन्तःस्थितोऽपि हि गुणः समये समग्र-
शक्त्योन्नतो भवति पावनमानसानाम्।।४०।।

कारागृहात् प्रतिनिवृत्य स कर्मयोगिन्
साप्ताहिकं विधिवदांग्लगिरा व्यतानीत्।
येन स्वराष्ट्रहितसाधननीतिनिष्ठां
प्रासारयत् सकलभारतवासिचित्ते।।४१।।

धर्माख्यमन्यदपि पत्रमुदारबङ्ग-
वाचा प्रकाश्य जनतान्तिकमाजगाम।
भाषाद्वयेन युगपद्विहितप्रयासः
स्वातन्त्र्ययुद्धविजयाय स दीक्षितोऽभूत्।।४२।।

कालान्तरे भरतभूमिविचारराजि-
रत्नावलीवलयितं वरणीयमार्यम्।
पत्रं सदर्थरमणीयतमैर्निबन्धै-
रुद्भासयन्नतुलगौरवमुद्दधार ।।४३।।

देशे चिरात्परवशेऽपि न मानवीय-
कल्याणकारिचरिताज्जनताऽपरक्ता।
बद्धे करेऽपि वसुधैककुटुम्बताया
औदार्यमेष हृदयेऽनुबन्ध शश्वत्।।४४।।

कीर्णे चिरादवकरेऽप्युपरिप्रदेशे
गर्भे बिभर्त्ति वसुधा बहुमूल्यरत्नम्।
कायेषु धूसरतमेष्वपि पार्थिवेषु
ज्योतिर्मयी स्फुरति कापि परात्मकान्तिः।।४५।।

मृत्योरुदग्रकरुणाविमुखस्य शश्वत्
प्रेम्णश्च युद्धमधिकृत्य नितान्तकान्तम्।
काव्यं नवीनतममांग्लगिरा विधाय
विश्वं स्वभारतगुरोर्विदधेऽद्य शिष्यम्।।४६।।

वाल्मीकिमादिकविमर्पितरामवृत्तं
व्यासं च भारतविभूतिभरैः स्फुरन्तम्।
श्रीकालिदासमपि विश्वकवीन्द्रवन्द्यं
व्याख्यातवानुचितचारुसुचिन्तितेन ।।४७।।

आंग्लाधिपेन सततं समुपद्रुतोऽगात्
फ्रान्सीयचन्द्रनगरं प्रति गुप्तरीत्या।
क्षिप्रं ततोऽपि परमेश्वरनोदितोऽयं
प्रापच्चिराय वसतिं प्रियपाण्डिचेरीम्।।४८।।

आध्यात्मतत्वपरीक्षणदत्तयोगं
योगं समभ्यसदसौ नियमेन सार्धम्।
प्राप्तश्च सिद्धिमिह वर्षचतुष्टयेन
सूक्ष्मार्थमैक्षत सुदिव्यदृशा समस्तम्।।४९।।

अन्तर्मुखः सततमाप्तजनाभिवन्द्यो
योगेश्वरोऽयमचिरेण ऋषित्वमाप्तः।
तत्रारविन्दसुकृताश्रममश्रमेण
संस्थाप्य हस्तयुगलेऽर्पयतिस्म मातुः।।५०।।

त्यक्त्वान्यशीर्षकनिबन्धनिबन्धनानि
योगे स्वशिष्यजनसंशयमेव हातुम्।
आत्मानुभूतममलार्थविचारमात्र-
मुल्लेखितुं प्रयतवान् स यदा कदाचित्।।५१।।

आहृत्य बाह्यविषयेषु रतं स्वचित्तम्
आत्मानुचिन्तनपरः परमः स योगी।
इत्थं समाहितमनाः शनकैर्जगत्यां
लग्नं मनः सपदि सुस्थिरयाञ्चकार।।५२।।

लोकव्यथाहरणदिव्यरसायनाख्यां
यद्यप्ययं सदुपदेशकथामनेकाम्।
व्याख्यातवांस्तदपि यं परमेश्वरस्य
सन्देशमाह स तु पूर्णतयाऽद्वितीयः।।५३।।

कारागृहं निवसतः करुणावतारः
कल्याणपूर्णवचनं परमेश्वरो मे।
व्याहृत्य कर्णकुहरेषु समादिदेश
नव्यां सुधामिव भवत्सविधेऽभिधातुम्।।५४।।

*भारतीयो निजस्वान्ते शक्तिसौहार्दवर्धनम्।*
*'वन्देमातर'मित्येव प्रेरकं वाक्यमुच्चरेत्।।५५।।*

बाह्यं समस्तमपि शस्तमशस्तरूप-
मध्यात्मबोधपरिपन्थि विहाय कृत्यम्।
साक्षाद् विधातुमिह निर्मलमात्मतत्त्व-
मावाहयत् स भगवाननुकम्पया माम्।।५६।।

किञ्चिन्मया सुमनसां भवतां समाजे
गीतोक्तमैव सुविचिन्त्य निवेदनीयम्।
ईशं सिषेविषति यः सुकृती स जह्याद्
द्वन्द्वं समग्रमपि दुःखसुखात्मकं द्राक्।।५७।।

श्रद्धामुपासनविधिं च समेत्य लोके
धर्मान्तरं प्रचलतीति न संशयोऽत्र।
श्रेयस्करो विजयते परमेष 'हिन्दू-
धर्मो' विमुक्तिमुपहर्त्तुमशेषपुंसाम्।।५८।।

प्रत्यक्षजीवनमिदं सुकृतं नराणा-
मित्याकलय्य तु पुरा प्रथितो ध्वजोऽस्य।
धर्मं प्रवर्तयितुमेव पुनर्जगत्या-
मेतं सनातनमयं स्फुरतीव देशः।।५९।।

आत्मानमेव सकलोपरि राजमानं
द्रष्टुं समभ्युदयमेत्यधुनैष देशः।
शक्त्या व्यवस्यति परन्त्वपनेतुमन्तः-
क्लेशानशेषजनजीवनतापहेतून् ।।६०।।

बाधिष्यते न च कदाप्यसमर्थदेशान्
अन्यान् स्वविक्रमसमुन्मिषितावलेपात्।
उद्धर्तुमेव सकलानपि शोकशङ्कून्
सर्वात्मना प्रयतिता दलिताशयानाम्।।६१।।

धर्मामृतं सपदि पाययितुं नराणां
निःश्रेयसाय विषमापनयान्नियन्तुम्।
देशोऽयमुन्नतिमुपैति मनुष्यतायाः
कल्याणमाकलयितुं परमार्थबुद्ध्या।।६२।।

अर्थेषु चिज्जडमयेष्वखिलेषु शश्वद्
व्याप्नोति वह्निरिव दारुषु सर्वशक्तिः।
सर्वत्र तिष्ठति परात्पर एव देव-
इत्यादिशत्यनुपदं मनुजान् स्वधर्मः।।६३।।

आत्मन्यवस्थितमधीश्वरमेतमेव
सर्वोऽवलोकयतु सर्वजगन्निवासम्।
येनाद्रियेत परमेश्वरमन्दिरं तन्
मत्वा समस्तजनजातमजातदोषः।।६४।।

कुर्वे समस्तमपि कृत्यमहं परेशो
न त्वं न चान्यपुरुषः कुरुषेऽत्रकिञ्चित्।
इत्यादिदेश भगवान् मयि सानुकम्पो
मां हातुमेव निखिलाकुलतां मनस्तः।।६५।।

अभ्युद्गतेष्वपि निरन्तरमन्तराये-
ष्वास्थाय कर्मणि मनोऽभिनिवेशमेव।
नैराश्यसान्द्रतिमिरावृतदृष्टिशक्ति-
रप्यादधीत धृतिमात्मनि जागरूकः।।६६।।

हेयं भयं स्वमनसो विकलत्वहेतु-
स्त्याज्यो विनाशपिशुनोऽखिलसंशयो द्राग्।
नास्त्येव किञ्चिदपि कष्टमजेयमत्र
नासम्भवं किमपि तिष्ठति कर्मठस्य।।६७।।

नारायणः स्वयमहं निवसामि देशे
राष्ट्रोदयाय सकलानहमेव युञ्जे।
सर्वं भवत्यनुपदं परमेच्छया मे
नान्योऽवरोद्धुमिह किञ्चिदपि क्षमेत।।६८।।

भूयोऽपि मां स भगवानवदीद् यदद्य
धर्मं सनातनमहं पुनरुन्नयामि।
सन्तोऽवतारिपुरुषा निजजीवनेन
सिञ्चन्ति यं त्वमृतगर्भफलानि लब्धुम्।।६९।।

धर्मोऽयमेव सकले जगति प्ररूढं
सान्द्रान्धकारमपनेष्यति दिव्यभासा।
ईशप्रतीतिमथ सर्वजनेषु मैत्री-
मुद्भावयिष्यति भुवोऽभ्युदयाय शीघ्रम्।।७०।।

धर्मेण जीवति सदैव विशेषदेशो
धर्माय सर्वमपि सोढुमभिप्रवृत्तः।
देशोदयेन सह पूर्णतयैक्यमाप्तो
धर्मोदयो भवति-नात्र विचारणास्ति।।७१।।

राष्ट्रोन्नतिं भुवि सनातनधर्मवृद्धि-
मन्योन्यमिश्रणवशात् परिकल्प्य लोकः।
पर्यायमेव मनुते यदि तर्हि सत्यं-
सत्यावलोकललितां दृशमाससाद।।७२।।

संक्षालयन्ति चरणं सततं समुद्रा
यस्या भुवस्तिसृषु दिक्षु लसत्तरङ्गाः।
आभासते हिमगिरिर्दिशि चोत्तरस्यां
दिव्यालयस्त्रिदशवन्दितदेवतात्मा ।।७३।।

अत्रादितः सुचरितार्जितपुण्यकीर्त्ति-
रार्यो जनो वसति भूमिसुतोऽभिवन्द्यः।
तामार्यजातिमभिरक्षितुमेष धर्मो
दत्तो मयैव जगदभ्युदयाय कामम्।।७४।।

जातेन चात्र मनुजेन समर्चितोऽपि
ख्यातो गुणेन तु सनातनविश्वधर्मः।
सर्वत्र सञ्चरति मानवताहिताय
येनातिपावनतमो विगतव्यलीकः।।७५।।

आरम्भतः प्रभृति भौतिकवादतत्त्व-
माविष्कृतं नवविचारककल्पनञ्च।
स्वीकृत्य सम्यगवधारणया विवेका-
दध्यात्मभावमभिनन्दति देश एषः।।७६।।

सम्यग् विचिन्त्य विनिवेदितमस्ति जीवो
ब्रह्मैव नापर इति श्रुतिडिण्डिमोऽस्ति।
तत्कर्मणापि तदुपासनयापि तत्त्व-
ज्ञानेन चाप्यधिकरोति पुमान् परेशम्।।७७।।

मृत्योरलंघ्यमनुशासनमाशु जित्वा
लोकोत्तरममरतां जनताधिकुर्यात्।
विश्वप्रपञ्चरचनाभिनये नियुक्ता
स्वां भूमिकामभिनयेदिति धर्मशिक्षा।।७८।।

राष्ट्रं स्वधर्म इति भिन्नतयाप्यभिन्नः
पर्यायमेव सुधियः प्रतिपादयन्ति।
एकस्य जागरणमन्यविबोधमेव
ध्यायन्ति धीरमतयो यतयोऽन्तरङ्गे।।७९।।

कारागृहं निवसता परमेश्वरस्य
सन्देश एव कथितोऽद्य मया भवद्भ्यः।
श्रद्धा परेशपदयोः समुपासना च
ख्याता विदां सदसि राष्ट्रियता, न नीतिः।।८०।।

वैदेशिकेन खलशासननायकेन
संप्रेरिता यवनजातिसभाऽतिवक्रा।
धृत्वा दुराग्रहमखण्डमिदं स्वराष्ट्रं
खण्डं चकार नितरामविचारमूलम्।।८१।।

एतत् पुरा शकलितं विपुलं स्वराष्ट्रं
भूयोऽप्यखण्डमचिराद् भवतीति भावात्।
योगीश्वरोऽयमखिलेश्वर पादपद्म-
मभ्यार्चयत् स्वजनुषोऽन्तिमवासरेषु।।८२।।

दुर्नीतिदुष्फलरसं परिपीय मत्तो
लोकः स्वबन्धुभिरलं कलहायमानः।
शक्तिक्षयं परमुखेक्षणमेव कुर्वन्
स्वातन्त्र्यरत्नमपि निक्षिपतीव धूल्याम्।।८३।।

स्वाभाविकेतरममान्यमिमं विभागं
देशस्य सत्वरमपास्य विरोधमूलम्।
भूयोऽपि भारतमिदं क्रियतामखण्ड-
मार्योचिताचरणचर्चितचारुवृत्त्या ।।८४।।

इत्यादिवस्तुविशदं सुविचारपूर्णं
स्वातन्त्र्यजन्मदिवसे निजराजधान्याम्।
व्याख्यानमुत्तममदाज्जनताहिताय
स्वाभीष्टलाभमुदितो यमिनामुपास्यः।।८५।।

पाश्चात्यसंस्कृतिसमादृतमानसोऽपि
पौरस्त्यधर्मपरिपालनबद्धकक्ष्यः ।
यो राजनीतिगगने तपनायमानो-
ऽप्यध्यात्मतत्त्वपरिशीलनरक्तचित्तः ।।८६।।

दिव्येन सौरभभरेण दिगन्तलक्ष्मी-
मामोदयन्, प्रमदयञ्च सुधीन्द्रभृङ्गम्।
उल्लासयन्नतुलभारतभव्यभालं
कीर्तिश्रिया विजयते भुवनेऽरविन्दः।।८७।।

व्याख्यातुमुत्तमतया मनुजस्वरूपं
लोकोत्तरप्रणयमुज्ज्वलमुक्तिहेतुम् ।
ङ्क्यो निर्मलप्रतिभया ललितार्थबन्धं
सन्धाय बन्धुरतमं व्यदधात् सुकाव्यम्।।८८।।

शब्दार्थगुम्फपरिकल्पितदिव्यदाम्नि
निःष्यन्दमानमधुविन्दुमुपाददानः ।
अत्यन्तशस्तमपि काव्यरहस्यवस्तु
कोऽन्योऽर्पयेन्मधुकराद् रसिकव्रजाय।।८९।।

यो जन्मना वसुकुलं विदधे समृद्धं
पूतं स्वदेशमपि पूततमं चकार।
लोकप्रशासनकलामपि निर्विकारा-
मात्मानुशासनविधामनुतिष्ठतिस्म ।।९०।।

धर्मानुगोऽप्यखिलधार्मिकसंघधुर्यो
योगीश्वरोऽपि सततार्जितलोकयोगः।
भोगस्पृहाविरहितोऽपि नितान्तरक्तो
भोगीन्द्रतल्पचरणे शरणायमाने।।९१।।

योगीश्वरस्य जननेन समृद्धिमाप्तं
स्वातन्त्र्यजन्मदिनमेव तु भारतस्य।
विश्वस्य सान्द्रतिमिरक्षपणाय दिव्य-
ज्योतिः प्रसारयतु सर्वसुखैकबीजम्।।९२।।

विद्यां विवर्धयतु बुद्धिमलभ्यलाभं
सम्पादयत्वतितरां मनसोऽथ योगः।
क्रीडा शरीरबलमात्मजयं, तितिक्षां
स्फूर्तिं, धृतिं, समुदयं च तनोतु यूनाम्।।९३।।

स्वातन्त्र्ययुद्धविजयेन तु भारतश्री-
र्द्वीपान्तरेऽप्युपनयेत् प्रसभं प्रबोधम्।
रिक्थं सनातनमशेषजनैकसेव्य-
मार्षं प्रकाशयतु विश्वमुदारदीप्त्या।।९४।।

आविष्क्रियाप्रणयिनोऽभिनवैः पदार्थैः
प्राप्तश्रियोऽपि जगतः सुखशान्तिमूलम्।
अध्यात्मरत्नमचिरेण वित्तीर्य सम्यग्-
अद्यापि शिक्षयितुमर्हति राष्ट्रमेतत्।।९५।।

इत्येवमिद्धगुणधर्मविवेकरत्न-
मालां निधाय जगतो रमणीयकण्ठे।
शोभासमृद्धिमिह मानवतैकलक्ष्म्याः
सर्वात्मना सततमुन्नमयाञ्चकार।।९६।।

अध्यात्मकल्पतरुकल्पितमालवालं
धर्मामृतेन परिपूर्य यतीश्वरोऽयम्।
संक्षालयन् मलमशेषमनल्पपुंसां
स्वं जीवनं परमपावनमुत्ससर्ज।।९७।।

उच्चैः स्थितापि विबुधावलिवन्दितापि
द्यौरूर्जितापि यदि केवल भोगभूमिः।
तत्कर्मधर्मपरिपालनबन्धुरायाः
पूजां करिष्यति कथं न वसुन्धरायाः?।।९८।।

एतादृशां सुमनसां मकरन्दभाजा-
मङ्के चिरं निवसतां तनयोत्तमानाम्।
दिव्यप्रभास्नपनतोऽमलकान्तिरेखा
लेखार्चिता जयति भारतभूमिरेषा।।९९।।

अत्यन्तचञ्चलमनो विनियन्तुमद्धा
श्रद्धाभरेण सततं सुकृतं विधातुम्।
संकल्पमुज्ज्वलयितुं जनताहितानां
तीर्थस्थली जयति काचन पाण्डिचेरी।।१००।।

आमोदिता दश दिशो मधुपा दिगन्ताद्
आमन्त्रिताः सरसि कापि कृता समृद्धिः।
वाचालितं द्विजकुलं, मुदितां मरालः
संप्रापितोऽत्रभवता भवताऽरविन्द।।१०१।।

राजन्तु कोमलदलानि दृशोऽमृतानि
सौरभ्यभव्यभवनानि सुमानि लोके।
उद्बोधितं भुवि सहस्रकरेण किन्तु
कोषं मरन्दसुरभेररविन्दमीडे।।१०२।।

अध्यात्मरागमथ धर्मरतिं विभर्त्तुं
वैज्ञानिके पथि चरन्नपि देश एषः।
बन्धुत्वमेतु जनता कलहोऽपयातु
धान्यं, धनं, सुचरितं च विवर्धतां नः।।१०३।।

विद्यार्थिनां मनसि सुस्थितिमेतु शान्ति-
र्देशप्रशासनमतीव पवित्रमस्तु।
कल्याणमुल्लसतु विश्वजनाय शश्वद्
ऐश्वर्यमुद्भवतु भारतवर्षराष्ट्रे।।१०४।।

नि:सारभूतमपि पर्युषितं च भूयः
पुण्यात्मनां सुचरितेन पवित्रिताङ्गम्।
एतच्चतुर्थशतकं रसिकावलीनां
संजायतां मनसि मङ्गलवृद्धिहेतुः।।१०५।।

कापि प्रशस्तकविमण्डलमण्डनीय-
वृत्ताधुना विजयते कविभारतीह।
तत्किङ्करस्य रतिनाथकवेरुदारा-
मेतां गिरं सहृदयाः श्रुतिभिः पिबन्तु।।१०६।।

काव्योचितेन रमणीयगुणेन हीन-
मप्येतदस्तु भवतां प्रमदाय कामम्।
सामान्यमप्यभिनवं भुवि वस्तु जातं
चेतस्विनां मनसि कौतुकमातनोति।।१०७।।

# ९६. श्रीगांधी*शतकम्

रत्नाकरैर्वलयितां गिरिराजशृङ्गैः
सम्भावितां, नदनदीभिरलङ्कृताङ्गीम्।
शस्यैः प्रशस्यसुषमासमामरण्यै-
र्वन्दामहे सपदि भारतमातरं त्वाम्।।१।।

यस्या रजोविजयशालिरजोव्रजेषु
क्रीडापराः शिशुवरा मुदिता लुठन्तः।
सन्तो भवन्ति जनजीवनपावनाय
धन्यामनन्यसदृशीं धरणीं नुमस्ताम्।।२।।

*अव्युपन्नं प्रातिपदिकं गत्वात्र दीर्घं

सद्बन्धुता च समता च सुशीलता च
रोहन्ति यत्र भुवि कल्पलताभिरामाः।
सा भारतावनिरनर्घमणिप्रसूति-
र्भूर्वितनोतु जगतो ज्वलतो जवेन।।३।।

यन्त्राणि सन्तु विविधानि समृद्धदेशे
शस्त्राणि नूतनतमानि तथा स्फुरन्तु।
किन्तूच्चताप्रसविमानवतालताया
मूलाभिषेचनसुधा वहते त्विहैव।।४।।

सन्तोषकोषपतयोऽपरपोषसक्ताः
सेवाव्रताः सुकृतिनो विमलान्तरङ्गाः।
दीने दयार्द्रहृदया विपदि प्रसन्नाः
सन्तो जयन्ति जनतार्चितनायकास्ते।।५।।

सत्यानुरक्तहृदयो विजयाभिवन्द्यो
गीताप्रियो नरपराभवनाशहेतुः।
प्रेमप्रकर्षनिरतो विनतो नयज्ञैः
श्रीमोहनो जयति भारतभाग्यमूलम्।।६।।

दुःशासनापनयनिर्दलनैकचित्तो
दीनानुकम्पनपरोऽखिललोकनम्यः ।
श्रीमोहनः सततचालितचारुचक्रः
शक्रावलेपशमनो जयतीह शश्वत्।।७।।

वैदेशिकप्रबलशासनपाशबद्धे
सर्वार्थशोषणवशाद्दलितेऽत्रदेशे ।
श्रीकर्मचन्द्रपितुरङ्कमणिर्मनोज्ञः
प्रादुर्बभूव भुवि मोहनदासगाँधी।।८।।

बाल्येऽपि यस्य न कदापि मनो विलोलं
नो यौवनेऽपि हृदयं तरलं बभूव।
नैवानृतं वचसि चेतसि नाभिमानो
नान्तर्भयं निविशतेस्म, तमर्चयामः।।९।।

मातुर्निसर्गमधुरां करुणामुदारां
स्तन्यामृतेन सहितं परिपीय कामम्।
हिंसामलीकमवलेपकथां व्यलीकं
सर्वात्मना विजितवान् नितरामजेयम्।।१०।।

लक्ष्मीमिव प्रणयिनीं परिणीय मुग्धः
कस्तूरबां पतिपरायणचित्तवृत्तिम्।
रेमे चिराय परिहाय पितुर्मुमूर्षो-
रप्यन्तिकं मदनमोहितचेतनोऽयम्।।११।।

दाम्पत्यरागमदिरारसलम्पटोऽपि
स्वायुश्चतुर्थदशकादपि पूर्वमेव।
दुर्जेयकामविजयाय मतिं दधानो
मातृत्वमन्वभवदेष युवैव पत्न्याम्।।१२।।

मुग्धो विशुद्धचरितो नवनीतचित्तः
कृत्ये दृढो मितवचा रुचिरस्वभावः।
कौटिल्यकुण्ठितमतिर्गृहमार्जवस्य
छात्रो जगाम विधिबोधधिया विदेशम्।।१३।।

स्थित्वा ब्रिटेनभुवि बुद्धतदीयवृत्ति-
स्तद्बन्धनाद् द्रुतमुमुक्षुतया तितिक्षुः।
स्वप्रज्ञया समनुचिन्त्य च तन्निरासो-
पायानपायविमुखानवलम्बतस्म ।।१४।।

प्रागफ्रिकासु कृतवर्णविभेदरीति-
माश्रित्य सीदितजनान् द्रुतमुद्दिधीर्षुः।
आन्दोलयन्नभिनवैर्विधिभिर्विचित्रै-
श्चित्तं विजित्य नृपतेः फलवान् बभूव।।१५।।

आंग्लाधिपप्रबलदुर्मदतन्त्रदान्ते
स्वातन्त्र्यविस्मरणजन्यनितान्तशान्ते ।
देशेऽत्र शासनविरोधविधिष्वनल्प-
जल्पप्रकल्पनपरा न्यवसन्नयज्ञाः।।१६।।

केचिन्निहन्तुमखिलान् दमनैकचित्तान्
क्रूरान् प्रशासनजनान् विहितप्रतिज्ञाः।
व्यस्फोटयन्निह कदाचिदहो क्वचिच्च
'बम्' नामकास्त्रमतिदुर्घटसाध्यलाभम्।।१७।।

अन्ये विरोधमनुभावयितुं बहूनि
पत्राणि लार्डभवने प्रहितान्यकार्षुः।
मोघं श्रमं विदधतेस्म परेऽपि सिद्धि-
प्राप्तेरुपायमपरं परिचिन्तयन्तः।।१८।।

नो गोखलेर्न तिलको न च मालवीयो
नान्येऽपि विश्रुतमहामहिमान एव।
कुण्ठां निरोद्धुमशकन्निह भारतीय-
स्वातन्त्र्यसङ्गरविधावुदितां तदानीम्।।१९।।

स्वाधीनतासमरनायकलोचनानि-
व्याप्नोद् यदातिविकटो निविडान्धकारः।
आशास्तदा विशदयन् सहसाविरासीद्
भास्वानिवेह भुवि मोहनदास गाँधी।।२०।।

साम्राज्यभक्तजनमर्दितभावनाया
अस्पृश्यतोन्मिषितमानवताव्यथायाः।
पूर्णं श्रमं विदधतामपि दीनताया
उच्छ्वासराशिरिव राजति लब्धदेहः।।२१।।

शीतातपाद्यसहदुःखहतोत्सवानां
दुष्पूरणीयजठरानलतापितानाम् ।
आवासशून्यजनुषां दलिताशयाना-
मापद्विमोचनविधिर्विधिना कृतोऽयम्।।२२।।

आजानुबाहुमनिशं स्मितशोभिवक्त्र-
मात्मप्रणीतपटमण्डितगात्रयष्टिम् ।
बद्धाञ्जलिं सततचिन्तनशीलचित्तं
वित्तं समस्तजगतो मनसा स्मरामः।।२३।।

प्रौढेऽपि पण्डितवरेऽपि च देशभक्त-
व्राते व्रती च सुकृती च पदं दधेऽयम्।
नेतृत्वमस्य सकलैरपि नीतिनिष्ठै-
रङ्गीकृतं फलवदाशु विलोक्य मुग्धैः।।२४।।

योगाः श्रुतास्तु बहवोऽधिगमाय मुक्ते-
र्मोघास्तु देशमखिला अपि ते विमोक्तुम्।
इत्याकलय्य मनसा परिचिन्त्य शश्वद्-
उद्भावितोऽस्त्यसहयोग इतीह नव्यः।।२५।।

देशान्तरेऽप्यसहयोगविधिप्रयोगे
दुष्प्राप्यसिद्धिमुपलभ्य विवृद्धकीर्त्तिः।
आन्दोलनक्रममिहापि तथैव कर्त्तु-
मुद्योगमन्वहमुपाश्रितवानुदारम् ।।२६।।

ग्रामाधिके प्रचलिताधिकधर्मतत्त्वे
भाषाधिके विषमताधिकबाधितेऽस्मिन्।
देशे विशालवपुषि भ्रमणेन शश्वत्
कष्टां दशां नयनयोः पथि सोनयद् द्राक्।।२७।।

आभ्यन्तरान् गुणगणानवमत्य कृष्णा-
कारे जने विषमतामुपपादयत्सु।
गौराङ्गशासकनयेषु विरोधवृत्तिं
प्राचीकटद् गतभयो नितरामशक्याम्।।२८।।

राज्याधिकारपरिवर्धनलोलुपानां
मुग्धप्रजाधनहरांग्लनराधिपानाम् ।
ज्वालावलीमिव जनान् ग्रसितुं कुनीतिं
रोद्धुं महात्मघन एव समर्थ आसीत्।।२९।।

यानादिसाधनविहीनतयाऽत्यगम्ये
ग्रामे पदातिरपि यो भ्रमणं विधाय।
सुप्तान् जनान् झटिति जागरयन् वचोभिः
सज्जं चकार निजसैनिकसङ्घमिद्धम्।।३०।।

गतश्चम्पारण्यं कृषिरतशरण्यं गुणनिधिः
समुच्छेत्तुं नीलप्रवपनसमातङ्कलहरीम्।
जनस्वान्ते शान्ते शयितधृतिमुत्थाप्य वचसा
गताशङ्कं लोकं प्रथितपरितोषं विहितवान्।।३१।।

न चर्खां नो खादीं नहि हरिजनं नाप्यनशनं
न गां हिन्दुस्तानीं सविनयमवज्ञामपि न ताम्।
न चाहिंसाशस्त्रं न च नवनवान्दोलनविधिं
समर्थो विज्ञातुं जन इह न गाँधी यदि भवेत्।।३२।।

आन्दोलनं प्रथमविश्वविशालयुद्धात्
क्षीणप्रभे प्रभुवरे विहितं हिताय।
आपत्पयोधिविपुलोर्मिशताहतेऽरौ
शंसन्ति सङ्गरमरं हि जयाय विज्ञाः।।३३।।

हिंसापराङ्मुखहृदं दृढनिश्चयं च
सेवाव्रतं युवकसङ्कुलमुल्लसन्तम्।
उत्साहसाहसनिधिं नितरां सहिष्णुं
सैन्ये न्यवेशयदयं सदयोऽपि योद्धुम्।।३४।।

वैदेशिकापनयमाशु निहन्तुकामे
व्यग्रे जने निजपराक्रमबोधनार्थम्।
आन्दोलनं प्रबलमाद्यमवद्यहीनं
प्रारब्धवान् क्षपयितुं परतन्त्रतां ताम्।।३५।।

अन्यप्रशासनविनाशनदीक्षितोऽयं
देशो भृशं भयमपास्य बभूव लिग्मः।
त्रैवर्णिकध्वजविभूषितपाणिपद्मो
लोकः स्वनायकमुखं प्रसमीक्षतेस्म।।३६।।

श्रोतुः श्रवोग्रहणपेशलवेणुनादा-
न्नीता यथा युवजना यमुनातटेषु।
सर्वे तथात्वसहयोगमहाध्वरेऽस्मिन्
आह्वानतः समुदिता इह मोहनस्य।।३७।।

कार्यं समं स्वजनजीवनमूलभूतं
त्यक्त्वा सपद्युपगतेऽमितभारतीये।
ग्रामेषु सर्वनगरेषु ततो गरीयान्
आन्दोलनक्रम इहोपचितो विचित्रः।।३८।।

त्यक्त्वोन्नतेः प्रथमकारणभूतशिक्षां
छात्राः स्वपाठभवनाद्बहिराययुर्द्राक्।
क्रान्तिश्चिरं जयतु सञ्जयतान्महात्मो
गाँधीति तीव्रवचसाभृशमुन्नदन्तः।।३९।।

केचित् प्रशासनवितीर्णनिजैकवृत्तिं
सद्योऽपहाय बहिरीयुरपारहर्षाः।
कारागृहेषु गमनाय मतिं दधाना
दुर्यातनां बहुविधां वरयाम्बभूवुः।।४०।।

देशेऽतिशीलनिलया विनयप्रधाना
ये कल्पिता मृदुलशीतलधूलिकल्पाः।
प्राप्ते परन्त्ववसरे पुरुषैरशेषै-
र्ज्ञातास्त एव दहनोज्ज्वलचण्डपिण्डाः।।४१।।

एकस्य सैन्यनिकरः करनीतशस्त्रः
पक्षान्तरस्य पृतनाध्वजमात्रहस्ता।
अन्योऽन्यसञ्जयनतत्परभूरिवीरो
लोकोत्तरोऽयमभवत्समरस्त्वपूर्वः ।।४२।।

शारीरिकं परपराभवमेव सिद्धि-
मेके सदैव गणयन्ति गृहीतशस्त्राः।
अन्ये मनोविजयमेव जयं ब्रुवाणा
हिंसां विहाय रणकर्मणि संप्रवृत्ताः।।४३।।

एवं चलत्यनुपमे समरेऽथ चौरी-
चौराभिधे जनपदे जनता प्रमत्ता।
हत्वाऽऽततायिनमपि प्रथितामहिंसा-
नीतिं समापयदहो! प्रतिशोधवृत्त्या।।४४।।

हिंसात्मके युधि पराजयलाभमेव
मत्वाऽऽत्मनो दमनचक्रवशादुदग्रात्।
आन्दोलनं द्रुतमवारुणदात्मशक्त्यो
क्रोधोद्धतान् समवलोक्य जनान् स धीरः।।४५।।

आन्दोलनं यदपि पूर्णतया स्वतन्त्रं
कर्तुं स्वदेशमशकन्नहि वाञ्छनीयम्।
किन्तु प्रसुप्तजनजागरणोत्सवं तु
सर्वासु दिक्षु युगपद्रचयाञ्चकार।।४६।।

अन्तर्बहिर्विमलतां नितरां विधातु-
माधातुमात्मनि परात्मपदानुरागम्।
सत्यं सुखैकशरणाभरणं प्रवेदे
वव्रे प्रतीतिजननीं प्रथितामहिंसाम्।।४७।।

अध्यात्मयोगगुरुतानुगतामहिंसां
यो राजनीतिविषमे पथि वाहयित्वा।
स्वस्यानुचिन्तनमनन्यसमानमेवं
विज्ञापयन् जयति मौलिकतत्त्वबोधः।।४८।।

सम्राट्सभाभिमतलब्धनिमन्त्रणेन
कर्त्तुं स्वदेशविषये शुभमन्त्रणानि।
सम्प्रस्थितः सपदि भारतनायकानां
सङ्घो महात्ममहिमाञ्चितनायकत्वे।।४९।।

प्रत्यूषसि प्रबलशीतविकम्पिताङ्गा
आंग्लाधिपप्रमुखशासकनायकास्तम् ।
नग्नार्धदेहमवलोक्य मुदा हसन्तं
पोतेऽभ्युपेतवति ते चकिता बभूवुः।।५०।।

निःसम्बलं धवलवस्त्रविभातकायं
निर्मायमुज्ज्वलचरित्रमनल्पकीर्तिम् ।
प्रीतिप्रसादितमुखं विमुखं च भीत्या
भृत्या विलोक्य नृपतेरभवन् विमुग्धाः।।५१।।

पूर्णोन्नतोऽपि नितरां विनतो, नितान्त-
दीनोऽप्यदीनहृदयो मृदुरप्युदग्रः।
क्रान्तिप्रियोऽपि परिपोषितशान्तिशक्ति-
श्चण्डोऽपि कोमलतमो विललास शश्वत्।।५२।।

वैदेशिकं सुबहुमूल्यमतीव रम्यं
वस्त्रं विहातुमचिरं रुचिरानुबन्धः।
सम्पश्यतोऽमितजनस्य पुरः समन्ताद्
दाहं चकार जगरीषु गरीयसीषु।।५३।।

यः स्वावलम्बनविधिं विदधद् विधिज्ञः
कर्मण्यताप्रणयवान् जनतानुरक्तः।
विख्यातसाबरमतीपुलिनाश्रमस्थः
स्वातन्त्र्यमन्त्रजपसिद्धिमुरीचकार ।।५४।।

दुग्धं दुहन्ति सकलं विकलेऽपि वत्से
गोपा गवां कुलमलं नहि पालयन्ति।
गोदुग्धमेव परिवर्जयतिस्म तस्माद्
गोवत्सकेषु करुणाकलितान्तरङ्गः।।५५।।

यश्चानुसायमनुवासरमीश्वरस्य-
सम्प्रार्थनार्थविहितासु सभासु गत्वा।
स्तुत्वा हरिं सह जनैरुदितां समस्या-
मादाय किञ्चिदपि चिन्तयतिस्म शश्वत्।।५६।।

यो भारतीयशुभसंस्कृतिरक्तचित्तो-
ऽध्येतुं जनानुपदिदेश निलिम्पवाचम्।
अध्यात्मतत्त्वपरिचिन्तनजातबोधो
नो भौतिकेषु विषयेषु मतिं बबन्ध।।५७।।

येनार्यजीवनपरिष्करणाय कार्यं
सर्वासु दिक्षु युगपत् कृतमत्युदारम्।
आत्मानुरूपमभिरूपकुलं विशाल-
मुल्लासितं च ललितं जननायकानाम्।।५८।।

सामन्तमन्तुनवतन्तुविनिर्मितेन
जालेन दुर्यवनविग्रहदुर्ग्रहेण।
एतस्य देशसरसो धनमीनमाप्तु-
मांग्ले प्रयत्ननिरतेऽभवदेष विघ्नः।।५९।।

शान्तिप्रियोऽपि परपीडननिःस्पृहोऽपि
शाठ्यादपेतहृदयोऽपि दयान्वितोऽपि।
अन्यायतः सपदि योद्धुममोघशस्त्रं
योद्धुः करेऽर्पयितुमुद्यत एव सोऽभूत्।।६०।।

लोकस्य चेतसि चिरन्तनभीतिरीति-
मुत्सारयन्नभयपोषकसत्क्रियाभिः ।
दुर्नीतिशक्तिदमनाय विवृद्धरागा-
मुत्साहसाहसधनां जनतां चकार।।६१।।

आन्दोलनैर्नवनवैरसकृत् प्रयुक्तै-
र्मुक्तां दशां सपदि चेतसि भावयन्तम्।
लोकं विशोकविधिना परतन्त्रतायाः
पाशं विनाशयितुमन्वरुणन्महात्मा।।६२।।

भेदं विधाय जनतासु सदैव राज्यं
कर्त्तुं प्रयत्ननिरतं दृढशासनं तत्।
उच्छेत्तुमाशु जनजागरणं वितेने
प्रेम्णा विवेकविनयोर्जितवाग्गरिम्णा ।।६३।।

धर्मान्तराणि भजतां वदतामनेक-
भाषां च संस्कृतिमुपाश्रयतां विभिन्नाम्।
सङ्घं दृढं घटयतोऽस्य महाप्रयासा-
ज्जातैकता जगति विस्मयदायिनीह।।६४।।

दुःशासनस्य भवनं भुवनाभिनन्द्यं
त्यक्त्वाऽवसद्विदुरसद्मनि मोहनोऽसौ।
हित्वा तथायमपि धाम समृद्धिभाजां
भेजे सदा हरिजनावसथं प्रसन्नः।।६५।।

सर्वार्थसिद्धिजनके जननायकेऽस्मिन्
सेवारते महति सन्ततजागरूके।
वैदेशिकापनयरञ्जितचित्तवृत्ति-
रेको बभूव यवनः प्रतिकूलशीलः।।६६।।

शास्तुः कुमन्त्रपरिजल्पनजातरोषात्
सर्वात्मना मृदुनिसर्गविपर्ययाद्वा।
हिन्दूजनाज्जवनशात्रवदीप्तमन्यु-
र्देशं विभङ्क्तुमुरुधा यवनः प्रयेते।।६७।।

अङ्गीकृतेऽपि यवनीयहितानुबन्धे
सन्धिं विधातुमनिशं यतमानचित्ते।
दुर्मन्त्रणाहितहठो विकटान्तरात्मा
जिन्ना महात्मवचनं न कदापि मेने।।६८।।

अन्नैर्जलैर्निवसनैर्वसनैरजस्त्र-
मामोकतोऽपि यदि मातृभुवं विभङक्तम्।
सङ्कल्पमेव न जहौ सुजनानुनीत-
स्तत्रोचते न हठिने हितकारि कार्यम्।।६९।।

दुर्मन्त्रणाहितदुराग्रहिणी तदीय-
बुद्धिः सुतेव नृपतेरथ केकयानाम्।
प्राज्यस्वराज्यविलसत्कमलामकाले
प्राकल्पयद्विकलताकलितां विपन्नाम्।।७०।।

केचिद् विचाररुचिरा निजदेशभक्ताः
सक्ताः सदा समुचिताचरणेऽनुरक्ताः।
सद्राष्ट्रियानुरतिरञ्जितचेतसोऽत्र
भूताः प्रभूतयशसो यवनास्तदानीम्।।७१।।

एके नितान्तकुशला अपि शब्दशिल्पे
कार्यक्रमेऽपि रुचिरे शुचितामुपेताः।
नैवानुयायिनिवहैः परिपोषमाप्ता
आप्ता अपि प्रतिहता इव संभवन्ति।।७२।।

यस्यानुगो मतिमतां निवहो, वरेण्यः
कर्मण्यतैकदयितः, सुकृतानुरक्तः।
सेवाव्रती, समुदयोन्मुखशक्तिपुञ्जो
यूनां गणः, स्थविरवर्य, उदारचेताः।।७३।।

यस्मिन् स्वकर्मनिरते पुरुषोत्तमानां
माला श्रिया भरतभूमिमलञ्चकार।
सेषु स्फुरत्स्वपि महामहिमायमेषु
सम्पूजितो निखिलनायकनेयवृन्दैः।।७४।।

धन्यः स कोऽपि विबुधैर्धनिभिर्दरिद्रैः
पुंभिः, पुरन्ध्रिभिरथो तरुणैरनल्पैः।
सर्वात्मनार्पितबलः सबलः सुनेता
जेताऽसतां विजयते परिपूजनीयः।।७५।।

देवाङ्गनाहृदयहारिविहाररङ्गे
दीव्यद्विजालिकुलकेलिलसत्तरङ्गे ।
राजीवराजिपरिराजितकान्तकाये
को मानसे सरसि राजति हंसतुल्यः?।।७६।।

दंष्ट्रकरालवदनेन जगज्जिघत्सौ
काले द्वितीयमिह विश्वविशालयुद्धम्।
आचार्यकैर्हिटलरैः प्रथितं समिद्ध-
मातङ्कविस्मयविधायि समन्ततोऽभूत्।।७७।।

ज्वलाकरालदहनेन रणेन नून-
मूनीबभूव जगतो महतोऽवलेपः।
तत्राप्यनारतमजेयतया स्फुरन्ती
दृप्ता ब्रिटेनपतिना पतितोन्नतापि।।७८।।

कालानलप्रसरदुत्कटतीव्रतीव्र-
ज्वालावलीकवलितांग्लनरेन्द्रलक्ष्मीः ।
स्थैर्यं स्वधैर्यमचिरेण परित्यजन्ती
क्षीणा मृतेव च भृशं सहसा बभूव।।७९।।

शस्त्रस्फुलिङ्गचयदग्धविदाधवीरे
धीरे परन्तु समरे जयिनि ब्रिटेने।
स्वातन्त्र्यमाप्तुमखिलं खलु जन्मसिद्धं
प्रास्तौन्नृपप्रतिनिधेर्धुरि धुर्यनेता।।८०।।

क्षीणोऽप्युपार्जितपराभवमर्दितोऽपि
शास्तुर्गणो गणयतिस्म न भारतीयान्।
दर्पान्धतामुपगतोऽपि तु नेतृवर्गं
बन्दीचकार विपरीतमतिप्रभावात्।।८१।।

कारागृहे नियमिते निजनेतृवृन्दे
मर्माहतेव जनता जनतापशान्त्यै।
आन्दोलनं परमतीव्रमभूतपूर्वं
गर्वापहं नरपते रचयाञ्चकार।।८२।।

उद्दण्डराजपुरुषापकृतिप्रचण्डः
कल्लोलिनीहृदयवल्लभकल्पलोकः ।
उल्लंघ्य बन्धनतटं विसरत्प्रवाहः
कल्पान्तकाल इव संप्लवतेस्म भूमौ।।८३।।

न्यायालयेषु नृपतेर्भवनान्तरेषु
विद्यालयेषु निलयेषु च शासकानाम्।
राष्ट्रध्वजं सपदि रोपयितुं प्रवृत्तो
लोकोऽन्तकस्य शिरसि स्वपदं निधाय।।८४।।

उत्साहसाहससमेधितदीधितीड्यो
मर्यादया विरहितः सहितो हितेन।
लोको विशालभरतावनिमण्डलस्य
बन्धं द्रुतं श्लथितवान् परतन्त्रतायाः।।८५।।

मुक्तेषु तन्निखिलभारतनायकेषु
सन्धेः कथातिकुटिलेन पथा प्रवृत्ता।
प्रज्ज्वालिते यवनजातिविमन्युवह्नौ
बङ्गाभृशं ददहुरेव पतङ्गितास्ते।।८६।।

तदा नोआखालीमनलकलनाभिः कवलय-
न्नसिप्रासैर्हिन्दूजनमनपराधं विकलयन्।
शिशूनां नारीणां स्थविरतरुणानामपि मुदो
हरन् प्राणान् मत्तो यवनजन आसीद् यम इव।।८७।।

अन्योऽन्यमारणपरायणमत्तलोके
सद्भावनां स्थिरयितुं गतभीर्गतो यः।
नित्यं भ्रमन् प्रतिगृहं भयभीतचित्त-
माश्वासयन् जनयितुं हृदि सौमनस्यम्।।८८।।

क्रिप्सोपनीतमभिनीतमिवातिछद्म-
नाट्यं विरुद्धघटनाहितसन्धिपत्रम्।
सम्यङ्निरीक्ष्य सुधियो नृपनीतिनिष्ठा-
स्त्याज्यं तदेकमतयो जुघुषु स्तदानीम्।।८९।।

राष्ट्रं विखण्डयितुमुद्यममाचरन्तं
दुर्नीतिदूषितविचारमनुव्रजन्तम्।
तारस्वरेण मिलिता जननायकास्तं
शास्तारमाहुरवमान्यमतं तदीयम्।।९०।।

यावन्न मे भवति पूर्णतयाऽङ्गभङ्ग-
स्तावत्कुतो भवितुमर्हति देशभङ्गः?
उद्घोषयन्नपि परं परतन्त्रतायाः
पाशाद्विमुक्तिमपि शीघ्रमियेष लब्धुम्।।९१।।

आंग्लाः प्रशासनपदे निवसन्ति यावत्
तावन्न शाम्यति मिथः कलहः कदापि।
इत्याकलय्य हृदि तानपनेतुमेव
शान्तेर्निदानमवधारितवानमोघम्।।९२।।

कालाद्बहोरपहृतामिव वल्लभां तां
स्वातन्त्र्यपद्मनिलयामचिरादुपेतुम्।
भङ्गं विधातुमपि भारतमातुरङ्ग-
मङ्गीचकार नितरामनभीप्सितं सः।।९३।।

आकस्मिकेन विहितेन विनिर्णयेन
येनाभवन्नियतिनिष्ठुरनाट्यलीलाः ।
यस्मादलोकिषत हन्त! विषण्णलोका
निःसारिताः स्वसदनादपनीतवत्ताः।।९४।।

यात्रास्वसह्यपरिदेवनवेदनाभिः
कौटुम्बिकप्रणयवञ्चितचेतनाभिः ।
व्यग्रा विपद्भिरभितो जनताऽतिदीना
हीनां दशामनुबभूव परैरचिन्तयाम्।।९५।।

पासूत्करैः परमधूसरिताङ्गवल्ली
दिल्लीमुपागतवती जनता विशाला।
शालार्थिनी स्वजनपालनयोग्यवृत्ति-
माप्तुं नितान्तविकला भ्रमतिस्म देशे।।९६।।

उत्पातकेतुकृतताण्डवलीलयैव
राज्याधिकारपरिवर्तनजातकायाम् ।
मायामयीं बहुविधामुदितां समस्यां
येते समाधिविधिभिर्नितरां विजेतुम्।।९७।।

देशे तदा प्रचुरविप्लवशालि वृत्त-
मुत्पन्नमुन्नतविचारवतां शिरांसि।
नीचैरचीकरदथापि शतप्रयत्नै-
र्भूयोऽपि सुस्थितिमिह प्रणिनाय बापूः।।९८।।

हिन्दूजने परिभवं गमितेऽपि भूयः
पाकाय भूरिधनमर्पयितुं प्रयस्यन्।
तोषाय हन्त यवनस्य वृथाऽऽत्मनीन-
माक्रोशमाशु निजबन्धुजनेष्वतानीत्।।९९।।

क्षुब्धे विपन्नजनचेतसि तूच्चभाव-
सम्भावना भवति न प्रतिबिम्बिता यत्।
क्रुद्धस्ततोऽभवदतीव विमूढचित्तौ
वित्तप्रदानशमनस्य निशम्य लोकः।।१००।।

सम्प्रार्थनास्थलमितोऽन्तकदूत एव
क्रूरः करालकुमतिः कुटिलो जघन्यः।
श्रीरामनाम जपतोऽस्य वपुष्यनेकां
प्राणापहारगुलिकां विससर्ज नीचः।।१०१।।

रामं स्मरन्नपि वदन्नपि रामनाम
शान्तः स्वधाम स जगाम महात्मवर्यः।
यो जीवनेऽपि मरणेऽपि च मोहनस्य
दिव्यात्मतामनुचकार विकारहीनः।।१०२।।

अन्यैरसाध्यमपि साध्यमिह प्रसाध्य
भक्तव्रजे रुदति निष्करुणो गतो यः।
सङ्कोचयन् विततविश्वजनीनलीलां
कीलालकल्पमधुरां विरसीचकार।।१०३।।

आमृत्यु नित्यमुचितां जनताहितार्थं
कुर्वन् क्रियामिह विहाय फलाभिसन्धिम्।
सिद्धोऽधुनातनयुगेऽपि स कर्मयोगी
भोगैषणाविरहितोऽलभत प्रशस्तिम्।।१०४।।

देशोऽतिदुस्सहविपत्पदमर्दितोऽपि
शोकोच्छलत्तरलवाष्पसमाकुलोऽपि ।
श्रद्धानिबद्धहृदयेन विलापपूर्ण-
मन्त्येष्टिकर्म कृतवान् परितप्यमानः।।१०५।।

स्वातन्त्र्यरत्नमपराश्रितमाप्य यत्नात्
प्रेम्णार्पयन्त्वथ जवाहरलालहस्ते।
हिन्दूजने च यवने च चिराय मैत्रीं
सन्धातुमेव शमनातिथिरेष जातः।।१०६।।

बापू वदान्य, भवदुज्ज्वलजीवनेन
सिक्तः स्वराज्यसुतरुः शतशाख आस्ते।
एषा त्वदीयबलिदानकथापि लोके
कर्मण्यतां च शुचितां च तनोतु शश्वत्।।१०७।।

यस्यामुखे गतवती न कदापि भीति-
र्नीतिर्न कापुरुषगा यमुपाश्रिताभूत्।
तस्यैव शुभ्रयशसो वचनं 'कुरुष्व-
किं वा म्रियस्व' खलु चुम्बति नोऽद्यकर्णम्।।१०८।।

अद्यापि राष्ट्रियसभा भुवि भाति सैव
स्फूर्तिर्न सा परमिहास्ति न सा विशुद्धिः।
सेवाव्रतं नहि तदीयसदस्यसङ्घे
किन्तु प्रशासनशुभासनमेव काम्यम्।।१०९।।

नावातरिष्यदिह चेदतुलक्रियावान्
गाँधी गुरुर्नयवतामतुलप्रकाशः।
नो शृंखलातिजटिला परतन्त्रताया
श्छिन्नाऽभविष्यदिति निश्चितधारणा नः।।११०।।

लोकोपकारनिरतोऽल्पपरिग्रहोऽपि
त्रिंशत्समाप्रमितविश्वनयेतिहासे ।
साश्चर्यचर्चितगुणोऽनुपक्रियाभिः
क्रान्तेर्मृदुश्च कठिनश्च मतोऽग्रदूतः।।१११।।

सन्तापितापि तपनेन, विकम्पितापि
वात्यानित्येन मलिनीकृतमल्लिकापि।
आमोदमञ्जुमकरन्दकरम्बिताङ्गं
शुभ्रं प्रसूनमतुलं नहि किं प्रसूते ?।।११२।।

रत्नानि राजमुकुटेषु परिस्फुरन्तु
दिव्याङ्गनाङ्गसुषमामपि वर्धयन्तु।
यस्यान्तिके गतमयोऽपि भवेत्सुवर्णं
तं स्पर्शमात्रकृतदिव्यमणिं नमामः।।११३।।

उत्कोचवृत्तिरचिराल्लयमेतु, लोक-
चित्तं पुनर्विशतु सा शुचितैकतापि-
प्राप्नोतु सुस्थितिमथ प्रथतां स्वधर्मः,
श्रेयस्करो विजयतां गणतन्त्र एषः।।११४।।

श्रीमालवीयशतकार्जितकीर्तिरेखः
सम्प्रेरितः शतकमाशु विरच्य चैतत्।
प्रज्ञोत्सवाय रतिनाथकविर्विनम्रः
शक्तिप्रदं नमति सद्‌गुरुपादपद्मम्।।११५।।

इति श्रीगांधीशतकम्।

×××

विशाले संसारे निरवधि महाकालकलिते
विपद् व्रातोद्‌धातैः कवलितसुखे लोकनिवहे।
सदा सन्तः क्लेशप्रशमनपराः सन्ति बहवो
महात्मा गाँधी किन्त्वनुपममहात्मा विजयते।।१।।

श्रितो नैवारण्यं, न च गिरिगुहां, नाद्रिशिखरं
परित्यागं नैवाकृत परिजनानां यदपि सः।
तथापि प्रख्यातो निखिलजनकल्याणकरणे
महात्मा गाँधी नः शमयति समाजव्यतिकरम्।।२।।

निसर्गेण खर्वः प्रथमगणनीयो गुणवतां
दरिद्राणां बन्धुर्जयति भुवि गाँधी नयनिधिः।
विदां कण्ठश्लेषं भजति भवभूतेः शिखरिणी
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।।३।।

सदा सत्याहिंसाप्रभृतिगुणसंवासनिलयः
स्वदेशस्वातन्त्र्योन्नयननयनिष्णातधिष्णः।
अनाथानां नाथो हरिजनजनानां च शरणं
महात्मा गाँधी किं भरतभुवि नास्ते निरुपमः ?।।४।।

# ९७.मालवीयशतकम्

येषां महामहिममण्डितकीर्त्तिलेखा
लेखालयेऽपि कलयत्यतुलं विलासम्।
आमोदिता मधुहृदो विबुधालिकेलि-
भव्यालयाः सुमनसो भुवि ते जयन्ति।।१।।

भूण्डलं जयति मण्डनमिन्दिरायाः
कर्मण्यताकुशलताशुचिताङ्गनानाम् ।
विश्वम्भरैकशरऽणाम्बुधिबद्धसख्यं
गौरीगुरुप्रभृतिभूभुदुदारलीलम् ।।२।।

नीलाम्बरावृतवपुर्द्रुमवल्लरीणां
पुष्पप्रवाललिताभरणैर्लसन्ती ।
कूजच्छकुन्तकुलकोमलभारतीयम्
आभाति भूमिरमणी रमणीयकान्तिः ।।३।।

देवेश्वरत्वमधिकृत्य सुराङ्गनानां
नर्मक्रियोल्लसितकेलिकुतूहलानि ।
भोक्तुं पुमानमितविक्रमविभ्रमाढ्यः
सम्प्रेषितः शतमखः सततं भुवैव।।४।।

यज्ञादिषु प्रथितहव्यसमर्पणेन
भूरेव तोषयति साधु सुधान्धसोऽपि।
सम्मानदानविधिना च सुरान् समस्तान्
आनन्दयत्यनुदिनं ननु सैव कामम्।।५।।

तस्या भुवो हृदयखण्डमखण्डनीय-
माखण्डलार्चितचरं रुचिरं चिराय।
धर्माङ्कुरप्रसवि भारतवर्षमेतद्
भव्यं प्रभूतविभवं नितरां चकास्ति।।६।।

यस्यैकतो हिमगिरिर्गगनस्पृगस्ति
रत्नाकरोऽस्त्यपरतोऽङ्घ्रिमुपासमानः ।

मध्ये वहन्ति सरितः परितस्तरङ्ग-
भङ्गीभिरिङ्गितधना इव नृत्यशीलाः।।७।।

यत्रावतीर्य भगवान् विविधैः स्वरूपै-
र्धर्मं शुभं स्थिरयितस्म निवार्य विघ्नान्।
यत्र स्थिताद्द्विजवरान्मनुजैः समस्तैः
सार्वत्रिकैः स्वचरितानि च शिक्षितानि।।८।।

सोऽयं गुरुस्त्रिजगतः प्रकृतिप्रकर्ष-
हर्षाकरः सकललोकसमर्चितश्रीः।
सद्भाववैभवविशेषविभूषिताङ्गो
देशश्चिरं जयति भारतवर्षनामा।।९।।

तीर्थानि मानवमनोमलनाशनानि
भान्तीह भव्यविभवप्रभवाणि कामम्।
किन्तु स्फुरत्प्रगुणसद्गुणदिव्यधाम्ना-
ऽऽम्नायादिकीर्त्तितरो जयति प्रयागः।।१०।।

यस्यैकतो विमलबोधमयः प्रवाहो
गाङ्गो विभाति रजतद्रववत्सिताद्रेः।
प्रेमाम्बुपूरपरिपूरितपुण्यतोया
यस्यान्यतो वहति सूर्यसुता स्रवन्ती।।११।।

अन्तःस्थिता स्वजनपावनकेलिशीला
लीलावती सकललोकललामभूता।
पूतात्मनां मनसि शश्वदुदाररूपा
रूपातिगा लसति कापि सरस्वतीह।।१२।।

लोकत्रयाचरितसञ्चितपुण्यराशिः
किं वा त्रयी प्रकटितत्रितयात्ममूर्त्तिः।
बन्धु-प्रियासहितराघववन्दनीया
यत्रावभाति भवबन्धनहृत् त्रिवेणी।।१३।।

वेणीमाधवतापसाक्षयवटाः प्राचीनतासाक्षिणो
नूनं धार्मिकचेतसि प्रकटयन्त्यङ्कूरपूरान् मुदः।

कर्मोपासनसंविदामथ विदामाधारभूमिश्चिरात्
सर्वानन्दमहाकरो विजयते श्रीतीर्थराजः प्रियः।।१४।।

स्वर्गस्पर्धिपरार्धवैभवभरं लीलावतीलीलया
श्याघ्यश्लाघ्यविलासलास्यलसितं शिप्राप्रियालिङ्गितम्।
सर्वश्रेयसि जाग्रतं स्तुतमहाकालेश्वरं मालवं
नाम्ना मालवमेव चेतसि विदत्तत्याज यत्सत्कुलम्।।१५।।

शस्यश्यामलकोमलं सुललितं शिल्पानुकल्पालयं
त्यक्त्वा मालवमालयं भरतभूसौभाग्यभूषामणिम् ।
अस्माकं कुलमूलसद्विजभरद्वाजस्य भव्याश्रमात्
तौ तीर्थाधिपतौ निवासमुचितं मत्यैव चक्रे गृहम् ।।१६।।

तत्र ब्रह्मणि नैष्ठिकं स्मृतिमुखापेक्षासु सन्दीक्षितं
पुण्यात्पुण्यतमे पुराणनिलये विश्रान्तचित्तं चिरात्।
धर्माचारविचारचारुचरितं श्रीमालवीयाह्वयं
नीरक्षीरविवेचकं द्विजकुलं सोल्लासमातिष्ठति।।१७।।

तत्र प्रादुरभूददीनहृदयो नारायणोपासको
व्युत्पन्नो विविधागमेषु विबुधश्रेणीमणिः सात्विकः।
कृष्णोपासनयापि शुक्लधिषणो विप्रोऽपि वेणुप्रियः
पूज्यः श्रीव्रजनाथनामकचतुर्वेदो विदां मण्डनः।।१८।।

सोऽयं शीलवतीं सतीं निरुपमप्रीतिप्रतीतिस्थितिं
स्फीतप्राणवतीं गृहस्थकृतिषु प्राप्तातिपूताकृतिम्।
सेवाधर्मसरस्वतीं धृतिमतीं सीमन्तिनीसन्मणिं
पत्नीं प्रापदनापदं विधिवशान्‘मूना’ मनूनां गुणैः।।१९।।

जातौ तत्र कुले कुलोचितगुणग्रामाभिरामात्मजौ
पूर्वं द्वौ च ततो विरञ्चिरचनानैपुण्यपुण्यप्रदः।
आकृत्या मदतुन्दिलस्य मदनस्यारवर्ववन्तिको
बुद्धया देवगुरोश्च गौरवहतरः सूतस्तृतीयः सुतः।।२०।।

दिग्दन्तावलचन्द्रनन्दवसुधासंवत्सरे वैक्रमे
पौषे श्यामदले गिरीन्द्रतनयानाथे तिथौ भार्गवे।

दुग्धाब्धेरमृतांशुवत् सुरतरोः सत्कोरकाङ्कुरवत्
कासारादरविन्द[1] वत् प्रकटितः पुत्रः प्रहर्षाकरः।।२१।।

वीक्ष्याकृतिप्रकृतिसंस्कृतिदिव्यधाम-
दामानमेनममृतांशुकरातिगौरम् ।
अन्वर्थनामकलनाकुशलेन पित्रा
सम्बोधितो मदनमोहनमालवीयः।।२२।।

चापल्यसंवलितमप्यनुकूलकाल-
लीलाविलासललितं विपुलप्रमोदम्।
बाल्यं निराकुलमनाविललाल्यमस्य
माल्यश्रियेव मुदितामतनोत्स्वपित्रोः।।२३।।

क्रीडाकौशलपेशलं समवयोर्वर्गाञ्चितं शैशवं
दुष्प्राप्यं सुसमाप्य साक्षरदशामाधातुमुत्कण्ठया।
तातप्रेरणयैव पद्मनयनानन्दाय बद्धादरो
धर्मज्ञानमहोपदेशकुशलं विद्यालये प्राविशत्।।२४।।

तत्राधीत्य सुधीन्द्रवृन्दमहिते विद्यालये सद्गुरो-
र्भट्टाचार्यमहाशयादसुलभां व्युपत्तिमासादयत्।
स्वल्पेनैव दिनेन पूज्यचरणादाचार्यवर्यादयं
शास्त्राकूतमतीवपूतमनसा भेजे जनानन्दनः।।२५।।

बाल्यादेव कलाकलापकुशलः सज्जीक्रियाप्रक्रिया-
पाण्डित्यायतनं मनोहरतराण्यच्छाक्षराण्यालिखन्।
सत्संस्कारधनः श्रुतिस्मृतिमुखव्याख्यातधर्मक्रियो
जातः संस्कृतसेवयाऽतिमधुरो धीमान् गुरूणां प्रियः।।२६।।

ताते भागवतीं कथां कथयति स्वल्पार्थलाभोदये
पौष्येऽनल्पजनेऽतिदुर्वहतया गार्हस्थ्यभारेऽनिशम्।
आंग्लज्ञानविधायके प्रचुरतो द्रव्यव्ययापेक्षिते
विद्यासद्मनि संविदोऽथ चयनं दुष्कार्यमेवाभवत्।।२७।।

---

१. पाठान्तरः शतपत्र।

किन्तूत्साहसहाससाहसमनायासं समासादयन्
अध्येतुं धनसाध्यबोधविभवं पाश्चात्यविद्यालये।
सङ्कल्प्योल्लसितात्मना स्वपठनारम्भेण संस्तम्भयन्
ऋद्धं गर्वितमार्जयन्निरुपमक्लेशेन विद्याधनम्।।२८।।

मातुः कायिकभूषणानि बहुधा न्यस्यार्थलाभेच्छया
नामोच्छेददुरन्तदुःखददशां शुल्कादिदानैरशात्।
द्रव्याभाववशादशान्तहृदयोऽप्युत्कर्षबीजाङ्कुरं
सिञ्चन् स श्रमवारिणाल्पदिवसेनैव द्रुमं दृष्टवान्।।२९।।

दारिद्र्यातपतापितापि हृदयक्षेत्रोल्लसल्लालसा-
वल्ली लोकललाममङ्गलमयानल्पप्रवालालया।
सर्वानन्दमरन्दमेदुरगुणग्रामप्रसूनाञ्चिता
क्लेशावेशमशेषतो भरतभूभूतात्मनामक्षिणोत्।।३०।।

छात्रेणाप्यमुना प्रयागनगरश्रीविश्वविद्यालये
हिन्दूछात्रनिवाससौख्यनिलयश्छात्रालयो नूतनः।
राज्ञामर्थसमर्पणप्रणयिनां सम्प्रार्थनामानिनां
कोशोत्सृष्टधनागमेन सुभगो निर्मापितो भूतये।।३१।।

कालो बालविबोधनाय विबुधेनानेन नीतः कियान्
पत्रं किञ्चिदुदञ्चितं मतिमता द्राक् पत्रकारात्मना।
पश्चादेष विधिं विशेषविधिनाधीत्याधिकारान्वितो
वाक्कीलः समभूदभूतचरवाङ् न्यायालयेऽत्रोच्चकैः।।३२।।

माधुर्यातिशयादगाधविधिसच्छास्त्रप्रमाणान्वितात्
सत्तर्कामृतसेचनादविनयोत्सर्गान्निसर्गोज्ज्वलात् ।
श्रोतृस्वान्तनितान्तरञ्जनकरान्न्यायेश्वरावर्जनात्
पक्षस्थापनदक्षसत्प्रवचनात् प्रापत् प्रसिद्धिं पराम्।।३३।।

वाचः स्फीततया मतेर्गुरुतया ज्ञानश्रियो ज्योतिषा
कीर्त्तेश्चारुतया विवेचनकलानिष्णाततया विद्यया।
सौजन्यातिशयस्य शेवधितया नीतेश्च विद्वत्तया
स्वल्पेनैव दिनेन विश्रुतिमयं सर्वत्र सम्प्राप्तवान्।।३४।।

क्लेशावेशविशेषशोषितरसो लक्ष्मीकृपाकुण्ठनात्
कालं कञ्चन काञ्चनार्जनपरो दत्तावधानोऽनयत्।
वाक्कीलक्रियया ययातिविरला उत्कर्षमातन्वते
द्रागेवायमनन्यलभ्ययशसा ख्यातस्तयैवादृतः।।३५।।

देशः प्राप्तपराजयः परवशक्लेशानशेषान् वहन्
जातः सङ्कुचितोदयो विदलितो दैन्यादिना कुण्ठितः।
मोक्तव्यः परतन्त्रतानिगडितः सम्भूय सर्वैर्जनै-
रित्युद्घोषयतां तदा नयवतां वर्गे सगर्वोऽविशत्।।३६।।

यत्र ज्ञानधना जनाः प्रवयसः सम्मानिताः सर्वथा
कृत्वाऽश्रान्तपरिश्रमं विलिखितं व्याख्यानमश्रावयत्।
तत्रैव प्रथमं गतोऽपि तरुणः सद्यः स्फुरद्भावनो
गम्भीरेण मनोरमेण वचसा व्यस्मापयद्योऽखिलान्।।३७।।

वाचा साधु सुधामुधामदमुचा चारित्र्यचामीकर-
भ्राजद्द्रव्यविभूषणेन वयसा नव्येन तेजस्विना।
पाटीरद्रवदिव्यभालतिलकेनाभीतिभूष्यात्मना
देशप्रेममदेन चोन्नतशिराः सर्वत्र यो द्योतते।।३८।।

सौजन्यस्य निधिर्मधुः सुमनसां पुण्यात्मनामाश्रयो
मित्रं भारतवासिनां निरुपमः सत्कर्मणां शेवधिः।
सौभाग्यस्य कुलाचलो नयवतां दीक्षागुरुः श्रीमतां
कीर्त्तिप्रीतिकरो नवोऽयमुदितः सिद्धिश्रियो वल्लभः।।३९।।

अस्यां भारतसंस्कृतौ तु दयिता पत्युः सदैवानुगा
कीर्तिः किन्तु नवा प्रियाऽस्य पुरतः सर्वत्र सङ्क्रामति।
एवं सत्यपि तां सतीं स्ववनितां विस्मृत्य कीर्त्तेः पुनः-
पश्चादेष विशेषवेशकलितो धावत्यहो विह्वलः।।४०।।

ते नेत्रे अपि दुर्लभे त्रिभुवने ये भृङ्गगर्भाम्बुज-
स्फीतश्रीमदमर्दने सुविपुले कौटिल्यलीलागृहे।
किन्तु स्थानजकालजव्यवहितिं भित्वातिदूरस्थितं
सूक्ष्मात्सूक्ष्मतमञ्च लक्ष्यमचिरं ये विध्यतस्ते नुमः।।४१।।

देशेऽस्मिन् जनजीवनस्य विषमक्षोभोद्भवा वीचयः
सन्त्यज्यात्मनिसर्गमांग्लवचसा वाचा च पारस्यया।
न्यायाशीधगृहाङ्गणाग्रपुलिने वाचालिताः प्रत्यहं
हिन्दीवागनुरागचेतसि परां तेनुर्नवीनां व्यथाम्।।४२।।

स्तन्येनैव सहापिबन्ति शिशवो यां मातुरङ्केशया
भाषां सम्यगुदीरयन्ति सुधियस्तां मातृभाषां यतः।
तस्मात् सा जननीव वत्सलमयी वन्द्या विदां मण्डलैः
सेव्या भारतभारतीतिवचसा योऽबोधयद्देशजान्।।४३।।

येनौचित्यवताप्रयागनगरे साहित्यसम्मेलनं
काश्यां न्यासि सभा च शुभ्रचरितैर्विद्वद्भिरुद्बोधितैः।
ते अद्याप्यनवद्यवैभवमयोद्भासा समुद्भासिते
स्वं स्वं कार्यमुरीकृतं प्रकुरुतो देशोदयायानिशम्।।४४।।

राष्ट्रस्वान्तमनन्तदोषजनकैस्तैः पारतन्त्र्योद्भवै-
गूढध्वान्तचयैः समाकुलतरं कांग्रेसदीपार्चिषा।
कामं दीपयितुं स्वराष्ट्रियसभाभासां प्रभूतोदये
स्नेहासारमपारमर्पितवतामग्रेसरो योऽभवत् ।।४५।।

देशप्रेमतरुः स्वसंस्कृतिसुधाधाराभिरासेचितो
भव्याचारविचारपल्लवशतैरुल्लासितो भूरिशः।
पाश्चात्यप्रवरप्रवातरयतो भूयः समान्दोलितः
सुस्थः सर्वसमृद्धिसिद्धिपिशुनो येनायमुद्वर्धितः।।४६।।

धर्मप्राणमयेऽपि यत्र कुटिलैर्धर्मप्रचारोद्यतैः
सङ्घैर्हन्यत एव कूटविधिना हिन्दूजनानां गणः।
संस्थास्तत्प्रशमाय काश्चिदसमा धर्मानुरागोद्धुरा
हिन्दूजातिहिताय येन विधिवत् संस्थापिताः सादरम्।।४७।।

इत्थं धार्मिकचेतनां द्रढयितुं सामाजिकीं च स्थितिं
मर्यादां स्वकुलस्य च स्थिरयितुं हिन्दूसभाद्यास्तदा।
संस्थाः स्थापयतापि राष्ट्रियसभाशक्तिप्रकर्षः कृतः
प्रायः सत्पुरुषे विरुद्धघटनाप्यालम्बते मित्रताम्।।४८।।

देशं मोहनिशासु सुप्तमतुलैर्गीतैः समुद्बोधकै-
रुच्चैर्जागरयन्नदम्यविधिना भेजे मुहुर्वन्दिताम्।
तत्रोत्साहयता कृतैरविरलैर्भव्यैः प्रयत्नैर्नवै-
र्निस्तन्द्रः शनकैः कृतोऽयमखिलो देशो विशेषो भुवः।।४९।।

कांग्रेसाधिपतित्वमुत्तमतया वारत्रयं बिभ्रते
हिन्दीहिन्दुजनोदयाय सततं यत्नं हृदा तन्वते।
दिव्यालोकमलौकिकं कलयते श्रीविश्वविद्यालयं
नित्योत्साहवते सदोपदिशते स्यान्नः प्रमाणाञ्जलिः।।५०।।

एतस्यैव सदा प्रसन्नवदनाम्भोजे वसन्ती चिरात्
द्रुह्यन्तीं कमलालयां भगवती ब्राह्मी तृणं मन्यते।
हर्षोत्साहवती ततो जयवती प्रीता नु किं भारती
लक्ष्मीलास्यकरं परं सुमनसे प्रादाद्वरेण्यं वरम्।।५१।।

प्रादुर्भूय तपोधनोज्ज्वलकुले विप्रोचिताचारतो
लक्ष्मीलास्यमपास्य दास्यमभजत् सारस्वतज्योतिषा।
विद्यापीठमिदं ततो निरुपमं निर्माय निर्मायमा-
कल्पं कल्पलतैकबीजमिव नः प्रादात् स्थिरं कामदम्।।५२।।

देशक्लेशसमापनाय विहितारम्भेषु संरम्भिणो
नेतॄन् बन्धनपाशनाशनपटूनाप्तान् समालोकयन्।
प्राणानां पणतोऽपि दुर्लभतरं प्राज्यं स्वराज्यं यदि
प्राप्तं स्यात् कथमस्तु रक्षितमिति प्रायेण योऽचिन्तयत्।।५३।।

आर्हन्ती समुदेतु कापि कुशला द्राग् भारतीये जने
नव्यं रत्नमिदं यया समुचितं संरक्षणीयं भवत्।
एवं चिन्तयता चिरेण विदुषा निर्धारितं नूतनं
निर्मातुं सकलोपजीव्यनिलयं श्रीविश्वविद्यालयम्।।५४।।

ध्यातस्तत्र महीमहेन्द्रमुकुटाश्लिष्टाङ्घ्रिपद्मः पुरा
विद्यालब्धविदेहराज्य उदयत्कीर्तिच्छटो निश्छलः।
पूर्वं श्रीलरमेश्वरो द्विजवरः श्रीद्वारवङ्गाधिपो
वन्द्यः श्रोत्रियविप्रमण्डनतया मान्यो वदान्यो बुधः।।५५।।

अन्योऽयं द्विजराजराजितवचः पीयूषपूरं पुरः
सानन्दं परिपीय संविदुदयत्संवादभाजा हृदा।
निर्णीतं यदुदारदानरचितः श्रीविश्वविद्यालयः
काश्यां ज्ञानगुरोरपारमहिमोत्कर्षाय सञ्जायताम्।।५६।।

एकेनापि महौजसा द्विजवरेणाकाशसीमाऽञ्जसा
शक्या लङ्घयितुं समीहितफलप्राप्तये प्रसन्नात्मना।
मित्रेणानुगते च तत्र तु पुनर्लक्ष्मीस्तथा भारती
सख्यं प्राप्तवतीव वीक्ष्य विमलां वृत्तिं तदानीं तयोः।।५७।।

शिक्षाशास्त्रविदां मनोरथमहालक्ष्मीर्वदान्यस्फुरत्-
कीर्त्तिः शिल्पिकलाऽतुला सुनियनिर्विद्यानुरक्तात्मनाम्।
सामञ्जस्यवसुन्धुराऽथ सुहृदोः पौरस्त्यपाश्चात्ययो-
रूषा काप्यरूणोदया विजयते सौवर्णवर्णाकृतिः।।५८।।

भिक्षायां मृदि जीवनं वितरति श्रीमालवीये घने
शिक्षाकल्पलताङकुरोऽयमुदितः संवर्धमानोऽनिशम्।
माद्यद्गन्धमरन्दमञ्जुललसत्सत्पुष्पभूषाञ्चितो
द्रागेवाह्वयतिस्म सन्मधुकरान् दूरस्थितानप्यलम्।।५९।।

आचार्यैर्मुनिभिर्मनस्विभिरुदाहार्यैर्महोभिः शुभै-
र्विश्वं शिष्यमिव प्रकाशयति या काशी शिवप्रेयसी।
तस्या अप्यनिशं प्रकाशनपरो दिव्यप्रभाभास्वरो
नेत्रानन्दसुधा[१] करो विजयते श्रीविश्वविद्यालयः।।६०।।

विश्वश्लाघितमालवीयतपसां राशिर्दिशां मण्डनं
सौभाग्यं भरताभिनन्दितभुवः पुण्याङ्कुरो ज्ञानिनाम्।
वाग्देव्या हृदयं श्रियः सुललितः शृङ्गारचूडामणिः
काश्यां माननिकेतनं विजयते श्रीविश्वविद्यालयः।।६१।।

काशीराजसमर्पितावनिसमुद्भूतेव सीता नवं
शम्भोश्चापयिदावलोक्य कुटिलं श्रीविश्वविद्यालयम्।

---
*१. पाठान्तर : दिवा।*

हस्ताग्रेण वहन्तमाशु मदनं सम्मोहयन्तं श्रिया
श्रीमन् मोहनराघवं प्रमुदिता रक्ता समुत्कण्ठिता।।६२।।

राजानो बहुवल्लभा अपि गृहान्निर्गत्य कीर्त्ति प्रियां
रज्यन्ती मदने विलोक्य कुलजां नष्टां प्रतिष्ठां विदुः।
तूष्णीमर्थसमर्पणेन दयितामुन्मोच्य देशं गता
भूयो भूय इहागतप्रणयिनीं तां नैव रोद्धुं क्षमाः।।६३।।

श्रीमन्तो वसुधाधिपाः सुमनसः श्रेष्ठीश्वराः शिल्पिनः
सर्वेऽमी समुपागताः कुतुकिनो द्रष्टुं नवीनं क्रमम्।
साङ्गोऽयं मदनः प्रसाधितरतिप्रीतिप्रियालिङ्गितो
लोकाकर्षणकार्मणेन विधिना लक्ष्मीं समाकर्षति।।६४।।

जाड्यं ध्वंसयितुं विवेककिरणैरुष्णैरनुष्णा चिराद्
आयान्ती प्रतिवत्सरं मदयितुं श्रीपञ्चमी शारदाम्।
धन्याभूत्तु विरञ्चिपट्टमहिषीलीलाविलासालय-
स्थापत्यप्रतिपत्तिपूर्वकशिलान्यासेन लोके तदा।।६५।।

विद्वद्भिः सुयशोऽवदातचरितैर्मान्यैर्वदान्यैर्जनै-
र्वायसरायमहोदयैस्तदनुगैर्भव्यैश्च सभ्यैः परैः।
सम्राट्पञ्चमजार्जराजितमहाराज्याभिषेकोत्सवे
दिल्लीवोल्लसिता नरेन्द्रमुकुटैर्वाराणसी भूषिता।।६६।।

येषां शासनमाशु हस्तयितुमुद्योगं स्फुटं कुर्वता
प्रातीप्यं चरतापि कौशलबलात् साह्यं समासादितम्।
सामञ्जस्यकलैव काप्यनुपमा सा मालवीयाकृतिः
सर्वासम्भवभावनाप्रमथिनी जीयाच्चिरं भूतले।।६७।।

विद्याकल्पलताप्रवालनिकरै रक्तः, पिशङ्गस्त्विषा,
सत्कर्मावलिसञ्चितेन यशसा कायेन चात्युज्ज्वलः।
पीतो विज्ञविलोचनैः, सुहरितो देशानुरागाङ्कुरै-
रेकस्त्वं सुरराज चाप इव खे विभ्राजसे भारते।।६८।।

सर्वाशापरिपूरकैः सुतनयैरानन्दसम्वर्द्धनै-
र्देवोद्यानतरूपमैरनुपमश्रीसौरभामोदितैः ।

कन्याभिश्च सुशीलकोमलकलाशालाभिरुल्लासितः
प्रीतो मालवदेशजो विलसितो दौहित्रपौत्रादिभिः।।६९।।

अन्तर्ध्वान्तनिवारणैकमहसो रात्रिन्दिवं दीव्यतः
केतुं नर्तयतो मृदा न विदतो राहूपरागाद् भयम्।
श्रीगीर्लास्यमनाकुलं कलयतो वाग्देवतासद्मनो
वर्णेनापि समः समैः समुदयन् भास्वान् सदा वन्द्यते।।७०।।

प्राचीरं रुचिरं चिरं स्थिरचरं गर्वोन्नतं गोपुरं
रम्यारामरमार्चितं सुमनसां स्तोमैः समुल्लासितम्।
दिव्यैरम्बरचुम्बिमन्दिरशतैर्व्याप्तं यदीयाङ्गणं
तत् केलीकुलपेशलायितमिदं वाणीगृहं राजते।।७१।।

सेनानीनिचिता सदैव विबुधव्रातैः समुद्भासिता
गन्धर्वैरुपवीणिता सुगुरुभिर्या गौरवं प्रापिता।
कामं सत्कविभिः स्तुता विशदिता नित्यं नवीनोत्सवैः
सेयं काचन नूतना विजयते श्रीराजधानी गिरः।।७२।।

लोकानन्दविश्वकर्मरचनाविज्ञानलक्ष्मीनिधिः
सर्वश्लाधितवैभवो निरुपमप्राचार्यवर्याञ्चितः।
देशस्य प्रतिकोणतः समुदितैश्छात्रैश्च मेधाविभि-
र्व्याप्तः कोऽपि महामहा विजयते स्थापत्यविद्यालयः।।७३।।

देशोऽयं कृषिभूतिभूषिततनुर्यस्मादतो नूतनै-
र्विज्ञानप्रभवैः समुन्नतिकरैर्भव्यप्रयोगैर्युतः।
प्रख्यातैर्विबुधैरपारमहिमा छात्रैश्च योग्यैर्लसन्
वल्लीपुष्पकलाभिवन्दितकृषेर्विद्यालयो भ्राजते।।७४।।

अद्यत्वेऽस्ति धरातले समुदयद्देशेषु सम्मानितं
विज्ञानं विविधाभिरञ्चितयशःशाखाभिराभासितम्।
तत्तच्छास्त्ररहस्यविद्बुधवरैरन्तेवसद्भिः शुभै-
रत्रापि स्थिरकीर्तिरुल्लसति सद्विज्ञानविद्यालयः।।७५।।

आचार्यैर्निजशास्त्रसागरतलस्पर्शिप्रबोधाकरै-
श्छात्रैश्चाध्ययनव्रतैर्निरुपमैर्देशानुरागोज्ज्वलैः ।

आकीर्णः परिपूर्णवैभवभरो ज्ञानावलोकप्रभो
यत्राशेषविशेषवाङ्मयमहाविद्यालयो द्योतते।।७६।।

नव्यार्थप्रतिपत्तिहेतुसमुदाहार्यानुसन्धानतो
यत्राचार्यपरम्परा परिणतज्ञानांशुविभ्राजिता।
अन्तेवासिकुलञ्च सद्गुरुकृपापात्रं मुदा भारती-
विद्यामन्दिर-मातनोति सुयशोदीपेन शोभामयम्।।७७।।

विद्वांसो विधिबोधवारिधिसमुत्तीर्णाः प्रवीणाः परं
छात्राश्चापि सुमेधसोऽतिमुखरा भव्याः प्रगल्भाः शुभाः।
सङ्ख्यायामधिका न यद्यपि तथाप्येतैः समुद्भासितो
दीव्यत्येष विधेर्विलासनिलयः सूर्येण लोको यथा।।७८।।

वाणिज्यं बत राज्यवर्धनकरं बीजं विदन्तो विदो
नव्यैर्भव्यतमैरुपायनिकरैरध्यापयन्तोऽन्वहम्।
लोकेष्वर्थसमर्जनैकचतुरानन्तेवसत्सञ्चयान्
आविष्कर्तुमनेकधा विदधते यत्नान्नवीनानिह।।७९।।

शिक्षायां यदि दीक्षिताः सुगुरवो विद्यालयेषूत्तमाः
प्रेष्यन्ते शिशुमानसस्थितिमभिज्ञातुं प्रशस्ताशयाः।
देशः शिक्षणसक्षणः प्रभविता द्रागित्यवेत्यादराद्
अत्र स्थापित उन्नतिङ्गत उदेत्याचार्यविद्यालयः।।८०।।

सङ्गीतं स्तनमामनन्ति सुधियो वाग्देवताया यत-
स्तस्मात्तत्प्रतिभा विना स्तनयुगं नो रम्यतामञ्चति।
इत्यामृश्य सुधाप्रवाहजननायोङ्कारनाथं बुधं
प्राचार्यं प्रणिधाय नूतनतमो विद्यालयो निर्मितः।।८१।।

कन्यानामपि शिक्षणं द्रढयति द्राग् देशसम्भावनां
मर्यादाञ्च समेधयत्यविरतं सामाजिकीं सुस्थिराम्।
इत्युद्दिश्य नवीनसर्वविषयानध्येतुमुत्कण्ठया
बालाः कोमलचेतसो मदयितुं विद्यालयो राजते।।८२।।

स्वास्थ्यं मूलमशेषवाञ्छितसुखारम्भद्रुमस्योत्तमं
मत्वा सर्वजनामयं शमयितुं विद्यालयो निर्मितः।

यत्राध्येतृसुबोधनं प्रथयितुं भव्यं चिकित्सालयं
सम्बद्धं च विधाय विश्वमुदितामातन्वते स्थापकाः।।८३।।

पौरस्त्योत्तमबोधरत्ननिवहैराभासितं भारतं
विश्वस्मिन्निजभारतत्वमुचितं व्याख्यातुमीष्टे यतः।
विद्यावृत्तविभूतिभिर्गुरुवरैरन्तेवसद्भिस्तथा
युक्तः संस्कृतवाङ्मयस्य जयति ख्यातोऽत्र विद्यालयः।।८४।।

हिन्दूस्कूलमशेषबोधनिलयश्रेयःसमुन्नायकं
प्रख्यातं रणवीरपाठभवनं प्रारम्भिकं शोभनम्।
विज्ञैर्विज्ञजनाभिनन्द्यचरितैश्छात्रैश्च भव्यैर्युतं
विद्यामन्दिरयुग्मकं विजयते मूलं समेषां शिवम्।।८५।।

पाषाणप्रतिमाविनिर्मितिकला प्राचीनकालोद्भवं
स्वैतिह्यं प्रतिबोधयत्यनुपमं वाचं विनापि स्फुटम्।
इत्यामृश्य सुमूर्त्तिमण्डितमहामाला विशाला कला-
शाला शीलितितत्कलस्य सुधियो लाभाय जागर्त्त्यलम्।।८६।।

अद्यत्वे प्रचुरप्रचाररुचिरा लोकावलीलालिता
यावत्यो विलसन्ति कोमलकलाभान्तीह सर्वास्तु ताः।
विज्ञानं जगति प्रसिद्धमथ च प्राच्यं प्रतीच्यं तथा
साहित्यं सकलं समुल्लसति नः सौभाग्यसम्वर्धनम्।।८७।।

अन्तेवासिकुलं निवाससुविधामासाद्य विद्यार्जने
प्राशस्त्यं विननिष्यतीति हृदये निश्चित्य संस्थापकैः।
स्थापत्यप्रथमानशिल्पलसिताश्छात्रालया विस्तृता
भव्या भूरिसुखावहा विरचिता राजन्त्यनेकेऽधुना।।८८।।

आचार्यायतनानि पङ्क्तिनियतान्युच्चावचानि श्रिया
सर्वेषामधिकारिणाञ्च भवनान्यातन्वते सम्मदम्।
केन्द्रीयं किल कार्यसद्म रुचिरं तत्रत्यकृत्यस्थिता-
वासश्रेणिविभासमानसदनं संशोभते साम्प्रतम्।।८९।।

साफल्यं धनसञ्चयस्य, विशदस्थापत्यशिल्पश्रियः
शृङ्गारो, विरलाकुलस्य सुकृतं, भक्तावलेर्वैभवम्।

विद्यामन्दिरगौरवं, सुमनसामुत्फल्लातासाधकं
प्राचीरैर्वलयीकृतं विजयते विश्वेशसन्मन्दिरम्।।९०।।

वाग्देवीप्रतिबिम्बचुम्बितहृदो ग्रन्थास्तु लक्षाधिका
राजन्ते नहि केवलं सुनिपुणं न्यस्ताः प्रशस्ताशयाः।
कुड्यैरप्यथ कुट्टिमैरपि शुभैः स्तम्भैरपि श्लाघितः
केन्द्रीयः कलपुस्तकालय इहादर्शो गिरः शोभते।।९१।।

शास्त्राधीतिसमेधिता मतिमतां मेधा यथा वर्धते
शारीरं बलमेवमेव विपुलं विद्यार्थिनामेधताम्।
प्रज्ञापौरुषपूजिता प्रथयति प्राज्ञावली गौरवं
चिन्त्येयं शिवराजराजितमहाव्यायामशालाऽभवत्।।९२।।

श्रीमद्भारतराष्ट्रनायकसमायानेन सम्भावितं
श्रीमद्भिर्नेहरूकरैरुपचितं कश्मीरराजार्चितम्।
दिव्यं संस्कृतिकेन्द्रमुत्तमतपोविभ्राजमानं लसल्-
लक्ष्मीलिङ्गितमालवीयभवनं विद्योततेऽहर्निशम्।।९३।।

सद्वंशीयपयस्विनीभिरुचिताहारप्रपुष्टात्मभि-
र्वत्सैश्चानुगताभिरुन्नततरं गोशालमाभ्राजते।
वर्णैर्नव्यतमैः प्रवीणकृतिभिर्यन्त्रैर्नवीनागतैः
शक्तैर्मुद्रणमन्दिरं च रुचिरं कार्याकुलं राजते।।९४।।

यत्रैकैव पयस्विनी, च तरवः पञ्चैव, चिन्तामणि-
श्चैकः केवल, एक एव च गुरुः, ख्यातः कविश्चैकलः।
एवं सत्यपि गर्विता प्रगुणितां गण्यैश्च सर्वैर्गुणै-
र्वीक्ष्यैतामरावती खलु गिरः केलिस्थलीं लज्जते।।९५।।

नाभोगैरतिविस्तृततैरुपवनैर्नो राजमार्गैर्नवा
हर्म्यैर्नापि समेति कोऽपि सुयशः श्रीविश्वविद्यालयः।
आचार्यैरधिकारिभिः सुचरितैश्छात्रैश्च किन्तूल्लसन्
लक्ष्मीं कामपि संबिभर्ति भुवने विद्याव्रतैरर्चितः।।९६।।

विद्वांसो विषये स्वकेऽत्र कुशला अन्विष्य संरक्षिता
सर्वे सन्ति यशोऽवदातचरिताः सम्माननीया भृशम्।

एकैकस्य गुणावलीविलसिता माला सुकण्ठश्रियं
सम्यग् वर्धयितुं समर्हति सतां, वन्द्यान्नुमोऽतो विदः।।९७।।

राज्ञा ख्यातशिवप्रसादसुहृदैवैनीवेसेण्टाख्यया
युक्तः श्रीभगवानदाससुधिया काशीनरेशादिभिः।
सप्रूसुन्दरलालविज्ञनिवहैर्मित्रैः समुल्लासितो
दुःसाध्यान्यपि सोऽञ्जसा विहितवान् कृत्यानि सर्वाण्यलम्।।९८।।

येन स्वीयसमर्चनीयवचसोन्नीतः स्वदेशो भुवि
स्फीतं दर्शनवाङ्मयं च विहितं वैज्ञानिकेऽपि क्षणे।
राधाकृष्णमहोदयः कुलपतिः श्रीसर्वपल्ली सुधीः
सोऽयं राष्ट्रपतेः पदोन्नयनकृद्वन्द्योऽधुना राजते।।९९।।

गङ्गानाथमहाशयस्य महिमा, वाग्देवतायाः स्मितं,
सद्रत्नं मिथिलाभुवः, सुकृतिनां पुण्यं, विदां वैभवम्।
नानावाङ्मयशाखिनां ससलिलं यश्चालवालं, सुधा-
स्यन्दी सोऽमरनाथ झाः कुलपतिर्जातो मुदे मानिनाम्।।१००।।

उत्साहस्य निधिर्विधिर्बुधगुणाधानस्य, कर्मण्यता-
लक्ष्म्या भूषणमार्जवस्य निलयो, दाक्ष्यस्य केलीगृहम्।
मर्त्तिः कापि पितुः प्रगल्भधिषणः शस्तः प्रशस्ताशयो
गोविन्दः स्तुतमालवीयतनयः ख्यातोऽभवच्छासकः।।१०१।।

आचार्यः स नरेन्द्रदेव उदयश्रीशैलसानुस्थितो
भास्वान् सज्जनवारिजस्य, यशसामावासभूमिः शुचिः।
वाग्मीन्द्रो निजदेशनायकमणिश्चूडामणिः संविदां
विश्रामायतनं विदां कुलपतिः संस्थानमानप्रदः।।१०२।।

रामस्वामिवरो वरेण्यनयविद्ग्रामाग्रणीरय्यरो
दक्षो दक्षिणदिग्विभूषणमणिः शास्तापि सम्मानदः।
ऋद्धः सिद्धिमुपेयिवानिव सतामानन्दसंवर्धनः
शिक्षास्थानयशोवितानिरतो वाचस्पतिश्चागतः।।१०३।।

हेमाभः स्मितशोभिताननविधुः श्रीविश्वविद्यालयो-
द्याने नूतनताकरोऽतिजटिलप्रश्नस्य चित्रोत्तरम्।
कामं व्यापृतजीवनोऽपि मधुरो धैर्यस्य धामाद्भुतं
वेणीशङ्करझाः कृती कुलपतेरापादयद् गौरवम्।।१०४।।

निष्पक्षोऽपि दुरन्तशासननभः पारङ्गमः, सङ्गमे
स्निग्धोऽपि ग्रहिलः सदा समुचितारम्भस्य सम्पूर्त्तये।
मानी सन्नपि मानदाननिरतो, वक्रोऽपि पूर्णार्जव-
प्राणो देवगिरः प्रसारनिपुणो जीयात् कुलं पालयन्।।१०५।।

स जयति नटवरनामा हरिलालस्यात्मजो धीमान्।
कुलपतिपदे प्रतिष्ठः सत्कर्मा भगवती कोऽपि।।१०६।।

सच्छायो द्विजसेवितः पुलकितः प्रोद्यत्प्रवालागमैः
सामोदैः सुमनोभिरर्चिततनू राजाधिराजस्तुतः।
लब्धाराध्यबुधाधिपादरभरः श्रीविश्वविद्यालयः
सर्वाशापरिपूरको विजयते कल्पद्रुमो नूतनः।।१०७।।

संस्था लोकहिताय का न ललिताः सेवाव्रतैः सात्त्विकै-
रन्येषामुपकारकैरनुपमैः प्राज्ञैः समुन्मीलिताः।
वन्द्या किन्तु सरस्वतीसमुचितोत्कर्षैकहेतुः सतां
मान्या प्रत्यहमेधमानविलसत्कीर्त्तिस्त्वियं भ्राजते।।१०८।।

धन्या सा जननी, पिता सुकृतिनामग्रेसराभ्यर्चितो
याभ्यामाविरभूत् सुदुर्लभगुणग्रामो महामानसः।
यः स्वाभाविकतिग्मताविरहितो न ख्यातिमापद्रवे-
र्नाप्याह्लादनकोऽप्यलाञ्छनवशात्सम्भावितश्चन्द्रमाः।।१०९।।

येनायं धरणीतले सुमनसां सम्माननीयो महान्
विद्याकल्पतरुः प्रबोधनफलः प्रीत्या समारोपितः।
सच्छायस्य सहस्रशाखलसितस्यास्याश्रयाच्छाखिनः
सानन्दं मधुरैः स्वरैरनुदिनं गायन्ति यत्र द्विजाः।।११०।।

कश्चिज्जीवित एव विज्ञपुरुषैर्नूनं मृतो भाव्यते
धन्यः कोऽपि मृतोऽपि शश्वदमरः संख्यायते पण्डितैः।
तत्त्वं हन्त, शरीरबन्धरहितोऽप्याराध्यसे श्रीधनै-
रेषा त्वत्कृतिगौरवं वितनुते श्रद्धा सतां शाश्वती।।१११।।

पुण्यश्लोक, महामनः, सुमनसामालम्बन, श्रीधर,
प्राप्ते ते शतवार्षिकोत्सवविधौ प्रागल्भ्यसम्प्रेरितः।
एतेनाधुनिकेन पद्यशतकेन श्रद्धया सन्नतः
स्तोतु त्वां रतिनाथनामककविर्मोखर्यमालम्बते।।११२।।

धृततनुरिव धर्मो मालवीयो महर्षि-
र्व्यरचयदतुलं यं प्राच्यपाश्चात्यविद्यम्।
प्रतिदिनमभिरामोदित्वरश्रीसमृद्धः
स जयतु भुवि हिन्दूविश्वविद्यालयोऽयम्।।११३।।

लोको मङ्गलतुन्दिलो विलसतु, स्मेरानना भारती
लक्ष्म्याः सङ्गमुरीकरोतु, सुजनो नन्दत्वमन्दाशयः।
दैवी सम्पदुदेतु हन्त, पिशुनो वाचंयमो जायतां
पर्जन्यार्पितजीवनैर्वसुमती शस्यैः समृध्नोत्वलम्।।११४।।

इतिश्रीमालवीयशतकम्

×××

श्रीशारदाधरसुधारसपानसक्तः
सेव्यःसतां विबुधमण्डलचक्रवर्ती।
श्यामोऽपि कोऽपि धवलीकृतकान्तकायो
नारायणो दिशतु मङ्गलमञ्जुलं वः।।१।।

अल्पीयसैव वयसा स्थविरैरलभ्यं
सम्मानभाजनपदं स्ववशेकृतं यत्।
तत्तावकीनकृतिकौशलमेव सद्यः
प्रत्याययत्यतितरामिति नः प्रमोदः।।२।।

नो कानने निवसनं न मृगाशनञ्च
क्रौर्यं वचोभिरपि नैव न जन्तुसङ्गः।
सर्वासु दिक्षु युगपत्-परमीक्षणेन
पञ्चाननाय भवतेऽस्तु सदाञ्जलिर्नः।।३।।

शिक्षाकर्मण्यताया धृतिरखिलमहाविघ्नजालावलीनाम्
दीक्षादैन्यप्रशान्तेर्निधिरतुलमहाश्रौतसंविन्मणीनाम्।
पूर्वादिर्ज्ञानमानोरुपशमनिलयः सर्वथा ध्वान्तराशेः
सौहार्दं मानवानां जयति निरुपमः शेवधिः सद्गुणानाम्।।४।।

दाक्षिण्यस्यामवलम्बः शुचिरुचिरुचिरावासभूमिः कृपायाः
जीवातुर्वेदवाचः प्रणयिपरिजनः काव्यविद्यावधूनाम्।
आन्वीक्षिक्याः प्रमोदास्पदमथसुकृताचारधाम्नोऽतितुङ्गं
शृङ्गं शृङ्गारसज्जा जयति सुरगिरो वाग्मितायाः विलासः।।५।।

आशा केन्द्रं बुधानां विशदसुरगवी प्राणरक्षैकहेतुः
सेतुः शास्त्रार्थसिन्धोर्निरवधि निपुणो विज्ञविज्ञानसिद्धः।
मर्यादाऽऽर्यव्रतानां परिणतिरमला पुण्यशीलक्रियाणाम्
औदार्यस्यावतारः स्फुरदमलयशोराशिराभाति भाग्यात्।।६।।

नैवाजः पूर्वजस्ते न च जनकसुता वल्लभा नापि दास्याः
कूटेनारण्ययात्रा न खलु दशमुखेनापनीता प्रियैव।
सौहार्दं मर्कटैर्नो न जलधितरणं न द्विजप्राणघातः
प्रातः स्मर्तुं तथापि स्फुरति सुचरितं रामचन्द्रस्य धन्यम्।।७।।

निःश्वासोर्भव्यतायाः विबुधवरचिरप्रार्थिताभीष्टसिद्धि-
वृद्धिर्वाग्देवताया प्रतिहतनियतेरुत्सवो योग्यतायाः।
सौभाग्यं ज्ञानधाम्नोऽभ्युदयशिखरिणो भूषणं पूर्णचन्द्रं
सौजन्यस्यालयं त्वां प्रणमति नितरामेष विद्यालयो वः।।८।।

यस्मिन्प्रकाण्डपरिनिष्ठिततत्वबोधः
आविष्कृता विबुधपूजितवाग्विलासाः।
पारे सहस्रमभिवन्दितपादपीठा
विद्यावतां परिषदि प्रथिताभिधानाः।।९।।

प्राच्यागमेषु निखिलेषु परप्रबोधः
प्राध्यापने प्रवचने रचने च वाचाम्।
कीर्त्यानितान्तसितया धवलीकृताशाः
मूर्ध्निस्थितिमतिमतामलभन्त सन्तः।।१०।।

विद्याप्रदानरसिका गुरवो निसर्गाद्
विद्यार्थिनोऽपि निजकर्मणि बद्धरागाः।
श्रीमालवीयकुलपत्यधिकारिवर्ग-
गर्वं विहाय सुविधां व्यतरन् समेभ्यः।।११।।

या भारती जितसुधारसधारयेलां
सिक्त्वा प्ररोहयति संविदुदारवल्लीम्।
सर्वासु दिक्षु मधुसौरभभव्यकोषैः
पुष्पैः समेधयति भूतलभाग्यलक्ष्मीम्।।१२।।

या विश्वमानवमनांसि परिष्करोति
श्रेयांसि दिक्षु सकलासु भृशं तनोति।
अन्योन्यमुन्नयति बन्धुरबन्धुतायाः
सौरस्यमुज्झितसमस्तविकारजातम् ।।१३।।

हिंसां घृणामनुचिताचरणप्रवृत्तिं
दर्पान्धतामकरुणां विषमानुवृत्तिम्।
स्वान्तस्थकण्टकमयीमपनीतिरीतिं
सर्वात्मना शमयतीह सरस्वतीयम्।।१४।।

एषा नितान्तजरतीप्सितपूरयित्री
क्षीणापि विश्वजनमानसराजहंसी।
अत्यन्तकल्मषकलङ्कसपङ्कलेप
दृप्तात्मनामपि मनांसि विशोधयन्ती।।१५।।

सारस्वती विमलमञ्जुलवारिधारा
सारं समेधयतु मानवताधिलक्ष्म्याः।
लोकेऽप्यलौकिकसुखानि समुत्सृजन्ती
कल्याणमाकलयतात् सुरभारती वः।।१६।।

एतेन कौस्तुभजयन्त्यतुलोत्सवेन
दिग्देशकालकलमार्जितभाषितेन ।
भूयः समादरभरेण भृशं विभान्ती
श्रेयांसि नो वितरतात् सुरभारती नः।।१७।।

प्राच्याः प्रतीच्या अथ दाक्षिणात्याः
प्राज्ञा उदीच्या इह संगता ये।
देशे प्रशस्ते नियते च काले
तान् प्रीतिरीत्या वयमर्चयामः।।१८।।

मित्रोदये वितिमिरा दिश उल्लसन्ति
राजीवराजिरनुविन्दति मुग्धकोषम्।
चन्द्रोदये हसति कैरविणी प्रफुल्ला
नृत्यन्ति किं न शिखिनो घनमालिकासु।।१९।।

मुग्धे मधौ मलयमारुतसन्निधाना
हासाञ्चिता अभिनयन्ति लताः सलीलम्।
उद्दामयौवनमदेन मधूकमाला
वासन्तिकं परिसरं सुरभीकरोति।।२०।।

आमोदमन्दिरमनर्घमरन्दकोष-
माकन्दमञ्जुलवनं प्रतिपद्य सद्यः।
पुंस्कोकिला मधुकराश्च दिगन्तराले
गायन्ति कुड्मलितकाननकान्तभूमौ।।२१।।

नेपथ्यमण्डनविधानमलङ्क्रियायाः
शृङ्गारदैवतमलभ्यरसेन्दिरायाः ।
मूर्तं प्रसादमतिदुर्गमसूक्तिलक्ष्म्याः
सम्मानमूलमतुलं प्रणतः कवीनाम्।।२२।।

सौरभ्यभव्यनवकुङ्कुमभालविन्दु-
मामोदवर्धनपरं रुचिराङ्गरागम्।
लोकोत्तरं किमपि मानवकीर्तिलक्ष्म्या
मन्दस्मितं नमत चेतसि कालिदासम्।।२३।।

अन्तर्हितेषु मधुवर्षिपयोधरेषु
मूकेषु सत्स्वपि विहङ्गमण्डलेषु।
वासन्तिकस्य विपिनस्य शुभासमृद्धि-
र्नाल्पीभवेत् परमते किल जागरुके।।२४।।

प्राणप्रदं भरतभूमि परम्परायाः
शिल्पं नवं सरससूक्तिविनिर्मितानाम्।
चेतस्विनां हृदयहारमहार्यशोभं
लोभं विदां विहितविभ्रममानतोऽस्मि।।२५।।

सञ्जीवनं रसिकमूर्च्छितमानसस्य
विश्रामधाममनसः सुमनोऽवलानाम्।
धन्यं धुरीणकविमण्डलभागधेयं
नर्मोन्नतं जयति मङ्गलदेवतायाः।।२६।।

मितेषु शब्देष्वमिता सदर्थाः
स्फुरन्ति यस्य प्रतिभाविलासात्।
तमुत्सवं सत्कवि-जीवितस्य
नमामि सौभाग्यमलभ्यसूक्तेः।।२७।

×××

## प्रशस्ति-पञ्चाशिका

भाले चन्दनबिन्दुमिन्दुसदृशं कामं समुत्कण्ठितां
कण्ठे शुभ्रतमोत्तरीयकपटेनाश्लिष्य कीर्तिं सिताम्।
अङ्गे कञ्चुकमुज्ज्वलं शिरसि चोष्णीषं किरीटोपमं
ध्यायाम्यद्भुतधाम गौरमुदितं श्रेयस्करं प्राणिनाम्।।१।।

किं धर्मो धृतविग्रहः, किमुदितो निर्लाञ्छनश्चन्द्रमाः
किं प्रीतालयानिलः[१] सुमनसां किं वा गृहीताकृतिः।
भारत्या यशसां चयः किमनलः किं वाग्मितायाः स्मित-
स्पन्दः किं कविरेव नीतिविषये श्रीमालवीयोऽभवत्।।२।।

तातो नो जलधिर्नचापि विषमश्रीः कालकूटोऽग्रजः
सामोदा न सुरा स्वसा न कमला, नो बान्धवः सिन्धुरः।
नच्छाया मलिना दिने, न रजनीसङ्गो, न बन्धुः स्मरो,
भीतिर्नापि विधुन्तुदात्तदपि सुप्रीतो द्विजो राजते।।३।।

आस्ये यस्य सरस्वती रसवती, बुद्धौ सदा नर्मदा,
कालिन्दी प्रणयामृतेव हृदये, गङ्गा पवित्राशये।
पादान्ते प्रपतन् समुद्रनिवहो, गोदाथ मोदावहा
स्वान्ते, प्रीतिमयी चिराय रमते शिप्रा सिते मानसे।।४।।

धर्मे धन्यसनातने निरुपमां भक्तिं दधानोऽन्वहं
पुण्या भारतमातरं परवशक्लेशाद् विमोक्तुं रतः।
नित्यं नूतनकल्पनाविलसितोऽप्यास्थावतामग्रणीः
किं किं नाचरति स्म भारतभुवः स्वाधीनताप्राप्तये।।५।।

गङ्गायां स्नपयन् प्रभोरुपदिशन्मन्त्रं पवित्राशयः
सर्वानन्त्यजजातिसम्भवजनानुन्नेतुमौदार्यतः ।
धर्माचार्यविरुद्धदुस्सहवचोबाणापविद्धोऽप्यलं
कल्याणाद् विरराम नैव दलितव्रातस्य सामाजिकात्।।६।।

पाश्चात्त्यैः प्रतिपूजितं बहुविधैः, सेवाव्रतैर्दीपितं
क्राइष्टाभिधधर्ममत्र दलिते दीने जडे मानवे।
व्याख्यातुं ननु दीक्षितुं च विधिवद्धर्मप्रचारोद्यतान्
उद्वीक्ष्यातितरां विषण्णहृदयः कोऽन्योऽभवत्त्वादृशः?।।७।।

---

*१. पाठान्तरः सामोदो मलयानिलः।*

श्रीमत्तीर्थपतिस्मितैर्धवलिते पुण्ये त्रिवेणीतटे
माघे माधवपूजया परिसरे प्राशस्त्यमापादिते।
आयाते प्रचुरे जने सुकृतिभिर्धर्मप्रचारव्रतैः
साकं वैदिकधर्मतत्त्वविशदव्याख्यां त्वमारब्धवान्।।८।।

साम्रेडं परिमार्दितोऽपि विपदां पद्भिर्न यो म्लायति
श्लाघामेति स एव वीरपुरुषः पुंभिः समभ्यर्चितः।
हेम्नः कान्तिरुदेति तीव्रदहनज्वालासु दाहात् परं
चण्डे चण्डकरे तपत्यपि मरौ वन्द्यं प्रसूनस्मितम्।।९।।

अर्थं नाधिकरोति योऽत्र विपुलं तस्याखिला कामना
स्वान्तं कृन्तति, सन्तनोति नयने ध्वान्तं दिनेऽप्यद्भुतम्।
एषोऽलीयत किन्तु लोकसरणिस्त्वय्युद्यते कर्मणे
सङ्कल्पं सफलीविधातुमिव ते लक्ष्मीः स्वयं नृत्यति।।१०।।

वर्णो[१] यस्य सुवर्णदर्पदलने लेभे प्रतिष्ठां परा-
मास्यं दास्यमुरीचकार शरदो राकेश्वरेणार्पितम्।
भ्रान्त्वा दिक्षु चिरेण वासभवनं यत्प्राप सा वाग्मिता
वन्दे विश्रुतमालवीयकुलजं तं विश्वसम्मोहनम्।।११।।

धर्मे यस्य परानुरक्तिरतुला भक्ती रमावल्लभे
शक्तिर्व्याप्ततमो निहन्तुमुदयद्विद्यासमुद्वर्धने।
आसक्तिर्निजमातृभूम्यसुलभस्वातन्त्र्यलक्ष्म्यागमे
स श्रीमान् प्रसरत्प्रभूतमहिमा रेजे चिरं भारते।।१२।।

नेतारो निजमातृभूमिचरणे न्यस्तां दृढां शृङ्खलां
छेत्तुं स्वार्थपमास्य दास्यभवने हन्तुं[२] हृदा दीक्षिताः।
किन्त्वेषूत्तमनायकेष्वपि भृशं प्रातिस्विकीमर्हतां
बिभ्रत् पूज्यमहामनाः प्रतिदिशं वन्द्योऽभिनन्द्योऽभवत्।।१३।।

बुद्ध्या देवगुरुं, नयेन दितिजाचार्यं, सुधामाधुरीं-
वाचा, पावनकर्मणा द्विजवरं, धैर्येण शैलेश्वरम्।
गाम्भीर्येण महोदधिं, निरूपमोत्साहश्रिया मारुतं
भास्वन्तं सततोदयेन, वपुषा कामं जिगायान्वहम्।।१४।।

---

*१. पाठान्तरः वाणी।*
*२. पाठान्तरः हर्तुं।*

ब्रह्मर्षेर्भवतः सतां मतिमतामग्रेसरात् पावनीं
श्रीमद्भागवतीं कथां मधुमतीं पीत्वा तुतोषामितम्।
भक्तिं चेतसि, वक्षसि प्रगुणितां शक्तिं, विरक्तिं परां
पापात्, सर्वजनेऽनुरक्तिमुदितां गाँधी महात्मान्वभूत्।।१५।।

कालिन्दीपुलिने वसन्नपि पिबन् गाङ्गं जलं निर्मलं
संलीनेऽपि सरस्वतीरसमये मज्जन्नलं स्रोतसि।
अङ्के तीर्थपतेर्गृहीतजननः क्रीडन् भृशं कौतुकाद्
वव्रे दिव्यतमप्रकाशजननीं काशीं स्वकर्मस्थलीम्।।१६।।

जाड्यध्वान्तसमावृतं हृतधनं दीनं विलीनप्रभं
राष्ट्रं भारतवर्षमेतदतुलं भायात् पुनर्भूतले।
इत्यन्तः परिभावयन्निरुपमं ज्ञानप्रकाशाञ्चितं
सम्यक् स्थापितवानलभ्यमहिमा श्रीविश्वविद्यालयम्।।१७।।

वासन्ती प्रियपञ्चमी भरतभूभाग्यस्य वाग्देवता-
प्रादुर्भावमहोत्सवाऽपहरते जाड्यं प्रकृत्यञ्चलात्।
इत्यालोच्य सरस्वतीसमुदयानन्दप्रकर्षोज्ज्वले
संस्थाया निदधे शिलामनुदिनं प्राप्तप्रभूतोदयाम्।।१८।।

हस्ते नैकपणोऽपि यस्य स महारम्भेषु संरम्भवान्
व्याकर्तुं स्वसमीहितं दिशि दिशि प्रातिष्ठतोत्कण्ठया।
श्रुत्वा तत्परिकल्पनां धनवतां धुर्या वदान्या मुदा
राजानोऽर्पितवैभवाः सफलतामीयुः स्वकोषश्रियः।।१९।।

देशप्रेममहाध्वरे समुदिताः सर्वेऽपि सन्दीक्षिता
आचार्यं परिकल्प्य यं सफलतां स्वाधीनतां लेभिरे।
सर्वस्वं हविरत्र मन्त्रविधिना हुत्वाऽखिलान् याज्ञिकान्
सिद्धानारचयाञ्चकार स सितां कीर्तिं व्यतानीद् द्विजः।।२०।।

साम्राज्ये शिशिरस्य यत्र विपिने दैन्यं समुज्जृम्भितं
प्रातर्हन्त! हिमाश्रुपातविधिना भूमीरुहो रोदिति।
तत्रैवागमनाद् वसन्तनृपतेर्वल्लीं समानर्तयन्
आमोदं मलयानिलो वितरति प्रीतः पिको गायति।।२१।।

भृङ्गो गुञ्जति मौनमुज्झतितरां कूजन् कलं कोकिलो
वल्ली नृत्यति जीर्णशाखिनिवहोऽप्युद्भासते पल्लवैः।
पुष्पाण्यातनुते लतासहचरो भूमीरुहो निर्भरं
सामोदा विपिनस्थली विजयते संप्राप्य सङ्गं मधोः।।२२।।

राजन्ते जितहीरका द्युतिभृतस्ताराः शरद्यामिनी
श्यामाङ्गावरणाय शुभ्रकुसुमाकारास्तु नीलाम्बरे।
ज्योत्स्ना किन्तु दिवं भुवं च युगपत् संक्षालयन्ती सुधा
पूर्णेन्दोः प्रथते महोर्मिरिव सा क्षीराम्बुधेर्द्योतते।।२३।।

त्यक्त्वा सप्तवितस्तिकायमविशद् यो विश्वविद्यालयं
स्वप्राणैः प्रगुणीकरोत्यनुदिनं प्रोत्कर्षयन् वैभवम्।
आचार्यानधिकारिणो मतिमतो मान्याँश्च विद्यार्थिनः
सेवासद्व्रतशालिनोऽपि स निजाचारेऽभिषिञ्चत्यलम्।।२४।।

ध्वान्तध्वंसपटुः प्रसुप्तनयनान्निद्रां तु विद्रावयन्
आमोदं जनमानसाम्बुजवने प्रोल्लासयन् निर्भरम्।
सर्वत्र प्रसरत्सुवर्णकिरणान् विस्तारयन्नोजसा
नव्यः कोऽपि सहस्रदधितिरयं प्रादुर्बभूवावनौ।।२५।।

आकर्षतीव पुरुषोत्तमचारुचित्तं
पुण्यात्मनां मनसि कौतुकमातनोति।
नेत्रेऽञ्जतीव जगतोऽञ्जनमञ्जुरेखां
लोकार्चिता मदनमोहनकीर्तिलक्ष्मीः।।२६।।

सारं समुन्नयति सान्द्रतमोऽपहन्तृ
सारस्वतं किमपि धाम वसुन्धरायाम्।
अङ्गश्रियापि सुषमामसमां सृजन्ती
मोहं हृदो हरति यत् प्रसभं जनानाम्।।२७।।

क्षीराम्बुधेरपि तरङ्गविलासभङ्गीं
ज्योत्स्नां शरद्युचितामपि शीतरश्मेः।
कान्तिं मरालवपुषोऽप्यमलां जयन्ती
जागर्त्यहो! मदनमोहनकीर्तिलक्ष्मीः।।२८।।

अस्मिन् प्रिये परिसरे महात्मना[१] त्वं
व्याप्नोसि दर्शकमनो मदयन्नितान्तम्।
मोहं भृशं सुमनसामपि सन्दधान-
स्त्वं मोहनेन वपुषापि विभासि शश्वत्।।२९।।

धामाद्भुतं जयति वागधिदेवतायाः
शृङ्गारकल्पमिव शिल्पकलाङ्गलक्ष्म्याः।
यत्सेवने सुमनसो मनसोऽप्यगम्या-
मासादयन्ति मुदितामुदितां स्वचित्ते।।३०।।

धन्यं त्वया कुलमिदं निरमायि वाचो-
देव्या विलासभवनं भुवनामिरामम्।
यत् सेवितुं ग्रहगणोऽपि नवाभियोगैः
किं किं न कल्पयति कौशलमात्मशक्तेः?।।३१।।

कार्त्तस्वरांशुकमुपाहरते दिनेशः
सर्वाः कलाः कलयतीव कलाधरोऽपि।
अङ्गारकोऽप्युपनयत्यतुलं प्रताप-
मङ्गारकल्पमिह विस्मयहेतुभूतम्।।३२।।

सर्वत्र सञ्चरति किं न बुधो घुरीणो?
वाचस्पतिर्न किमुदञ्चति मञ्जुलीलः?
गायत्यजस्त्रमिह सत्कविरस्य गीतं
मन्दोऽप्यमन्दमुदमर्पयतीव शश्वत्।।३३।।

आरामरम्यकमलां तरुवल्लरीणां
श्यामत्विषोपचरतीव विधुन्तुदोऽपि।
केतुस्तु नृत्यतितरामनिशं पुरस्ताद्
वाग्देवताललितमन्दिरगोपुरस्य ।।३४।।

कस्तूरिकातिलक एष मनुष्यतायाः
सौभाग्यमङ्गलमणिर्गुणिनां सुकीर्त्तेः।
कर्मण्यताहृदयवल्लभरत्नहारः
सारः परः सुमनसां जयतीह धन्यः।।३५।।

१. पाठान्तरः मदनात्मना।

ज्योत्स्नाङ्कुरो विजयते द्विजराजतायाः
स्तन्यत्रपाकवच एव च मातृभूमेः।
वाग्वीरुधः सलिलसम्भृतमालवालं
कल्याणकल्पतरुरेव महाविभूतिः।।३६।।

सारस्वते महिमशालिनि मन्दिरेऽस्मिन्
उद्दामशक्तिनिलये त्वयि चास्त्यभेदः।
इत्याकलय्य विनतोऽन्यतरस्य पूजां
कुर्वन् द्वयोरवचितिं मनुते मनीषी।।३७।।

हित्वा भवान् भुवनमोहनमद्वितीयं
स्वर्णप्रभं स्फुरितसप्तवितस्तिकायम्।
एवं ततोऽपि रमणीयतरं स्वविश्व-
विद्यालयाख्यवपुरुद्वहते विशालम्।।३८।।

किं ब्रह्मलोक इह भूतल आगतोऽस्ति?
किं वा विधेर्निपुणतैव दधार देहम्?
वाचस्पतेः किममला कमलाऽवतीर्णा?
पूर्णावनेः सुकृतराशिफलं किमेतत्?।।३९।।

ज्योतिश्चिरन्तनमपास्तजोविकारं
रत्नद्युतिप्रतिममुज्झितवातभीति ।
सान्द्रान्धकारहरणे जितभानुदीप्ति
सारस्वतं जयति धाम मनोऽभिरामम्।।४०।।

गाढं तमो हरति, नित्यमुदेति, सर्वान्
सुप्तात् प्रबोधयति, नन्दयति द्विजाब्जम्।
रात्रावपि स्फुरति, निर्जितराहुकेतु-
राभासते कोऽपि रविर्नवीनः।।४१।।

स तीर्थराजो जननेन पूतः, सूतो द्वितीयोऽप्यथ तीर्थराजः।
यत्र स्फुरज्ज्ञान-कला-क्रियाणां, निःष्यन्दते कापि नवा त्रिवेणी।।४२।।

एषा नवीना प्रतिभाति संवित्, तरङ्गमालोल्लसितेव गङ्गा।
हंसावलिर्यत्पुलिने स्वनन्ती, सन्तिष्ठते मानसमुक्तरागा।।४३।।

परस्परस्नेहसुधां स्रवन्ती, कलिन्दकन्येह कलाविलासा।
स्रोतो यदीयं विबुधान्तरङ्गे, प्रसादभङ्गीं जनयत्यजस्रम्।।४४।।

सरस्वती यत्र परःसहस्र, धाराभिरङ्गीकृतदृश्यरूपा।
निःष्यन्दते सद्द्विजसेव्यकूला, लसद्दुकूला ललनेव रम्या।।४५।।

यस्याकृतिर्ह्रपयतीव लक्ष्मीं, धृतावलेपां त्रिदशालयस्य।
प्रवर्तते यत्र सदा प्रकृत्या, ज्ञान-क्रिया-सन्ततिसप्तन्तुः।।४६।।

अन्विष्य लोकोत्तरकान्तिभाजः, सुधीन्द्रमौलेर्मुकुटान्मणीशान्।
विन्यस्य चैतस्य कुलयशोभा, त्वया समृद्धिं गमिताऽद्वितीयाम्।।४७।।

विना स्वधर्माचरणेन विद्या, हृद्यापि नाविष्कुरुते चरित्रम्।
इत्येतयोः सङ्गमपुण्यभूमिः, परिष्कृतेयं भवताऽवता शम्।।४८।।

येनाद्वितीयेन कुलेन देश, भक्त्योन्नतो नायकरत्नराशिः।
समर्प्यते राष्ट्रसमृद्धिहेतुः, केतुः स्फुरन् नृत्यतु तस्य शश्वत्।।४९।।

विद्वज्जनाभ्यर्चितकीर्तिरेखा, 'प्रज्ञा' कुलोत्कर्षमूपाहरन्ती।
प्राच्यप्रतीच्योभयतत्त्वसारं कवीन्द्रवाचं च पुरस्करोतु।।५०।।

सद्वृत्तबोधकिरणं नररत्नजात-
मुत्पादयन् सुचरिताकर एष दिव्यः।
आचन्द्रतारकमुदित्वरकीर्तिलक्ष्म्या
संसेवितोऽवतु[१] जगन्निजवैभवेन।।५१।।

---
१. पाठान्तरः संसेवितोऽवति।

# ९८.प्रेमलताजीवितम्

वर्षन् कृष्णघनोऽमृतं सुमधुरं तप्तात्मनां दुस्सहम्
क्लेशावेशमशेषमाशु शमयन् सर्वैः सदाऽभ्यर्च्यते।
सन्तप्तां वसुधां निरावृततमामाच्छादयन् सत्-तृणैर्-
लोकेऽलौकिकरीतिनीति-निपुणः पुण्यात्मभिः स्तूयते।।१।।

एतस्मिन् जगतीतले वसुमती-सौभाग्य-सम्भावितं
भव्यं भारतमुन्नतं विजयते सत्कर्म-शर्मोल्लसत्।
अस्मिन् पञ्चनदः प्रदेशतिलको जन्मस्थली संस्कृतेर्-
जीवातुस्तपसो विभाति सुकृतोत्कर्षैः सुतीर्थव्रजैः।।२।।

अस्मिन्नेव यशोविभूषिततमे प्रान्ते प्रतिष्ठास्पदे
जागर्त्त्येव नकोदरो बहुविधैर्विद्याकलाद्यैः स्तुतः।
एतस्यापि महत्त्वमेधयति यज्जालन्धरो विश्रुतः
तत्र प्रेमलता द्विजोत्तमकुले लेभे जनिं कांक्षिताम्।।३।।

मायासतीरतिसमर्चितलालचन्द्रौ
जायापती समुदितौ मुदितावभूताम्।
अन्योन्यसत्प्रणयसत्फलकल्पसिद्धिः
कन्यैव केवलमियं जनिमाप तुष्ट्यै।।४।।

आद्यः सुतश्चरमसन्ततिरप्यपूर्वः
पुत्रस्तयोर्मिलितयोरथ चान्तराले।
मध्ये स्वसा परमनिर्मलरागरूपा
जाता बभौ प्रणयमूर्तिरियं प्रसन्ना।।५।।

पुत्रावुभौ कवलितौ विकरालकाल-
व्यालेन शैशववयस्यभिरामरूपौ।
जाता चिराय मुदिता तनयाऽत्युदारा
विद्याकलोल्लसितप्रेमलताभिधाना ।।६।।

कारुण्यप्रतिमूर्त्ति-मातृजठराज्जाता द्विजेन्द्रान्वये
वात्सल्यप्रतिमः पिता प्रतिदिनं स्नेहामृतं वर्षति।

पित्रोः प्रीतिमुपेयुषी मधुमयीं वाचं वदन्ती मुदा
सुस्पष्टां निजशैशवीं व्यपनयत् प्रीतामवस्थां स्थिराम्।।७।।

जालन्धरान्तर्गतस्य नकोदरस्य
भूमिर्यदीयजनुषा भृशमुल्ललास।
बाल्ये वयस्यनुबभूव महानगर्यां
रूपं नवीनतममानवसभ्यतायाः।।८।।

दिल्ल्यामथ मुम्बय्यां कलिकातायां महानगर्याञ्च।
बाल्यं ह्यस्या विगतं विज्ञातञ्चाधुनातनं वृत्तम्।।९।।

सा चैकादशवार्षिके वयसि सद्बुद्ध्याः प्रकर्षात् परम्-
आद्यां 'मैट्रिक'-नामिकामुदतरत् क्लिष्टां परीक्षां मुदा।
इन्द्रप्रस्थ-यशस्यशस्य-सुमहा-विद्यालयेऽधीतिनी
कक्षां स्नातक-नामिकामपि समुत्तीर्णाऽल्पकालेन सा।।१०।।

दिल्यामेव वसन् पिता स्वतनयानैसर्गिकीमर्हतां
पश्यन् गायन-वाद्य-नृत्य-विषयेऽप्युत्साहयन् बोधने।
चित्राणामथ निर्मितौ नवनवां श्लाघ्यां कलां शिक्षितुम्
अर्हान् योग्यतमान् सुशिक्षकवरान् संयोजितुं द्राक् क्षमः।।११।।

शर्मा श्रीलालचन्द्रः शुचिरुचिरुचिरो देशभक्तो जितात्मा
कर्मण्यः 'मोहनस्य' प्रगुणितमहिमोत्कर्षभज्यङ्घ्रिपद्मे।
सत्याहिंसानुरागे निरततममतिव्यापृते नेतृमान्ये
श्रद्धालुस्तत्प्रबोधे निरतिशयसुखं मन्यमानोऽनुमेने।।१२।।

यद् यद् गाँधिमहात्मना निजमनःशुद्ध्यै व्रतं स्वीकृतं
तद् तद् पालितवानयं नयविदां नीत्यां मुदा दीक्षितः।
सत्यं सद्ब्रह्मचर्यं सकलजनमनोमोदनं चाप्यहिंसा-
दीक्षायां रक्तचित्तं सततमभिमतं स्वं मतं व्याजहार।।१३।।

योऽभूद् राष्ट्रपिता स एव नितरां क्रूरात्मना घातितः
तस्मिन् हन्त दिवंगतेऽथ तनयाचारं चिरं पालयन्।
शश्वद् भूशयनं चकार जगृहे यः कम्बलं स्वासनं
नैवात्मीयगृहे, पुनर्न कृतवान्नत्युत्सवायोजनम्।।१४।।

यश्चाध्यापितवान् सुतां प्रतिदिनं प्रेम्णाऽऽङ्ग्लभाषां भृशं
कौशल्यं सुदृढीचकार विदुषां सङ्गेऽपि सम्भाषितुम्।
शुद्धां लेखननैपुणीं निहितवाँश्चित्ते तदीयेऽद्भुतां
गेहे किन्तु सदा स्वमातृवचसो व्याहारमाकारयत्।।१५।।

नेतॄणामभिभाषणेषु विदुषां शास्त्रीयचर्चास्वपि
प्रायः सम्मिलितुं सुतां सहचरीं नेतुं सदोत्साहवान्।
शिक्षायाः परिपूर्त्तये समुचिताचार्यान् गृहैवानयत्
विद्यायां विलसत्कलासु च सदा योगं व्यवस्थापयत्।।१६।।

विद्याकलापपरिणतिं परिभाव्य चित्ते,
माता-पिता च तनया मथुरामुपेताः।
गौडीयवैष्णवसनातननीतिरीतिं
सम्यग्-विबोद्धुमिव तत्र मुदं प्रपन्नाः।।१७।।

''चैतन्य''-सम्मत-मतप्रतिपादकानि
सत्पुस्तकानि विधिवत् प्रतिपत्तुकामाः।
सत्सङ्ग-सम्भृत-हरिस्मरणे प्रभूतं
पीयूषपूरमनिशं मधुरं धयन्ति।।१८।।

अस्मिन् क्रमे विविधतीर्थवरेषु गन्त्रा
पूजाविधौ निरुपमाशनसुप्रसादम्।
सुस्वादुवस्तुपरिपाककलासु दीक्षां
लब्ध्वा भृशं मुमुदिरे परितोषवन्तः।।१९।।

सुस्वादुभोजनविनिर्मितिदक्षतायां
प्राथम्यमापदतितीव्रमतिप्रकर्षात् ।
रत्याऽऽकलय्य गृहकर्मणि कौशलस्य
सन्धानसौरभसमृद्धिमुरीचकार ।।२०।

एतेषु भक्तजनमानसपावनेषु
सञ्जातजीवितसुधारसलाभलुब्ध्या ।
सप्ताब्दिकोऽवधिरगात् क्षणमात्रकल्पः
कालः पुनर्गतिमधात् परिवर्तनीयाम्।।२१।।

एवंविधेऽपि विषये निजतीक्ष्णबुद्धेः
सिद्धिं प्रदर्श्य चकिताँश्च गुरून् विधाय।
भक्तिप्रवाहपतितान् निजमातृ-पितृ-
वाञ्छां प्रपत्तिरसिकामकरोत् प्रकृत्या।।२२।।

एवं क्रमे प्रचलिते मनसो निरोधं
कृत्वा सुचिन्तनमयी जननी सुतायाः।
कल्याणमाप्तुमवशिष्ट-विशिष्ट-विद्या-
सम्पूर्त्तये स्वदयितं भृशमैरयत् सा।।२३।।

तत्प्रेरणा-परवशो जनकः निसर्गात्
कन्याहिताय सततं हृदि जागरूकः।
नीत्वा सुतां पिपठिषापरिपूर्तिकामः
काश्यां समागमदनुग्रहमूर्त्तिरेषः।।२४।।

मध्ये विरामवशतोऽध्ययनक्रमस्य
कुण्ठां समापयितुमुद्यमशालिनीयम्।
स्वल्पश्रमैः कतिपयैर्दिवसैश्च भूयः
सुप्तामिव स्वप्रतिभां विदधे प्रबुद्धाम्।।२५।।

काश्यामत्र यदोच्चशिक्षणविधेर्निर्वर्तने व्यापृता,
चित्तेनास तदैव दैववशतः सङ्गीतशाला नवा।
सञ्जाता त्वविगीतगीतमहितान् ओङ्कारनाथाभिधान्
प्राचार्यान् प्रतिपद्य विज्ञपरिषत्स्वामन्त्रयत् तान् गुरून्।।२६।।

सा हिन्दीं सुरभारतीं च युगपत् संसेव्यामानाऽऽदरात्
आचार्यान् उपलभ्य[१] वैद्यविबुधाधीशान् प्रशस्याशयान्।
श्रीमन्तं च यशस्विनं सुमनसं ख्यातं द्विवेदिद्विजम्[२]
सम्प्राप्यार्चनतत्पराऽर्जितवती पूर्णार्हतामुत्तमाम्।।२७।।

साहित्ये विषये प्रविश्य विधिवत् शिक्षा-परीक्षाक्रमैर्
भूयो ज्ञातुमियेष काव्यनिगमाम्भोधेस्तु गम्भीरताम्।
वैदुष्येऽप्रतिमान् सुधीन्द्रतिलकैरभ्यर्हितान् विश्रुतान्
पूज्यान् सद्गुरुदेववन्द्यसुकवीन्[३] भक्त्या सिषेवे गुरून्।।२८।।

---

*१. आचार्य हजारी प्रसाद द्विवेदी (हिन्दी-संस्कृत वाङ्मय-रस के समन्वययाचार्य)।*
*२. महामहोपाध्याय सर्वतन्त्रस्वतन्त्र पण्डित श्री देवी शास्त्री, ये ही फिर संन्यस्त हो कर काशीस्थ सुमेरुपीठ के शङ्कराचार्य महेश्वरानन्द सरस्वती हुए।*

यो दर्शनेषु सकलेषु समानमानस्- तन्त्रे
स्वतन्त्रधिषणोऽखिलपाणिनीये ।
काव्यागमे च कविकर्मणि लब्धसिद्धिः
प्राध्यापने प्रथितकीर्तिरभूत् प्रधानः ।।२९।।

तस्मिन् दृढ़े परिवृढे सति विद्यमाने
प्रौढिं गतेऽत्र विष याध्ययनावबोधे ।
साहित्यसौरभमितः प्रसृतं जगत्याः
सर्वासु दिक्षु मलयाञ्चलमारुतेऽस्मिन् ।।३०।।

साहित्यशास्त्रविषये विततावबोधो
निर्दोषशोधविषयेऽपि कृताधिकारः ।
प्राध्यापने सुरुचिरे रचनाप्रपञ्चे
चिन्तामणिः प्रपठ तामिहराममूर्त्तिः[३] ।।३१।।

एभ्यो गुरुभ्य उपलभ्य विशिष्टबोधं
साहित्यिकं परममङ्गलमूलमूल्यम् ।
विद्याऽनवद्यगुणदोषविचारचारून्
ग्रन्थानतीव जटिलानपि चाध्यगीष्ट ।।३२।।

बाल्ये या गृह एव शिक्षितवती सङ्गींतमारम्भकं
लोके नूतनवस्तुबोधविषये जागर्ति यस्या रुचिः ।
पूर्वाभ्यासवशाद् सदा श्रुतियुतं गीतं प्रियं गायति
सैवाऽनल्पकलासु सिद्धिमयते निर्बाधबोधेच्छया ।।३३।।

भूयो ज्ञातुमियेष काव्यनिगमाम्भोधेरगाधात्मतां
साहित्ये विषये प्रविश्य विधिवत्कक्षा-परीक्षाक्रमे ।
वैदुष्येऽप्रतिमान् सुधीन्द्रतिलकैरभ्यर्हितान्विश्रुतान्
पूज्याचार्यपरम्परासु महितान् सद्देशिकानाश्रयत् ।।३४।।

नानाशास्त्रकलादिषून्नततमां शिक्षां परीक्षां तथा
साफल्यातिशयात् प्रपूर्य विधिवत् प्राप प्रतिष्ठां पराम् ।
सम्यग् भूरिपरिश्रमेण नितरामन्वेषणोपाधिना
धन्यौचित्यसमर्चिता समभवद् विद्वद्भिरप्यादृता ।।३५।।

---

*३. पं राममूर्ति त्रिपाठी।*

स्वाध्यायेन सदार्चिताः स्वगुरवः, प्रीताः सतीर्थ्याःकृताः,
सामोदाः सुहृदस्तथा सहचरा निर्मत्सराबान्धवाः ।
चारित्र्येण सुचारुणा सुमनसः, स्नेहेनसम्भाविताः
सौम्याः शीलसमन्विताः स्वरुचिराचारेण शुद्धाशयाः ।।३६।।

याऽवेदीत्सुरभारतीमसुलभांव्युत्पत्तिसम्पद्वृतांपूर्णामाङ्गलगिरं
करे कृतवती सम्भाषणे लेखने।
प्रान्तीयाभिरनल्पभूतिविलसद्भाषाभिरभ्यर्हितां
हिन्दीं राष्ट्रगिरं बुबोध युगपद् व्याहर्त्तुमीष्टेऽनिशम ।।३७।।

स्तनेनैकेनैव स्फुरति सुषमा यन्त्रयुवतेस्-
तथैकं साहित्यं प्रथयति मुदं नोरसवताम
अथ स्यात् साहित्यं सरसमिहसङ्गीतमिलितं[१]
विदग्धानां स्वान्तं प्रमदयति लोके सुमनसाम् ।।३८।।

यथा प्रख्यातेभ्य : प्रथमगुरुदेवेभ्य उदितं
विशुद्धं सञ्ज्ञानं सपदि हृदयेनाप मुदिता ।
तथा सङ्गीतेऽपि प्रथितयशसष् ठाकुरगुरोर्
अधीतं निर्दोषं हृदि विनिहितं शास्त्रहृदयम् ।।३९।।

आम्नायाध्ययने यथा निपुणतां प्राप्तुंगुरोरन्तिके
छायेवानुवसन् वटुः पटुतमः सञ्जायतेऽभ्यासतः ।
सङ्गीतेऽपि तथैव सन्निधिवशाज् ज्ञानंप्रभाभासुरं
सम्प्राप्तुं प्रथते श्रयन् गुरुवरं शस्योऽथ शिष्यो भवेत् ।।४०।।
अस्मिन्नेव चिरन्तनक्रमविधौ मेधावि-विद्यार्थिभिः
साकं शास्त्ररहस्यबोधमनिशं सम्बोधयन् यत्नतः ।
आचार्योऽधिकरोति शास्त्रजटिलग्रन्थिश्लथीकारिणीं
रीतिं तत्त्वविदां पुरः प्रकटयँस्तत्त्वं परं दुर्गमम् ।।४१।।

बाल्यादेव सरस्वतीमनुपदं सञ्चिन्तयन्ति हृदा
प्रीताऽऽचार्यपदाम्बुजस्य रजसा स्नान्तीमतिप्रीतये ।
ध्यायन्ति गुरुदेवतां स्वमनसो निःशेषयन्ती रुजं
हेम्नः कान्तिमवाप साऽनलगतादोषानपाकुर्वती।।४२।।

---

१. ''सङ्गीतमथ साहित्यं सरस्वत्याः स्तनद्वयम्। एकमापातमधुरं द्वितीयं लोचनामृतम।।''- प्रसिद्ध उक्ति।

या पित्रोः परिचर्यया सुमनसां सम्मानदानव्रतैर
आचार्यार्चनदीक्षया समुचिताचारैः पवित्राशया
मित्राणामपि निर्व्यलीकविधिना कल्याणमातन्वती
श्रेयांसि प्रथयन्त्युदारहृदया कामं चिरं नन्दिता ।।४३।।

सङ्गीतेऽर्जितकीर्त्तयोऽपि रसिकैः कामंसमभ्यर्चिताः
लोकानां विमले बृहत्परिसरे सर्वत्रसम्भाविताः ।
येऽभिज्ञाः कलकण्ठकण्ठकुहरान्निःष्यन्दमानध्वनिं
कण्ठेनैव जयन्ति कुण्ठिततमास्तेशास्त्रतत्त्वोद्गमे ।।४४।।

साहित्ये सुरवाचि विस्तृततमे नाटयेऽथ सङ्गीतके
सम्प्राप्तप्रतिपत्तिरर्जितयशोराशिर्भृशं श्लाघिता ।
विश्वसस्मिन् विबुधादृता मतिमतां साहित्यसङ्गीतयोः
सामानाधिकरण्यमद्भुततमं प्राप्य प्रशंसार्जिता ।।४५।।

या विद्यार्थिगणेऽग्रगण्यधिषणाशास्त्रान्तरेऽप्यर्हताम्
आसाद्यातितरां सदैव गुरवेसाहाय्यमापादयत् ।
आचार्यैर्भरतैर्विनिर्मिततमे नाट्येऽथ तत्राद्भुते
प्रख्यातेऽभिनवप्रणीतजटिलव्याख्यानके सङ्गता[१] ।।४६।।

यः सङ्गीतकलासु पूजितपदो यो विश्वविद्यालये
सङ्गीताध्ययनाय पाठ्यरचनाऽऽरम्भेण निष्णाततताम् ।
आनेतुं पठतां कुलं क्रमवशाद् ग्रन्थाँस्तथैवोत्तमान्
प्राचार्यो रचयाञ्चकार विविधान् ओङ्कारनाथो गुरुः ।। ४७।।

एतस्मिन्नतिनूतनेऽपि विषयेनाट्यागमाध्यापन-
व्यापारे गुरुकार्यपूर्तिकरणं साह्यंसदाऽऽपादयत्
याऽनेकासु च भारतीषु विधिवत्सद्ग्रन्थसम्पादने
साहाय्यं ददती प्रणम्यगुरवे प्रादान्नवांदक्षिणाम् ।।४८।।

पाठ्यग्रन्थविनिर्मितौ नवनवाध्यायस्य संयोजने,
पौर्वापर्यविनिर्णयेऽथ कृतिनां सन्तोषसम्पादने ।
शश्वत्तत्त्वविचारणे, सुमनसामाह्लादने, कर्मणा
शर्माणि प्रथयन्त्यनर्घमहिमा प्राप्तो यया मेधया ।।४९।।

*१. पाठान्तरः .....नाट्यागमेऽप्यद्वयां*
*प्रख्याताभिनवप्रणीतजटिलव्याख्या-समाख्यातुला।।*

नित्यं दुष्करकर्ममर्म विधिना विज्ञाय विद्यावतां
साहित्येन सुचर्चयाऽनुदिवसं वादेन बोधेन च ।
अक्षुण्णेन पथा चलन्नपि गुरुर्मेधावि- विद्यार्थिभिः
साकं प्राप्यमनुत्तमं पदमनायासेन प्रापन् मुदा ।। ५०।।

सङ्गीतेऽभिनवप्रयोगनिपुणां तीव्रां मनीषां वहन्-
त्यह्नायाधिजगाम तत्त्वविशदं संविद्विलासं धिया।
सेयं प्राप्तवती पदं मतिमतां प्राप्यं पठन्ती गुरो-
श्छात्राणां परितोषपूर्तिकरणे प्राध्यापिकाऽभून्नवा ।। ५१।।

दृप्तं नैव मनो न बुद्धिविभवे कुण्ठा समासादिता,
नैवानर्थपरम्परामुपगतोऽस्त्यर्थागमो जीविते ।
क्लेशावेशवशान्न जातु हृदयं तत्याज निष्कम्पतां
धैर्येणात्मतपस्यया च विकृतिस्तस्थौ क्षणं नायुषि ।। ५२।।

चित्रं काव्यमनादृतं सुकविभिर्भूयोऽपि सम्भावयन्
नानाचित्रमयं व्यधान्नवनवं श्रीरामरूपः कविः[१]।
सा साश्चर्यमवेक्ष्य तद् बहुविधैश्चित्रैर्नवीनक्रमं
काव्यं मुद्राप्य यत्नादवसरमनयत् सत्पुरस्कारमाप्तुम्[२] ।। ५३।।

काश्यां संस्कृतसत्कवेर्भवति नो यावत् स्वमञ्चः स्थिरस्-
तावन्नूतननिर्मितावुदयते नैव प्रवृत्तिः कवेः ।
इत्यालोच्य तया व्यधायि मिलितैर्मित्रैः कवीनां नवा
संस्था सा 'कविभारती'-ति विशदख्यातिं गता भारते ।। ५४।।

सप्राणा कविभारती सहृदयान् निर्मत्सरान् पण्डितान्
नव्यान् भव्यतमान् कवीन्द्रतिलकाँश्चाविश्चकारोत्तमान् ।
संस्थोत्थापनलग्नविज्ञसमितौ साप्यद्वितीयां स्थितिं
बिभ्राणा कविकर्मसु प्रतिदिनं प्रायो बभौ दीपिता ।।५५।।

---

*१. गत शताब्दी के अप्रतिम चित्रकवि पं० रामरूप पाठक अतिवृद्ध एवं निरीह अवस्था में स्वान्तः सुखाय ही अद्भुत चित्रकाव्य लिखा करते थे। जब ''बहन जी'' ने उनकी कुटिया में जा कर उनकी वे रचनाएँ देखीं तब उनकी विद्या से चमत्कृत एव श्रद्धावनत भाव से स्वयं उन छोटे-छोटे कागजों पर लिखी हुई सब रचनाएं लेकर अच्छे कलाकारों द्वारा उन्हें कलात्मक रूप में लिखवाकर 'ब्लॉक' बनवाकर सुव्यवस्थित रूप में सम्पादित, प्रकाशित किया, फिर उस पर राष्ट्रीय पुरस्कार भी पण्डितजी को प्राप्त हुआ।*

*२. पाठान्तरः काव्यं मुद्रणतः परं ननु पुरस्कर्तुं व्यधात् प्रक्रमः।*

श्लाघ्या सा प्रकृतिर्यया शुभतमाचारैर्विचारैः प्रियैः
सर्वेषामपि सन्दधाति मधुरं श्रेयः प्रकर्षं श्रियः।
निर्व्याजव्यवहारतोऽपि मनसि प्रीतिं परेषां सतां
तन्वानाऽनुदिनं बिभर्ति हृदये क्षेमं च योगं तथा।। ५६।।

श्रीचैतन्यमहाप्रभोरनुचरी या भक्तिभावैर्वृता
या लीलाचरितैर्हरेरनुदिनं श्रद्धालुतां बिभ्रती।
सा कर्माण्यखिलानि केशवपदाम्भोजेऽर्पयन्ती मुदा
सुप्रीता व्यदधादनन्यमनसा विष्णोः समाराधनम्।। ५७।।

सा निष्कामधियाऽतिदुर्घटतमं कर्म प्रियं कुर्वती
श्रान्तिं नानुबभूव नापि विपुलायासाद् विरामं दधौ।
शास्त्रीयाणि विशालकायजटिलान्यापूरयन्ती नवैर्-
व्याख्यानैरथ पुस्तकानि विदुषां प्रीत्यै सदैवालिखत्।। ५८।।

शिक्षोत्थापनकौशलेन नितरां देशे विदेशे तथा
प्रज्ञानां परिषत्सु गौरवमयीं प्रापत् सपर्यां पराम्।
अस्मिन्नेव विधावधीतिविषये संस्कारमातन्वती
भेजे पूज्यतमं पदं कुलपतेः खैरागढ़े प्रौढिदम्।। ५९।।

आद्ये प्राचार्यवर्ये विधिवदधिगते पूर्णविश्रान्तिलाभं
या संस्थाया व्यवस्थामधिकतमदिनं यावदङ्गीचकार।
तत्राध्यापननीतिरीतिमनघामापूरयन्ती भृशं
कार्यं सन्धेयमात्रं चिरतरमतुलं व्याकरोत् सावधाना।। ६०।।

साङ्गे सङ्गीतशास्त्रे विहितबहुविधायाससाध्यं दधाना
संस्थानस्य प्रकर्षं सविधि विदधती शासने लब्धकीर्तिः।
नानारूपान् प्रभूतान् निरुपममहिमोत्साहसपूर्णान् प्रबन्धान्
प्रीत्या सम्पादयन्ती जगति धवलितां कीर्त्तिमेषाऽऽससाद।। ६१।।

खैरागढ़े विततनिर्मलकीर्तिविश्व-
-विद्यालयः कलकलाललितानुबन्धः।
सङ्गीतशास्त्रपरिशीलनकेन्द्रबिन्दुः
सिन्धुर्जयत्यनुपमः श्रवणामृतस्य।। ६२।।

तत्राभवत् कुलपतिर्निजकर्मयोग-
-सिद्धेऽर्थशोधवलिता महितार्यवृत्तिः ।
शर्माऽर्हताऽऽदृततमा विदुषी वरेण्यैर्
नीराजिता बुधवरैर्भुवि भासते स्म ।। ६३।।

या भारताद् बहिरुदारतरे विदेशे
सङ्गीतशास्त्ररसिकैरसकृत् समानम् ।
आमन्त्रिता गतवती सहगीतविद्यैः
प्राप्तादरा व्यलसदुच्चतरार्हणाभिः ।। ६४।।

यस्याः सद्मनि साधवः, सुमनसो, विद्यार्थिनो, लेखकाः
भक्ताः, सच्चरिताः, सुचारुरचनाशिल्पे नदीष्णा जनाः ।
अस्तोभं प्रविशन्ति शान्तमतयः सङ्गीतविद्याव्रताः
काव्यलापकथासु विश्रुततमाः सम्भाविता भान्ति ते ।। ६५।।

*उद्याने रमणीयतैकनिलये सारस्वतेयेऽद्भुते*
*काचित् प्रेमलता तदीयगरिमोद्गारार्थमत्रोद्गता ।*
*तस्याः कोमलपल्लवैः परिमलोत्कृष्टैः प्रसूनैर्नवैः*
*सर्वाशाः परिपूरिता मधुकरा वाचालिताश्च द्विजाः ।। ६६।।*

यस्या आत्मनि नाप्रतीतिरभवन्-नो संशयं गाहते
बुद्धिर्न प्रतिभा विमुञ्चति निजच्छायां मनोहारिणीम् ।
सङ्कल्पोऽतितरां दृढत्वमयते, दृष्टिर्न च म्लायति
सर्वत्रोत्सहमान-मानसमलङ्कृत्य प्रभा मेधते ।। ६७।।

या जानाति न दुर्वचांसि वदितुं नो वा वृथा विग्रहं
चित्ते स्वच्छतमेऽनुरक्षति चिरं नैवापकर्त्तुं स्पृहाम् ।
या सर्वानतिथीन् विभावयति सत्कारैरुदारैर्भृशं
या भृत्यानपि दुर्लभोपकरणैरानन्दयत्यन्वहम् ।। ६८।।

या निद्राति कदापि नापसमये, नालस्यवश्यं मनो
गम्भीरार्थविचारणप्रकरणे मुह्यत्यसम्भावितम् ।
नो शैथिल्यमुरीकरोति मनसः प्राप्तोपकारक्षणे
नो कौमार्यमहाव्रताय कुरुते जातु प्रतीपक्रियाम् ।। ६९।।

यस्या मानसमूर्मिलं भवति यद् भक्त्या हरेः पादयोः
सर्वप्राणवतामशेषविपदस्त्रातुं प्रभुः प्रार्थितः ।
दीनानामनुकम्पयाऽर्पितसमीचीनैः क्षमैर्वस्तुभिः
सन्तोषं लभते विपन्नजनताक्लेशान् हरन्ती पुरा ।। ७०।।

विद्याया व्यसने नवीनरचनाऽऽरम्भस्य संरम्भणे
ग्रन्थानां परिपूरणे समुचिताचारव्रतस्यावने ।
शिक्षापल्लवनक्रमे स्थितिगतीं सीमन्तिनीं भूमिकां
प्रेम्णोत्साहयति प्रसन्नमधुरालापैर्गृहस्थोचितैः ।। ७१।।

वीणा पाणितलेऽथ कण्ठकुहरे पीयूषवर्षी ध्वनिः
पार्श्वे पुस्तकराशिरङ्घ्रि-निकटे हंसो द्विजोत्तंसकः ।
श्रोतारो विबुधा वसन्ति सविधे प्रीतिश्च नाट्यागमे
सेयं नूतनभारती विजयते लोकेऽपि लोकोत्तरा ।। ७२।।

सद्वृत्तं सुविभूषणं गुणगणैः पूजास्पदं सत्पदं
निर्दोषं शुभलक्षणं सुमनसामाह्लादनं मादनम् ।
हृद्यं पद्ममिवोत्तमं सुरुचिरं रूपं सुवर्णार्चितं
देवि! त्वं त्वमिवावभासि भुवने सर्वार्हणाऽभ्यर्हितम् ।। ७३।।

सेहे नानवधानतां निजजनस्यापि क्षणं कुत्रचित्
नैव व्यक्तिनियोजने प्रमुखता त्यक्तार्हताया अपि ।
शास्त्रग्रन्थयथार्थसाधनविधौ प्राध्यापने गायने
छात्राणां परितोषणे च महतीं प्रापोन्नतां भूमिकाम् ।। ७४।।

दीपो यद्यपि हन्ति घोरतिमिरं सूते परं कज्जलं
पीयूषं सरधा मधूद्गिरति चेद् दंशैस्तनोति व्यथाम् ।
अज्ञानं पठतां हरन्नपि गुरुः स्वच्छन्दतां वारयत्[१]
येवं कोऽपि न केवलं जनयति प्रायः सुखं शाश्वतम् ।। ७५।।

*सा शीलस्य शिखामणिर्मधुमती योगस्य या भूमिका*
*सिद्धिर्मूर्तिमती तपस्विजनिता प्रीतिः समाधेः स्थिरा ।*
*कीर्तिः संयमशेवधेरनुपमा रीतिः प्रतीतेर्गिरो*
*जीयात् प्रेमलताऽवदातहृदया श्लाघ्या सतां संसृतेः* ।। ७६।।

१. पाठान्तरः त्ये।

सङ्गीते प्रथमानकीर्त्तिलसितैर्वर्गैः सगर्वार्चितैः
प्रख्याता रसिकव्रजे 'बहिन जी'-त्याख्यां दधाना नवाम् ।
अत्यन्तादरभाजनं सुमनसामामोदसंवर्धनम्
कार्यैरर्जितवैभवं विजयते प्राणात्ययान्तं भुवि ।। ७७।।

दाक्षिण्यं गुरुदेवपूजनविधौ निर्व्याजभव्यं मनो
लग्नं विज्ञजने, सुचारुचरिते सेवाव्रतं बिभ्रती ।
विद्यादानमहाव्रते रसवती प्रीतार्थदानोत्सवे
स्पर्धायुक्ततमा प्रसीदतितरां हर्षप्रकर्षार्चिता ।।७८।।

या नैरुज्यमपि स्वकीयवपुषो बुद्धेः श्रमाधिक्यतो
नो संरक्षितुमाचकांक्ष सततं सद्ग्रन्थसम्पूर्त्तये ।
नाल्पीभावमुरीचकार विशदव्यापारतो दैहिकात्
इत्येवं मधुमेहदुर्गदवशाज्जाता भृशं दुर्बला ।। ७९।।

बुद्धिः संशयचण्डमारुतमहावेगेन नान्दोलिता
न भ्रान्त्या विपरीतमर्थनिचयं जग्राह शास्त्रेक्षणे ।
नैवानर्थपरम्परां प्रथयितुं सा कुत्रचिद् दुर्ग्रहं
धार्ष्ट्येनाप्युररीचकार रचनाक्षेत्रे क्षणं जातुचित् ।।८०।।

शृङ्गारो वाग्मितायाः सुरुचिररचनाशिल्पलक्ष्म्या विलासः
प्राणाः कर्मण्यतायाः सकलसुमनसां चन्दनाद्रेः समीरः ।
या हेतुर्ग्रन्थरत्नैः शबलितकिरणैर्भूरिभाषासमृद्धेः
सत्कीर्त्तेर्मन्दहासो जयति निरुपमासंविदः स्फूर्तिमूर्तिः ।।८१।।

या सौशील्यकलानिधिः शुभतमा या शेवधिः संविदां
या भूषा बहुमूल्यरत्नरचिता या श्रीरुदारा गिराम् ।
या कीर्तिर्धवला सतां सुमनसामुत्फुल्लतासाधनं
या प्रीतिः शुचिनीतिरीतिलसिता सा श्रेयसे स्यात् सदा ।।८२।।

मर्यादायाः सपर्या जयति सुविमलप्रीतिनिष्ठाऽर्हताया
अत्यन्तोत्कृष्टभूमिः सकलसुमनसामार्यताया विभूतिः ।
कल्याणी कल्पनायाः प्रतिकृतिरनघा साधुता बन्धुताया
दीनानां कल्पवल्ली विलसतु मुदिता मोदमग्ना समाधौ ।।८३।।

*या नो दर्पमहाज्वरोग्रजनितं तापं विसेहे क्षणं*
*क्रोधावेशवशात् परापकरणे यस्या न लग्नं मनः ।*
*क्षुत्तृष्णातरलेन हन्त मनसा दैन्यव्यथां नान्वभूत्*
*सा काचिद् भुवि देवतेव मुदिता पूर्णं व्यनैषीद् वयः ।।८४।।*

यस्या जीवनपद्धतिर्न विकृतिं लेभे कदाप्यायुषि
नैवात्मीयजनेषु या विषमताबुद्धिं समासादयत्
पूर्णं सद्विनयं बभार हृदये लोकेषु लोकोत्तरं
सर्वत्रैव विशिष्टतां स्वजनुषः प्रास्तौत् सतां प्रीतये ।।८५।।

ध्यायन्ती विषमेक्षणं न विषमां दृष्टिं बभार क्षणं
साऽर्चन्ती च विषादमाप जनने नो वा विषादं हृदि ।
विद्वेषं दधती कदापि न दधौ विद्वेषमेषाऽऽत्मनि
कृष्णं निर्गदमाश्रयन्त्यपि न सा भेजे वपुर्निर्गदम् ।।८६।।

*या लौल्येन विनैव बाल्यमनयत् प्रीतात्मना जीविते*
*तारुण्ये न मनो मनागपि दधे नैसर्गिकीं विक्रियाम् ।*
*प्रौढत्वे निजकार्यभारवहनासक्तया प्रसक्तिं तनोर्*
*नो दध्यौ सुखभोगमीप्सिततमं भक्त्या विरक्तं मनः ।।८७।।*

कीर्तिर्यस्या भ्रमति भुवनाभोगभव्यान्तराले
प्रीतिर्नन्दति सख्यसौख्यसुभगोद्यानोल्लसत्सौरभे ।
रीतिः काचन निर्व्यलीकविधया निर्व्याजशुभ्राशया
लोकेऽलौकिकतामुपेत्य जगति ज्योतिः परं ध्यायति ।।८८।।

ग्रन्थग्रन्थिमतीव तत्परतया या विश्लथं कुर्वती
साहाय्यं व्यदधादभारतमलं शास्त्रार्थनिर्धारणे ।
आचार्यस्य मनस्यधारयदियं शास्त्रानुकूलां स्थितिम्
आत्मानं प्रति सत्प्रतीतिविधया विश्वास एवार्जितः ।।८९।।

*अस्या जीवनसङ्गरेषु विजयः सत्कर्मसन्निष्ठया*
*लोकेऽलौकिकलाभहेतुकमभूदानन्दसंवर्धनम् ।*
*सम्मानोऽत्र बहुश्रुतेषु, ललितं सख्यं पवित्राशये-*
*ष्वौदार्यं शुचिमानसेषु लसितं विद्वत्सु पूर्णादरः ।।९०।।*

यस्या जीवनमुक्तमोत्तमगुणैरश्लिष्टमालोक्यते
शस्या सङ्गतिरत्युदारविबुधैः सन्दृश्यते सूरिभिः ।
अस्या मानवतानुरक्तिरखिलं कालुष्यमक्षालयत्
लब्ध्वा सा गुणसन्मणीन् धनवतामग्रेसरत्वं गता ।।९१।।

या चैषणात्रितयमप्यपसार्य चित्तान्-
निष्कामकर्मविषये रुचिमाबबन्ध ।
योगीन्द्रदुर्लभतमं फलमाप्य कृष्ण-
पादारविन्दमकरन्दकणं सिषेवे ।।९२।।

वैराग्यमेव जगतः पितुराससाद
लोकोपकारकरणे रसमाप मातुः ।
शश्वत् कृतेन तपसा परिशुद्धभावा
लोकोत्तरत्वमभजज्जगति स्थिताऽपि ।।९३।।

स्निग्धं सहोदरमिव प्रथितस्वभावम्
आनन्दकृष्णमनिशं हृदयेन मेने ।[1]
निर्व्याजभव्य-शुचि- सद्व्यवहारजातैर्
अन्योऽन्यमुल्लसति पावनरागवृत्तिः ।।९४।।

वात्स्यायनोल्लसितवंशसुमौक्तिकाभां
विद्यासुकीर्त्तिनिलयां कपिलां स्वसारम् ।
शश्वत् परस्परमुदित्वररागबन्धैर्
भिन्नेऽप्यभिन्नहृदये दृढमन्वभूताम् ।।९५।।

खैरागढात् प्रतिनिवृत्य निवासयोग्यम्
अन्विष्य सद्म सुखदं बत काशिकायाम् ।
अक्रेष्ट भव्यभवनं तु पराधिलक्ष्य-
मूल्याधिकैरपि धनैर्मुदमापदेषा ।।९६।।

आम्नायेति तदीयनामकरणे यस्याः प्रसन्नं मनः
सर्वं चारुतरं सुशैक्षिकमथाकार्षीत् सुकर्मानिशम्।
अस्मिन्नुत्तमसद्मनि व्यवहृतौ विद्याकलाचर्चया
प्रज्ञानां निवहं प्रसादयति सा नित्यं नवैः प्रक्रमैः।।९७।।

---
*१. स्वनामधन्य श्री वासुदेवशरण अग्रवाल जी एवं श्री राय कृष्णदास।*

*छात्रो गुरुप्रतिकृतिर्भवति क्रियासु,*
*विद्यासु, पाठनविधासु, विचारणासु ।*
*अन्वर्थतामुपगता रुचिरोल्लसन्ती*
*शर्मोत्तरा जगति प्रेमलताऽभिधाना ।।९८।।*

*पित्रोस्तपः फलरसामृतदुग्धसिन्धुः*
*सङ्गीतशास्त्रहृदयस्य यशः पताका ।*
*विद्यार्थिनामभिमतावनिकल्पवल्ली*
*सामश्रुतिर्धृततनुर्जयतीह काऽपि ।।९९।।*

सौभाग्यशेवधिरनुत्तरदेशिकानां
सद्ग्रन्थलेखनकलासु सदाग्रगण्या ।
देशे विदेशविबुधे च समानमाना
जागर्ति काऽपि विदुषी विदुषां समाजे ।।१००।।

विद्योत्तमोपचितसत्कविकीर्ति रेखा
लेखैः समर्चिततरैर्यशसाऽर्चिताऽपि ।
विद्यावतां सदसि नृत्यति वैजयन्ती
कण्ठे विराजतितरां मणिमालिका सा ।।१०१।।

'सोमास्कन्द'- महानुभावतिलकं तातोपमं श्रद्धया
या मेनेऽनुदिनं तदीयवचनं शश्वन्निजश्रेयसे ।
सोऽप्यस्यां स्वजनोचितं सुरुचिरं निर्देशनं व्याहरन्
वात्सल्येन तदीयगौरवमयं भावं सदाऽपालयत्[1] ।।१०२।।

धीराणामपि धीरता गलति यद्धैर्यं विलोक्य स्थिरं
गाम्भीर्यं मनसो निरीक्ष्य नितरां वारां निधिर्वेपते ।
त्रस्तानामुपकारकर्मणि सतां विघ्नानशेषान् हरन्
दाक्षिण्यं प्रकटीकरोति करुणाकन्दः सुमन्त्राक्षरैः ।।१०३।।

यः सम्पत्सु विपत्सु तुल्यहृदयो यो धीरवीराग्रणीर्
यो नैवाचरति स्म किञ्चिदपि दुष्कर्माधिकारीच्छया ।
यो नैवान्ननतिमाचकांक्ष महतां चाटूक्तिभिः, सेवया
योग्याद् योग्यतमोऽपि नापकुरुते कस्यापि यो गर्वतः ।।१०४।।

---

*१. पं० श्री सोमस्कन्दन् (का०हि०वि०वि० के पूर्व सहायक रजिस्ट्रार )।*

मन्त्रो यस्य दुरन्तसम्भ्रमसमुद्भ्रान्तो समस्यामये
कार्ये विघ्नभरैर्विकुण्ठिततमे सद्यः प्रसूते फलम् ।
प्रज्ञायाः समुपासनेऽतिनिरतो यो निर्मलज्योतिषा
दूरीकृत्य तमांसि दर्शयति नः कल्याणकृत् प्रक्रियाम् ।।१०५।।

आर्षग्रन्थसहस्त्रबोधविषये यः प्रेरयत्यञ्जसा
यो वर्षत्रितयेन पाणिनिनयं सम्पूर्णमाध्यापयत् ।[1]
तं 'जिज्ञासु'-महर्षिणं बुधवरं विद्वद्भिरत्यादृतं
शिष्या प्रेमलता समादरभरैः सस्मार श्रद्धान्विता ।।१०६।।

यस्याध्यापनकौशलेन विदुषी प्रज्ञा च मेधा तथा
चान्या धन्यतमाऽभवन् वसुमती-क्रोडेस्थिताःकन्यकाः ।
सद्वृत्तेन गुणेन, शीलनिलयेनात्यन्तनम्रात्मना
कर्मण्येन सदार्यसंस्कृतिधनेनासीत् स सर्वादृतः ।।१०७।।

यो वाग्मिता-निटिल-कङ्कुमशोणबिन्दुर् वैदुष्यशेवधिरनर्घ्यगुणाभिरामः ।
विद्या-कला-ललित-कल्पनया समृद्धो विद्यानिवास इति विश्रुतनामधेयः।।१०८।।

योऽनेकभाषाऽध्ययनादुपात्तविज्ञानवैदुष्यविभूष्यकीर्तिः
विद्वज्जनाऽभ्यर्चितवाग्मितायाः अभ्रङ्कषाभ्यर्हितनीतिराशिः।
यं राष्ट्रभाषाऽमरदेवभाषा विश्वस्य भाषा त्रितयीसमृद्धा
त्रिवेणिकेवाश्रयतेऽनुरक्ता तं तीर्थराजस्य बिभर्त्ति लक्ष्मीः।।१०९।।

*सोऽस्यां सदैवानुजयानुरूपां*
*दिव्याशिषं यच्छति सुप्रसादात् ।*
*पूज्याग्रजं तं सततं सुलभ्यं*
*संवन्दते स्म प्रतिवासरं सा*[2] *।।११०।।*

आद्यां पंक्तिमलङ्करोति विदुषां सौजन्यवारां निधिर्
दुर्बोधान् विषयानतीवसरलीकर्त्तुं गृहीतव्रतः ।
वाग्मित्वेऽनुपमः प्रसन्नवदनो गम्भीरतत्त्वस्फुटी-
कारे स्फारयतिर्वचोऽमृतरसं वर्षीञ्चिरं नन्दतु ।।१११।।

---

*१. ब्रह्मर्षि पं० ब्रह्मदत्त जिज्ञासु।*
*२. पद्मविभूषण पं० श्री विद्यानिवास मिश्र।*

नाट्ये कलासु ललितासु च सानुरागो
बद्धस्पृहः सकललोकविशोककार्ये ।
सङ्गीतके परमपावनसंस्कृतौ च
श्रीभानुशङ्करसुधीर्महताऽग्रजोऽस्याः[1] ।।११२।।

यो निःस्पृहोऽपि भागिनीमनुजास्वरूपाम्
एनां सदा परमवत्सलभावपूर्णः ।
प्रोत्साहयत् सकलशिक्षणकर्मसक्तां
भक्तां सतां सुमनसामयमन्वयुङ्क्त ।।११३।।

यस्या आसीदभिमतवरः वासुदेवः सुधीन्द्रः
श्रीमान् स्मार्तो रचयतितरां नाट्यशास्त्रानुरूपम् ।
सज्जीकारे परमकुशलो रङ्गमञ्चं व्यधायि
प्रख्यातोऽसौ भुविनवनवश्चित्रकारोऽद्वितीयः ।।११४।।

श्री चन्द्रशेखर इहोन्नतनृत्यशिल्पे
दक्षः सदा प्रियजयासहितः प्रसन्नः ।
नाट्याभिनेय-बहु साधयितुं समर्थस्
तस्या निरन्तरसहायकरूप आसीत् ।।११५।।

श्रीषड्गोपन् बालकोचितरुचिं प्रोत्साहयन् गीतकैः
शास्त्रीयाद्भुतकौशलेन ललितं कण्ठस्वरैः पूरयन् ।
अस्याः शस्यमनोऽनुकूलरचनाचारुत्वमुद्बोधयन्
धन्यो गायकशेखरश्चिरमिमामुल्लासयन् नन्दति ।।११६।।

अस्याः सन्निकटे वसन्नभिमतं सौविध्यमुद्भावयन्
सङ्गीतेन सदा प्रसादयति यो सद्विद्यया सत्क्रियः ।
साहाय्यं वितरन् नवेन विधिना तस्यै प्रसादोन्मुखो
मेधावी निपुणो विदग्धविनुतोऽस्याऽग्रजः सर्वथा ।।११७।।

---

*१. बहिनजी द्वारा प्रवर्त्तित 'अभिनय -भारती' के १९७३-८४ तक के सभी प्रयोगों (नाट्यशास्त्रानुरूप नृत्य-वाद्य-युक्त-पूर्वरङ्ग-सहित सर्वाङ्ग नाट्याभिनय-प्रस्तुतियों)में तथा अन्य भी जीवन-व्यापी विविध कार्यो में श्री वासुदेव स्मार्त (बड़े भाई जैसे)एवं श्रीमती जया सहित प्रो० सी०वी० चन्द्रशेखर छोटे भाई जैसे सर्वदा सर्वथा सहयोगी रहे।*

पुण्योपाध्यायवंशे समजनि कुशलो वैद्यराजस्तपस्वी[1]
आयुर्वेदे वरेण्यादिह जगति सदा विश्रुताचार्यवर्यात् ।
सम्प्राप्तज्ञानराशिर्विशदमतिमतामग्रणीः शुद्धबुद्धी
रोगार्तानाश्वगाधादुदधिजलतलादेष सूद्धर्तुमीष्टे ।।११८।।

प्राप्य प्रेमलतां पितेव मुदितो वात्सल्यपूर्णात्मना
गीतं श्रावयितुं प्रभोर्गुणगणोद्गीतं मुदैवादिशत् ।
सा च स्नेहवशादुदात्तविधिना भक्त्या स्तुतिं कुर्वती
हर्षाश्रुणि दृशा विमुञ्चतितरां शृण्वन् स गीतध्वनिम् ।।११९।।

अत्यन्तस्थविरः स तामुपगतः प्रीत्योल्लसन्मानसः
हृद्यं चादिशतीव गातुमुचितं सङ्कल्पसिद्धं शिवम् ।
साऽपि प्रेमपरिप्लुता तदुदितामिच्छां शिरस्याभृतां
धृत्वा गायति शुद्धबुद्धहृदया सत्प्रीतये सर्वदा ।।१२०।।

विद्वन्मौलिमणिर्गजानन इति ख्यातो विदामग्रणीर्-
यस्याभूद् विमला प्रिया गुणवतीविद्याकलोद्भासिता ।
तौ जाया च पतिश्च पूजिततमौ यस्याः सदास्तां प्रियौ
सर्वस्मिन् समये हृदा समुचिताचारैरुदारौ स्मृतौ ।।१२१।।

*तथा च 'गँगराडे' संज्ञको वै*
*कैलासचन्द्रो भ्राता वरीयः ।*
*स्वान्तः सुखायैव चिकित्सको यः*
*सङ्गीतविद्यामुररीचकार ।।१२२।।*

अस्याः सन्ति परः सहस्रसुहृदो मान्या वदान्या प्रियाः
विद्यायामनवद्यकर्मणि रताः स्निग्धा बुधा बन्धवः ।
नामग्राहमशेषबान्धवजनस्मृत्या न सच्चर्चया
स्तुत्या चापि न सम्भवेम नमने, नाम्ना विना तान्नुमः ।।१२३।।

यावत्प्रापि फलं यया गुरुपदद्वन्द्वस्य संसेवया
यावच्चिन्तितरत्नमप्यधिगतं प्रायः समाधिस्थया ।
पात्रापात्र-विचारणेन निभृतं सर्वं तदेकान्ततः
प्रीता सा सकलं धनं स्वमनसा स्वस्त्रेऽनुजायै ददौ ।।१२४।।

---

१. पं० श्री यदुनन्दन उपाध्याय 'पीयूषपाणि'-चिकित्सक।

शीलं यस्याः समानं, सदृशतममुदाहार्यमध्यात्मतत्त्वम्
औदार्यं तुल्यमास्था भगवति परमाभक्तिरूपाप्यभिन्ना ।
छाया कर्मण्यतायाः, प्रकृतिरनुकृतिर्भासते चाद्वितीया
सेयं चैकत्वमाप्ता विलसति नितरामूर्मिलाख्या स्वसा ते ।।१२५।।

सौजन्येन, नितान्तदुर्लभतमज्ञानेन, स्वाभाविकौ-
दार्येणाथ तितिक्षया, करुणया, भक्त्या हरेरद्वया ।
प्रह्वीभाव-समादरादिविधिना प्रज्ञावतां मण्डलं
साह्लादं विदधाति मुग्धवचनैः सत्कर्मभिः शर्मभिः ।।१२६।।

*गायत्रीं सुरभिं वृन्दां मञ्जरीं च सुमङ्गलाम् ।*
*पुपोष तनयासदृशं स्नेहार्द्रहृदयेन वै ।।१२७।।*

*अष्टादशवर्षमिता गोसेवाऽनुष्ठिता तया ।*
*गोवंशरक्षणायापि सत्याग्रहः सुसेवितः ।।१२८।।*

*गोसंवर्धनहेतोश्च भृशं दानमदात् सदा ।*
*गोरसो बहुमानेन ह्यर्पितः स्वादितो मुदा ।।१२९।।*

*सद्भावः स्निग्धसम्बन्धो मधुरा वचनावलिः ।*
*निश्छलो व्यवहारश्च सर्वे मैत्रीकरा गुणाः ।।१३०।।*

*सज्जनागमनं गेहे लोकल्याणचिन्तनम् ।*
*विद्या-कला-समुत्कर्ष-चर्चयाऽस्यामहोत्सवः ।।१३१।।*

*विद्यां कलां श्रियं प्रीतिं वितरन्ती निरन्तरम्*
*ध्यायन्ती चाक्षरं तत्त्वं सदा सा मुदिताऽभवत् ।।१३२।।*

*सतां सपर्या व्यसनं व्यसनं शास्त्रचिन्तनम् ।*
*व्यसनं ग्रन्थनिर्माणं व्यसनं भ्रमणं भुवः ।।१३३।।*

*औदार्यमार्जवं शीलं त्रिरत्नं यत्र संस्थितम् ।*
*ज्ञान-विज्ञान-सम्पन्नं तदध्यात्ममुपास्महे ।।१३४।।*

*वैदुष्यमथ सौजन्यं युगपद् यत्र राजते ।*
*तदद्भुततमं धाम ध्यायामस्त्वात्मशुद्धये ।।१३५।।*

*मनसा शिवसङ्कल्पो वचसाऽमृतवर्षणम्*
*वपुषाऽऽर्यक्रियाकल्पो यत्रैकत्र विराजते ।।१३६।।*

*मदोऽसूयाऽथ मात्सर्यमात्मश्लाघा प्रवञ्चनम् ।*
*अवलेपो दृढाक्षेपस्तस्याश्छायां न चास्पृशत् ।।१३७।।*

*परस्परं स्पर्धमाना दुर्लभा सद्गुणावलिः ।*
*यस्यां वसतिमेवाप्तुमाचकांक्ष निरन्तरम् ।।१३८।।*

*यस्याः शश्वदुदाहार्या स्वच्छा जीवनपद्धतिः ।*
*निर्व्याजं चारुचरितं प्रशस्यं वचनामृतम् ।।१३९।।*

कल्याणी प्रकृतिः सदा विलसतु, प्रीणातु कर्मण्यता,
मिथ्याचार-विवर्जने रुचि सदाऽऽहार्या वचो माधुरी ।
आसक्तिः सुकृते, परोपकरणे प्रीतिः, प्रतीतिः स्थिरा
विद्याया ग्रहणे, श्रियो वितरणे तुल्या रतिर्जायताम् ।।१४०।।

*कला- सङ्गीत- भारत्या अङ्के प्रेमलतोद्गता ।*
*दिव्यां कल्पलतां नीचैरवतार्य दिवं गता ।।१४१।।*

*जीवनं मरणं यस्याः स्पृहणीयतमं सताम् ।*
*आद्यमभ्युदयेनाढ्यम् अन्त्यं निःश्रेयसात्मकम् ।।१४२।।*

यस्याश्चरित्रविषयेऽर्जितचारुताया
उच्चस्तरीयमहिमोपचयो विभाति ।
प्रज्ञा च नित्यनवदुर्लभकल्पनायाः
क्रोडे स्थिता सहृदयान् प्रमदीकरोति ।।१४३।।

प्राणेषु सत्सु यदभूदभिरामतायाः
पुण्यास्पदं सकलमङ्गमूलकायम् ।
सम्प्रतस्थितेषु खलु तेषु गृहं वपुश्च
सर्वं क्षणेन विपरीतमिदं बिभर्त्ति ।।१४४।।

यस्मिन् निशीथसमये वसुदेवसूनुः
प्रादुर्बभूव जनदुःखनिवारणाय ।

मध्येनिशं गतवती सहसा शिवत्वम्
आप्तुं कठोरहृदयामयदोषदग्धा ।।१४५।।

एतज्जीवननाटकस्य चरमं दृश्यं यदाऽऽकस्मिकं
सत्यं किन्तु सुदुःसहं भवति यत् संसारमञ्चे स्थितम् ।
आरम्भाङ्कगतं नितान्तघटनाचक्रं प्रपञ्चाञ्चितं
तत्सर्वं प्रसृतं क्षणेन भवति क्षारं श्मशानानले ।।१४६।।

यन्न पुत्रेण सम्भाव्यं न प्रियेण न बन्धुना ।
तत्सर्वमन्तिमं कृत्यं श्रद्धयैवोर्मिला व्यवधात् ।।१४७।।

अहोरात्रं परिश्रान्ता तत्कृतारम्भसम्भवाम्
क्रियां सर्वां करोत्येषा परिपूर्णां यथामति ।।१४८।।

अपूर्णपूरणे यत्नं तत्समारब्धकर्मणाम् ।
देहगेहादिविस्मृत्या करोत्येषाऽनुरागतः ।।१५९।।

तया चिन्तितमप्येषा व्यवधानं विनाऽन्वहम् ।
यथापूर्वं कर्तुकामा विघ्नानामपसारणात् ।।१५०।।

अनुकम्पा हरेर्भूयादकम्पा शक्तिवर्धने ।
भूयादनामया सैषा कार्यसिद्धिश्च शाश्वती ।।१५१।।

प्रेमवल्लयाः जीवितस्य ह्यमृताब्दे समागते ।
तत्स्मृतेः स्थायिता-सिद्ध्यै वाङ्मयी क्रियतेऽर्चना ।।१५२।।

अस्या एवानुरोधेन व्यक्ता काव्यविनिर्मितिः ।
रतिनाथो व्यधादेतद् व्यथायाः कथयोदगतम् ।।१५३।।

कौटिल्यं लयमेतु छद्मविवृतिर्दूरीभवत्वञ्जसा,
मैत्रीं विध्यतु नाप्रतीतिरुदिता, कूटक्रिया नश्यतु ।
वक्रत्वं सहजार्जवेन मिलितं न स्यान् न वा वञ्चना
सौहार्दं शकलीकरोतु, न मिथो विश्वासघातो भवेत् ।।१५४।।

## तृतीयं सोपानम्
## प्रशस्तयः

# ९९.कालिदासः

सुललितपदबन्धारम्भसंरम्भभव्ये
गुणवति रसभावालङ्क्रियाकान्तकाये ।
सहृदयहृदयालिप्रीतिसन्धानकाव्ये
कविकुलगुरुरेको भासते कालिदासः ।।१।।

श्रीकालिदासकृतकाव्यसुधापगायां
स्नात्वा तदीयसुयशोंऽशुकमादधाना ।
धन्या नगेन्द्रतनयापतिसन्निधानाद्
अद्यापि विश्वजयमुज्जयिनी करोति ।।२।।

यस्य प्रशस्यपदसञ्चरणेन सूक्ति
देवीव सूल्लसति मालवदेशलक्ष्मीः ।
सा विक्रमार्कनृपतेरधिराज्यशोभा-
सौभाग्यभूमिरिह नन्दति वन्दितश्रीः ।।३।।

एकोऽपि शून्यनिलयोऽपि कविश्चकास्ति
सन्ध्याङ्गनाश्रवणकुण्डललग्नहीरः ।
भायान्न किं कविकुलस्य गुरुर्गरीयान्
भ्राजद्यशोंऽशुनिवहैरवतंसितो यः ।।४।।

विद्योत्तमाकृतपराभव एव यस्य
विद्योत्तमाधिगमहेतुरभूदपूर्वः ।
विद्यापतिप्रभृतिसत्कविवन्दनीयो
दासोऽप्यजायत यतो भुवि कालिकायाः ।।५।।

रत्नाकरादमितभास्वररत्नजाते
जातेऽपि कौस्तुभमणिर्जगदर्चनीयः ।
लक्ष्मीपतेरपि विशालमुरो मुरारे-
र्यं संबिभर्ति निजगौरववृद्धिहेतुम् ।।६।।

उत्कण्ठयन् रसिकसंस्कृतचित्तवृत्तिं
यस्याःपदध्वनिरमन्दमुदध्वनीनः ।
भ्राम्यन् समस्तभुवि विभ्रममातनोति
सा राजतीह कविता कविदेशिकस्य ।।७।।

यः सङ्गरे शककुलं नितरामजेयं
जित्वाशु पुण्यधरणीं रमणीं बुभोज ।
तस्य प्रशस्तनृपतेरभिरूपसंसत्-
सभ्यानतोषयदनुत्तमरूपकेण ।।८।।

यः कोमलामपि विलासवतीमपि द्राग्,
वृत्तिं हृदोऽनलशिखामिवसंस्करोति ।
रामानुरक्तमपि चित्तमतीव यूनां
शौर्ये शकारिमवलम्ब्य न दीपितं किम्? ।।९।।

प्रेमानुबन्धनविधिं विधिवद्विधिज्ञान्
उद्बोधयन् ललितसत्कविताविलासैः ।
धन्यं द्वितीयममलाश्रममुन्निनीषुः
कस्त्वादृशो धुरी दृशो भुवनेऽभ्युपैति? ।।१०।।

निर्दूषणंभुवनभूषणमुज्ज्वलाङ्गं
सामाजिकं परिसरं गृहिणां विधातुम् ।
काव्यानि कोमलतमानि मनोहराणि
नाट्यानि च व्यरचयन्मधुराणि कोऽन्यः ।।११।।

एकस्य चारुचरितस्य न पूर्णचित्रं
नेत्रामृतं कलयते कविचक्रवर्ती ।
लोकोत्तरस्य रघुवंशमणिव्रजस्य
किन्तु त्वयैव रचिता बहुमूल्यमाला ।।१२।।

त्वं तारकादतितरांविगलत्प्रतापं
त्रासाकुलं सुरकुलंपुलकीकृताङ्गम् ।
संरक्षितुंकृतशिवाशिवसन्निकर्षं
हर्षं कुमारवरसम्भवजंचकर्थ ।।१३।।

अन्योऽन्यमानसविशोषणविप्रलम्भ-
वैश्वानरोज्ज्वलशिखाप्रशमाय शश्वत् ।
को मेघमेव परिकल्प्य मनोज्ञदूतं
पूतं करोति नितरां प्रणयस्य मार्गम् ।।१४।।

लेखाङ्गनाविजयिनीमवनीन्दुलेखा-
मालिख्य शिल्पिवर मालविकामतुल्याम् ।
कुल्यामिवामृतमयीं रसिकान्तरङ्ग-
क्षेत्रोत्सवाय विदधेभृशमुत्तरङ्गाम् ।।१५।।

जाग्रन्निलिम्पकुलबाहुबलेऽपि रक्षो-
राजेन शक्रदयितापहृतोर्वशी या ।
तां मोचयन् प्रबलविक्रमविभ्रमेण
श्रीविक्रमो दिवि धरामधरां न चक्रे ।।१६।।

शाकुन्तलेयमतुलंसदपत्यमाप्तुं
श्रद्धां विधिं घटयितुंकृतसुप्रयत्नः ।
कस्त्वादृशोभुवनमञ्जुलमङ्गलाना-
मुन्मीलनाय ललितां कवितां ससर्ज ।।१७।।

उन्मादिनीमृतुमतीं प्रकृतिं मनोज्ञा-
मालोक्य कः कुतुकवान् दयितासनाथः ।
धन्यं मनोनयनबन्धनकारि दृश्य-
मुद्यानवीथिषु चरन् भृशमानन ।।१८।।

प्रेमामृतस्नपननिर्मलजानरूप-
कान्तिच्छटाच्छुरितसत्कविताधिलक्ष्म्याः ।
सद्यः कृतोऽधिकृतभालतलाधिवासः
सौभाग्यविन्दुरिव राजति कस्त्वदन्यः ।।१९।।

×××

जयति जगति दीव्यद्देवतादत्तसिद्धि-
र्मधुरमधुसमृद्धं या फलं संप्रसूते ।
परमनुपमकाव्यानन्दनिः ष्यन्दपूरं
वितरति रसनीयं देवि! ते कालिदासः ।।२०।।

ललितपदकम्बैर्भावसम्भारभव्यै-
रुचितरुचिर - कल्पैश्चित्तनिर्यासससारैः ।
विलसित-कविताया वस्तुविन्यासलक्ष्मीं
जनयति रसिकानां प्रीतये कस्त्वदन्यः ।।२१।।

मातर्वाणि! तव प्रसादमहिमोत्कर्षच्छटामुद्गता-
मालोक्य प्रियकालिदाससुकवौ मुग्धा विदग्धा यतः ।
दासान्तः कविपुंगवः प्रभवतीत्यालोच्य कश्चित्कृती
विख्यातोऽत्र कुमारदास-तुलसीदासादिनाम्ना ततः ।।२२।।

सौन्दर्यं सुकृतान्वितं मुखरिता शास्त्रीयतत्त्वप्रथा
कल्याणी-मतिरुद्गता समुदिता चारित्र्यशिक्षोत्तमा ।
अन्योऽन्यप्रणयः स्फुटं परिणतः सञ्चारिणी चारुता
सर्वं त्वत्कविताप्रशस्तमुकुरे सुस्पष्टमालोक्यते ।।२३।।

औचित्यधाम्नि सुषमाञ्चितमन्दिराणि
निर्माय नूतन - मनोरमशिल्पकल्पैः ।
उत्कण्ठितां प्रणयिनीमिव सूक्तिदेवी-
मुल्लासयन् जयति केलिषु कालिदासः ।।२५।।

सत्प्रेमहेम-तपसि ज्वलने प्रताप्य
स्फूर्जत्प्रभं विगतकल्मषमाशु कृत्वा ।
सम्यङ्निधाय हृदये रमणीयभूषां
श्रीकालिदासकविता ललिता विभाति ।।२६।।

स्थाणुं श्रितापि सुमनोभिरुपासनीया
रूपातिगाप्यनुरता सतताभिरूपैः ।
वन्यापि रञ्जयति नागरिकीमवन्या
रीतिं कवीन्द्रकविता ललितातिधन्या ।।२७।।

वन्दे कवीन्द्रहृदये सरसि प्रजाता-
मम्भोजिनीं सुकवितां मकरन्दपूर्णाम् ।
अद्यापि यां मधुमतीं मधुपावलीनां
वृन्दं परिभ्रमति चुम्बितुमीहमानम् ।।२८।।

आयाति याति च चिरेण दिवा च रात्रि-
र्ग्लानिं तथापि न मनागपि यान्युपैति ।
सा कालिदास-कवितानलिनी- मरन्द-
सौरभ्यशेवधिरुपास्यतमा बुधालेः ।।२९।।

काव्यानि सन्ति कति भव्यतमानि नेह-
स्निह्यन्ति किन्तु रसिकाः क्वचिदेव कामम् ।
फुल्लेष्वनेककुसुमेष्वपि चञ्चरीको
विन्दत्यमन्दमुदितामरविन्द एव ।।३०।।

×××

जयति कवितायाः विलासः ।
सुप्तमन्मथ जागरणरतामञ्जुलरस्वनलयविकासः।।ज.।।
वरविपञ्चीपञ्चमस्वर-
संस्तुताखिलकाव्यनादः ।
सकलजगदामोददायि
रसालपिकनन्दितनिनादः ।।
मधुपयः कादम्बिनीमन्दस्मितोज्ज्वलकालिदासः।।ज.।।३१।।
ललिततमकविभारती
सौभाग्यबिन्दुरिवाभिरामः ।
रम्यतानीराजनैः
सम्पादितस्तमोविरामः ।।
स्वर्गभूपरिणयपुरोहितमन्त्रतनुरिव कालिदासः।।ज.।।३२।।

भरतभुविनिर्वाणरागा-
कुलगृहस्थितिभङ्गलीलाम् ।

सपदिदूरीकर्तुमिव
सूक्तिं जगौ शृङ्गारशीलाम् ।।
दुर्व्यवस्थित सद्म पद्मालयविधायककालिदासः।।ज.।।३३।।

युवजनाकाङ्क्षासमृद्धि-
विवर्धनप्रणयैकवित्तः ।
सर्वथानौचित्यचर्चो-
न्मूलनव्रतपूतचित्तः ।।
आर्यमर्यादाप्रतिष्ठापककवीश्वरकालिदासः।।ज.।।३४।।

प्रेमवीथिषु येन नानुमतो-
ऽभिमानपदप्रवेशः ।
न स्वधर्मविरुद्धसङ्घटना-
विधौ मनसो निवेशः ।।
योगभोगसमन्वयप्रणिधिर्नवः स च कालिदासः।।ज.।।३५।।

भारतीप्रमदोपवनवर-
दीर्घिकास्फुटकञ्जहासः ।
केलिरववाचः स्फुरन्
मञ्जीररञ्जितमञ्जुलासः ।।
हर्षवर्षिधनस्य संविद्विद्युता सह मदिररासः।।ज.।।३६।।

स्थाणुरपि मदनान्तको-
ऽपि कृतः प्रियायाः क्रीतदासः।
रामगिरिमानीययक्षस्या-
पनीततरः प्रवासः ।।
प्रेषितो दयितान्तिके मेघोऽपि दूत इति प्रयासः।।ज.।।३७।।

×××

स्वर्गाङ्गनागणशिरोमणिमेनकाया विश्वाभिनन्द्य सुषमां परिगृह्य दिव्याम् ।
राजर्षिपावनमनश्च शकुन्तलायां संयोजयन् जगति भारतभाग्यमूलम् ।।३८।।

वागीश्वरीललितकेलिवनान्तराले शृंगारनिर्मलजलां सरसीं सुरम्याम् ।
माद्यद्रस प्रियमधुव्रतगीतवन्द्यां निर्माय कः सुकवितां स्नपयेत्त्वदन्यः ।।३९।।

पुष्पाणि सन्तु मधुसौरभकौषभाञ्जि नेत्रप्रमोदजननानि सुकोमलानि ।
किन्तु प्रसिद्धरसिकस्य मधुव्रतस्य विश्रामधाम जयति स्फुटमेव कञ्जम् ।।४०।।

दृष्ट्वाविलासरसपेशलजीवितेषु शक्रेषु सक्तहृदयैव सदोर्वशी या ।
सापि त्वया सुकविसद्गुरुणाव्यलोकि स्निग्धा धराधिपतिविक्रमविक्रमेषु ।।४१।।

कर्तव्यमारणपरायणपञ्चबाण-बाणाहतं स्वभुवनादपसारितं यम् ।
संस्थाप्यरामगिरिपुण्यतमाश्रमे यो यक्षं पवित्रमचिरं रचयाञ्चकार ।।४२।।

वाचो विपञ्चयाः किमु पञ्चमाख्यः स्वनः समन्तादमृतायमानः
किं वा पिकानां मधुनन्दितानां कण्ठस्वरो राजति कालिदासः ।
शृङ्गारवल्ली कुसुमासवानां माधुर्यनिःष्यन्द इवाभिरामः
औचित्यलक्ष्म्या ललितो विलासो हासो गिरो राजति कालिदासः ।।४३।।

रसायनं यक्षमनोव्यथायाः शकुन्तलायाः प्रणयालवालम् ।
शिप्रातरङ्गोन्नमनेऽनिलस्य लीलाविलासः कविकालिदासः ।।४४।।

यं प्राप्य धन्या कविताऽधुनापि यं प्राप्य नम्याःकवयोऽधुनापि ।
स्वर्लोकभूलोकगुणावलीनां स सारभूतः कविकालिदासः ।।४५।।

×××

समृद्धे सत्काव्यै- रभिनवपदार्थैरुपचिते
नवीनैर्विज्ञानैद१२६
रधिकृत - महायन्त्रनिवहे ।
विशाले भूभागे ललितपदविन्यासविधिना
कवीन्द्र! त्वद्वाणी रसिकजनचेतांसि हरते ।।४६।।

गवां सेवामेवासुलभफललाभाय नृपते-
र्दिलीपस्यादिक्षत् क्षपयितुमरं विघ्ननिवहम् ।
परीक्षोत्तीर्णेऽस्मिन्ननुपमसुतप्राप्तिविधया
समृद्धिं व्याचक्रे सपदि तपसः कामपि पराम् ।।४७।।

तपोऽग्नो दम्पत्योः प्रणयकनकं यावदसकृ-
न्न तप्तं, नो तावत्तनयमसमं कोऽपि लभते ।
इतीव व्याख्यातुं, रघुमलघुचित्तं, गुहमपि
प्रधानं सेनान्यं, भरतमपि दौष्यन्तिमसृजः ।।४८।।

प्रमत्तः कर्त्तव्यात् प्रसभमभिशप्तो दयितया
युवा यक्षो दूरं गमित इव यक्षाधिपतिना ।
कृतावज्ञोऽज्ञानादपवदति कन्यामपि मुनि-
र्मनोविज्ञानेषु प्रसरति मनस्ते कविमणेः! ।।४९।।

द्रवं मृद्वीकाया निरुपममरन्दं सुमनसां
विलासिन्याधन्याधरममृतनिःष्यन्दजयिनम् ।
पिकानामुन्मादप्रजननसमर्थं च वचनं
विधत्ते सातङ्कं सुकविकवितायाःपदमपि ।।५०।।

यूनोर्दृढप्रणयनिर्भरकाव्यलक्ष्म्या
युक्तोपमा निरुपमां सुषमां तनोति ।
किं शब्दरत्नललितापि मनोरमा वः
स्प्रष्टुं क्षमेत कवितामवदातवर्णाम् ।।५१।।

एकोपमाऽप्यनुपमा कविताङ्गनाया-
श्चूडामणि-र्भवति भाग्यसमृद्धिहेतुः ।
अन्यैः कवीन्द्रतिलकैस्समुपाहृतानि
किं भूषणान्यभिभवन्ति तदीयलक्ष्मीम्? ।।५२।।

एकावलीव तरुणीस्तनयोः समृद्धि-
मेकोपमैव कवितामभिरामरूपाम् ।
सम्पाद्य काव्यरसिकान् परितर्पयन्ती
तेषां मनोऽधिकुरुते न शुभैर्विलासैः? ।।५३।।

वचोऽधिदेव्या ललितो विलासो
वसुन्धराया महिमावभासः ।
कवीन्द्रतायाः सुकुमारहासो
जयत्यपूर्वः कविकालिदासः ।।५४।।

ये मेनिरे नहि परोक्षतया सुराणां
सत्तामपि प्रसभमेव च तान्नियन्तुम् ।
प्रत्यक्षसिद्धवपुषोऽर्थपुषोऽष्टमूर्त्ते-
रभ्यर्चनं त्वमवदः सकलेक्षिताय ।।५५।।

# १००. तुलसीदासः

।। जयति तुलसीदाससुकविः।।

सुखस्यन्दी मन्दीकृतकलिपरीतापतपनः
सपर्यापर्यायः प्रकृतजनवाचोऽतिरुचिरः ।
परिस्पन्दो रामेत्यमलकमलासुप्तनियतेः
कवित्वश्रीकोषो जयति तुलसीदाससुकविः ।।१।।

स्फुरद्रामप्रेमामृतसरसि संस्नप्य कवितां
गुणैः श्लाघ्यां शाटीमपि सुपरिधाप्य प्रमुदिताम् ।
सुवर्णालङ्कारैर्ग्रथितनवरत्नार्थललितै-
रलङ्कृत्य प्रीतामुपहरति लक्ष्मीमिव कविः।।२।।

निधानं सिद्धीनां परममवधानं सुकृतिनां
समाधानं शश्वज्जगति विविधोद्भ्रान्तसुधियाम् ।
प्रधानं व्यासानां हरिचरितचर्चाव्यसनिनां
कवीनां सर्वस्वं तव सकलकाव्यं विजयते ।।३।।

समुद्भूते तीव्रे तमसि, लयमाप्ते ग्रहगणे,
हते नेत्रालोके, शिथिल- शिथिले पादयुगले ।
त्वमेवैकं ज्योतिर्विततमवसादं शमयितुं
महत्यार्यावर्ते समुदयमगा दातुममृतम् ।।४।।

पवित्रं चारित्र्यं मनुजजनुषस्तत्त्वमतुलं
मिथः- क्लेशावेशप्रशमनपटुः सद्व्यवहृतिः ।
सुबुद्धिः सम्पत्तेः कुमतिरथ मूलं च विपदः
प्रभोर्भक्तिः शूलं हरति चिरमेतत् तव मतम् ।।५।।

सुरम्यैः श्रीरामेत्यमृतमधुसौरभ्यनिवहैर्
मिलद्विद्वद्भृङ्गैः सरसिजकुलैः संश्रितचरम् ।
मरालत्वं प्राप्तैर्रघुपतियशोभिर्धवलितं
रसानामागारं जयति भवतो मानसमिदम् ।।६।।

विपाकं पापानां सपदि शमयन्ती सुकृतिनां
सृजन्ती सौभाग्यं हरिचरणसेवारसजुषाम् ।
दिशन्ती सन्देशं प्रतिदिशमशेषं श्रुतिगिरां
प्रकृत्या कल्याणी जयति तव वाणी कविपतेः ।।७।।

चतुष्पादीमादीनवकणविमुक्तामनुपमां
गुणालङ्काराढ्यामुचितरसभावाक्षरयुताम् ।
पठन्तो गायन्तो वचनपटवो यस्य सुकवेर्
घनानन्दं नित्यं दिशि दिशि दिशन्तीह सुधियः ।।८।।

समुद्भूतिं भूतेरुदयकमलाया विलसितं
सुशीलेन्दोर्लक्ष्म्या निरतिशयसम्भूतिमनपाम् ।
विपत्तीनां सद्यः परमपरिभूतिं कृतधियां
प्रसूते श्रेयांसि प्रसभमिह ते काव्यकलना ।।९।।

महापङ्कातङ्के प्रसरति, खले हन्त! मशके
कृते दंशे शीतज्वरजनितसन्तापविवृते ।
अतिक्षीणान् क्लेशाधिकविकलितप्राणिनिकरा-
नरुग्णानाधातुं जगति जयमाप्नोति तुलसी ।।१०।।

पुराणानां सारैः प्रथमकविकाव्यामृतझरैः
परीवाहैर्दिव्यागमनिगमशैलाञ्चलरसैः ।
मरन्दैर्मञ्जर्या मधुमुदितमाकन्दसुतरोः
सुपूरैरापूर्णं जयति तुलसीमानसमिदम् ।।११।।

प्रवृद्धे दुर्वैरे हरिहरसपर्यारतहृदां
दुरुक्तैरश्रव्यैः परपरिभवापादनविषैः ।
मिथः सख्यं देवद्वितयमवलम्ब्य प्रबलयं-
श्चिरायातं द्वेषं शमयसि शिवाय त्रिजगताम् ।।१२।।

स्वधर्मे संप्रीतिं, हरिभजनरीतिं, सुचरिते
रतिं, ज्ञानालोके, मतिमनुपमां, कर्मणि गतिम्।
प्रतीतिं सच्छास्त्रे, विरतिमपकर्मव्यतिकराद्,
गुरौ भक्तिं, शक्तिं त्वमिव हृदये त्वं प्रकुरुषे ।।१३।।

रतो रत्नावल्यां निशि नभसि सन्तीर्य सरितं
समालम्ब्य व्यालं श्वशुरभवनस्याप्य शिखरम् ।
प्रियां प्राप्तः प्रीतो रहसि परिभूतो दयितया
चिरं रेमे रामे परिणतविरामेऽथ विपदाम् ।।१४।।

वशे कर्त्तुं रामं स्मरहरपदाम्भोजमधुपो
हनूमद्देवाङ्घ्रेः शरणमवलम्ब्य प्रणयवान् ।
कृपापात्रं भूत्वा पवनतनयस्य प्रभवतः
स्ववाञ्छावल्लीनां सुरतरुमिव प्राप सुतपाः ।।१५।।

श्रुतीनां निर्यासो विशदरसकोषः कविगिरा-
मलङ्कारो वाचामवधजनताया निरुपमः ।
प्रभोर्भक्तेर्नियन्मधुरमकरन्दो मधुलिहां
रुचामादर्शस्ते जयति भुवने रामचरितम् ।।१६।।

विपत्सिन्धौ मज्जज्जनमचिरमुद्धर्तु-मनसा
त्वया रामानन्दप्रवरतमशिष्येण सुधिया ।
श्रुतिस्मृत्योः सारो, दुरितगिरिनाशार्थमशनिर्
विदां वन्द्यो रामेत्यशुभहरमन्त्रो निगदितः ।।१७।।

सदोपास्यं हंसैर्मुखरितमुदारैर्मधुकरैः
सुवर्णाब्जैः पूर्णं प्रियतमसुगन्धैः सुरभितम् ।
मरन्दैः सम्मिश्रं मधुमधुरतोयैर्विलसितं
सतां पूजास्थानं जयति सुकवेर्मानसमिदम् ।।१८।।

रसैः स्निग्धं मुग्धं विविधपरिसंवादवचनै-
र्द्विजैर्वन्द्यं वृन्दारकमहिमगीतैरुपचितम् ।
क्रियाभिः, सद्बोधैर्हरिभजनभावैश्च ललितं
प्रसन्नं निष्पङ्कं लसति भुवने मानसमिदम् ।।१९।।

प्रसक्ते सौभाग्ये सुकृतधनसिक्तेऽमृतझरै-
र्मनःक्षेत्रे कृष्टे हरिचरणभक्तेः सुलतिकाम् ।
समारोप्य प्रीत्या मधुररसधाराभिरभितः
प्रसूनैः सामोदैर्मदयति विदो मसनसहली ।।२०।।

पराभूतानार्यान् विपथमनुसर्तुं परवशान्
अशान्तान् संत्रस्तानपहृतधनागारदयितान् ।
तमःस्तोमच्छन्नान् विनतवदनान् ह्रीपरिगतान्
समुद्धर्त्तुं सद्यस्त्वमुदयमवाप्तो दिनमणिः ।।२१।।

वचोदेव्या भव्योपवनगतपुष्पाण्यनुपमा-
न्युपादाय प्रेम्णा स्रजमसदृशीमेष विदधे ।
स्वकण्ठे यां कृत्वा जगति सकलां सिद्धिमुदितां
लभन्ते विद्वांसोऽसुलभमहिमानं सुकृतिनः ।।२२।।

पुराणानां तत्त्वं, प्रथितकविवाचां परिणतिं
विचारं शास्त्राणां, सम-रसमुदारं श्रुतिगिराम् ।
स्वबुद्धौ सन्धाय प्रकृतजनवाण्या विशदयं-
स्त्वमेवैकोऽद्यत्वे भरतभुवि जागर्षि सुकविः।।२३।।

कुतश्चित् सूत्राणि स्फुरदमलसूचीमितरतः
परोद्यानात्पुष्पाण्यपि समवचित्यातिकुशलः ।
कृती मालाकारो रुचिररचनाकल्पमसृणै-
रनल्पैः शिल्पैः किं घटयति न मालामनुपमाम्? ।।२४।।

तपस्यायाः सारैरपगतविकारैरसुमतां
कृपायाः पीयूषैः सरसि परिपूर्णे भगवतः ।
सरोजं सौरभ्यप्रभवमतिभव्यामृतभरं
प्रियायाः सुक्रोडे विकसितमभूत् कोसलपतेः।।२५।।

तपोवल्ल्याः पुष्पं सुरभितदिगन्तं, वसुमती-
सुपूरं सिन्दूरं, जननयनदिव्याञ्जनकलाम् ।
अहल्यायाः शल्योद्धरणमवलम्बं सुमनसां
शवर्याः सौभाग्यं नमत विपुलं धीवरधनम् ।।२६।।

अपूर्वं भ्रातृत्वं, जगति जनकत्वं निरुपमं
जनन्या धन्यं हृन्मधुमधुरवात्सल्यललितम् ।
गुरोः शान्तं स्वान्तं परमकरुणागारममलं
प्रियायाः सत्प्रेमोच्छ्वसिति भवतः काव्यनिलये ।।२७।।

प्रजानामायुष्यं त्रिविधपरितापैर्विरहितं
स्थितिर्धर्मे वर्णाश्रमविहितकर्मण्यनुरतिः ।
न दैन्यं न द्वेषो न च दुरितलेशोऽपि हृदये
न मात्स्यन्यायोऽभूद् रघुपतिपदे शासति भुवम् ।।२८।।

पराभूते पूते यवननृपदूतैः प्रतिभटै-
र्जनस्वान्ते दान्ते बलमतुलमाधातुमचिरात् ।
गृहीत्वा कोदण्डं शरनिकरसन्धानसहितं
जितारिं श्रीरामं गृहगृहमनैषीः शुभधिया ।।२९।।

×××

## वन्द्यः सदा जगति मानसराजहंसः

सन्त्येव यद्यपि जगत्यमृतं किरन्तः
सन्तो द्विजा बहुविधा विबुधाभिनन्द्याः।
एकः परं जयति कोऽपि लसद्विवेके-
ष्वाप्ताभिषेक इव मानसराजहंसः।।१।।

यो जीवने विजयमात्मबलप्रयोगा-
दानन्दमन्वभवदन्वहमेधमानम् ।
श्री-भारतीललितकेलिकलाभिरामौ
रम्यालय स लभतेस्म जगत्सपर्याम्।।२।।

सायन्तने प्रतिदिनं रघुवंशकेतोः
पुण्यां कथां जितसुधां कथयन् स्वगेहे।
यो मानसस्य विमलां विजयाभिधानां
व्याख्यां नवामकृत दुष्कृतनाशहेतोः।।३।।

शश्वच्चमत्कृतिरसेऽनुरतोऽपि नव्य-
व्यासान्नवानसृजदेष विशेषबोधान्।
पुण्यानि रामचरितानि निवेदयन्तो
ये दुर्जनानपि कथास्वनुरञ्जयन्ति।।५।।

यस्यैकविन्दुरपि रामकथासुधाया
विस्मारयत्यनुपदं मधुदुग्धसिन्धुम्।
किं गोस्तनीषु सुलभासु रसप्लुतासु
चिञ्चाफलाय रसिकः कुरुतेऽभिलाषम्?।।६।।

दुग्धाम्बुनोरिव पृथक्करणक्रियायां
दाक्ष्यं चिरात् सदसतोर्य उरीकरोति।
लोकोत्तरः स्थिरमतिः स विवेकशीलो
वन्द्यः सदा जगति मानसराजहंसः।।७।।

उद्दण्डताप्रशमनाय स दण्डपाणिः
सत्पूरुषव्यसनसंहरणाय शम्भुः।
सर्वान्धकारदलनाय सहस्ररश्मि-
रेकोऽप्यनेक इव देवमयो बभासे।।८।।

यो निर्भयोऽपि सभयो दुरितान्नितान्तं
शीतोऽपि दुष्टदलने ज्वलदग्निकल्पः।
मित्रोदय प्रकरणेऽरुण एव साक्षाद्
रात्रिन्दिवं समविभो द्विजराजएव ।।९।।

दोषान्तकोऽपि, दिवसेऽपि लसत्प्रसादो-
ऽप्याह्लादिताखिलवियोगिजनोऽप्यजस्रम्।
उग्रादपेतभय एव च सैंहिकेयान्
निर्लाञ्छनो विजयते द्विजराज एषः।।१०।।

ओजस्विनी सुमधुरा विलसत्प्रसादा
रम्या विमुक्तखरदूषणदुष्प्रभावा।
भव्या कृतिस्तव शुभा प्रकृतिश्च पुण्या
रामायणी हरिकथेव पुनाति विश्वम्।।११।।

गम्भीरमानसविमन्थनमन्दराद्रे-
र्यत्नादनन्तमुदपद्यत रत्नजातम्।
कण्ठे निधाय यदनर्घमणिप्रसूतां
मालां विभान्ति रघुनाथकथास्वभिज्ञाः।।१२।।

निर्दूषणा गुणवती रसभावपूर्णा
सद्रीतिरुज्ज्वलतमा प्रथितानुभावा।
दृष्टान्तदीपकमयी प्रकृतिः सुवर्णा-
पुण्या कृतिश्च तव सत्कवितेव भाति।।१३।।

यो विद्यया च वपुषा च यशसा श्रिया च
शीलेन, साधुचरितेन, महौजसा च।
दुर्ज्ञेयमानसवशीकरणेन, राम-
लीलाविलासकलयाऽमलया रराज।।१४।।

आस्यं सदास्य मधुरस्मितमञ्जुलक्ष्म्या,
रुद्राक्षमाल्यकलया कलकम्बुकण्ठः।
यष्ट्या करो, धवलभालतलं विभूत्या,
सूक्त्यानन्नं, करुणया हृदयं च रेजे।।१५।।

आघ्राय यस्य सुरभिं सुमनोऽन्तरस्य
सान्निध्यमिच्छति न जातु विदग्धभृङ्ग।
आमोदयन् दश दिशः स जगत्प्रदीप-
बन्धुर्जयत्यनुपमो मधुगन्धकोषः।।१६।।

सामीप्यमाप्तवति कण्टकिनि द्रुमेऽपि
सङ्क्रामयत्यमितसौरभमात्मनो यः।
धन्यः स चन्दनतरुर्जननस्थलस्य-
सौभाग्यवर्धनपरः परमोपकारी।।१७।।

सन्मित्रं प्रतिवेशिनां सुमनसामामोदसंवर्धनः
सन्नद्धः प्रहरी सतां द्विजकुलस्योल्लासदीक्षागुरुः।
व्यासानामनुशासिता रघुपतेर्लीलायशोगायको
योगक्षेमनिधिः सुधीन्द्रविजयानन्दो ननन्दानिशम्।।१८।।

हीनं पुण्यगुणेन दीनमधिकं स्वल्पेन मूल्येन यत्
सर्वोपेक्षितमप्यतीव मलिनं रूपं दधद् दुर्भगम्।
तच्चायोऽपि करोति काञ्चनमनायासेन यः स्पर्शतो
वन्द्यः स्पर्शमणिः स एव नृपतेर्मूर्ध्नापि सम्भावितः।।१९।।

देवेन्द्रेण करौ प्रसारितवता मान्ये वदान्यव्रजे
कर्णं कोऽपि कृतः सुकीर्तिधवलस्त्वेक पुरा द्वापरे।
युष्माभिस्तु कलावपि प्रतिदिनं श्रेयांसि संपश्यतां
श्रीमद्रामकथासुधाभिरमिताः कर्णाः कृतार्थीकृताः।।२०।।

शिष्यास्तस्य परश्शता रघुपतेर्लोकादृतां सत्कथां
श्रोतृणां शुभसम्पदं कलयितुं व्याचक्षते प्रत्यहम्।
वाचस्पत्यमुपैति कोऽप्यसुलभं श्रीनाथतां चापरः
सङ्गृह्णात्यपरोऽत्र सर्वविबुधाधीशत्वमालम्बते।।२१।।

सानन्दास्तनयानयानुसरणे दीक्षावतामग्रगाः
शास्त्राणां निधयो विदग्धसुधियो मित्राणि यस्याभवन्।
बाहू शङ्करकेशवौ, श्रितगुणः श्रीपद्मनारायणो
नागेशः पदपूजकः स जयति श्रीभारतीप्रीतिकृत्।।२२।।

येषां द्वारि शुभासनं धनवतां लब्धाधिकारा अपि
प्राप्तुं न प्रभवन्ति बुद्धिविभवा दक्षाः समीक्षाभृतः।
तेषामेव नितान्तदुर्गमतमेष्वन्तःपुरेष्वर्चिताः
विस्रब्धं कथयन्ति रामचरितं शिष्याः प्रशस्यास्तव।।२३।।

धन्यास्ते गुरवो यदाननगलद्विधां निपीयादरा-
दन्तेवासिकुलं दधाति विनयं नैसर्गिकीं स्वच्छताम्।
तां सम्पत्तिमुपेत्य दुर्लभतमस्थानेऽपि सम्पूजितं
मूर्ध्न्याधाय पदं श्रियो विजयते पूजास्पदं श्रीमताम्।।२४।।

तेषामेव हृदि स्थलेऽत्र भवता रामायणी सत्कथा
सूप्ता, यत्र कृतज्ञताऽतिशुचिता श्रीरामभक्तिः स्थिरा।
येनास्मिन् विषमेऽप्यनेहसि दिवं यातस्य विद्यागुरो-
र्गातुं गौरवगीतमञ्चिततमं कुर्वन्ति कार्यक्रमम्।।२५।।

स्मरन्तः कल्याणीं विबुध! तव वाणीमनुपमां
लभन्ते विस्रम्भाद् दुरधिगमकल्याणसरणिम्।
इहामुत्रोत्कर्षान् प्रथितनवहर्षाननुदिनं
श्रयन्ते श्रेयांसि त्वयि निहितभक्तिव्यसनिनः।।२६।।

श्रीधामनि सुकुमारे सुमनसि मधुगन्धबन्धुरेष्वब्धे।
कथमिव किंशुककुसुमे रमतां रसिकोऽत्र मधुकरः कोऽपि।।२७।।

# १०१.स्वामिनःकरपात्रिणः

मिथ्यात्वादिनिरूपणेऽस्य जगतोऽद्वैतागमे पण्डिताः[१]
विद्वांसोऽपि विवेचनप्रणयिनोऽप्यह्नाय वाचं यमाः।
जायन्ते यदि तादृशेऽपि जटिले गम्भीरचर्चाञ्चके
व्याख्यानेऽत्र सनातनैकसुकृतेऽप्येषो हसन्नन्दति।।१।।

१. पाठान्तरः अधिष्ठिताः।

श्रोतारो न विदन्ति तत्त्वमतुलं व्याख्याप्रसङ्गे परं
वाचं तस्य सुधामुचं न च जहत्युच्चावचं मेदुरम् ।
श्रद्धान्धत्वमुपागताः सुकृतिनः शृण्वन्ति तद्भाषितं
नो मुञ्चन्ति निजप्ररोचनविधौ सिद्धान्तसिद्धं वचः ।।२।।

वाग्मित्वस्य षोडशीमपि कलां येऽन्तर्दधत्यादरात्
तेऽद्यत्वे जगतीतले सुयशसो वन्द्यां प्रशंसास्पदम् ।
आशासु प्रथितासु कीर्तिकलिता स्फूर्तिर्जगन्मण्डले
दीव्यत्तुत्तमसत्प्रभावभरितः सम्मानलाभोऽद्भुतः ।।३।।

विनिर्गता यस्य मुखात् सरस्वती
तर्कोर्मिमालोल्लसिता चकास्ति ।
तद् युक्तिमालां परिधाय कण्ठे
प्रश्नान् परेषामपनेतुमीष्टे ।।४।।

सर्वेभ्यो व्यतरत्कृपामृतकणं चारित्र्चामीकर-
प्राशस्त्यप्रतिपत्तये समुचिताचारेषु रागं व्यधात् ।
श्रीकृष्णस्य कथासु पूर्णसुरुचिं चित्ते न्यधान्मानवे
नारीणां च नृणां पवित्रचरितं प्रत्यादरञ्चैधयत् ।।५।।

एतादृशैः परमदुर्लभसद्गुणौघै-
र्विद्यानवद्यचरितश्रुतिशास्त्ररत्नैः ।
शिक्षा प्रशस्यवचनामृतसत्तरङ्गै-
रुद्भासितं जयति भूमितलं पवित्रम् ।।६।।

यो धर्मसंघमिह धार्मिकलोकगुप्त्यै
यो रामराज्यपरिषत् प्रवरं विधाय ।
ऐच्छत् सदा सकललौकिककृत्यजातैः
कल्याणमाधुनिकमानवमानवृद्ध्यै ।।७।।

भाग्याधिकात् सुकृतितां कृतिनां च पुण्यात्
प्रादुर्भवत्यखिलसद्गुणदिव्यधामा ।
मेरुः सतां सुमनसां मणिमालिकायाः
पूर्णप्रकर्षमहिमा स्फुरतीह काश्याम्[१] ।।८।।

१.पाठान्तरः कश्चित्

मिथ्यात्वप्रतिपादनेऽस्य जगतो मुह्यन्ति विद्वज्जना-
स्तच्चाप्येष कथाप्रवचनविधौ संसाधयत्यञ्जसा।
श्रोतारो न विदन्ति तत्वमनघं दुर्बोधमेतत्परं
नैवोज्झन्ति तथापि हन्त! विमुखीभावेन नैजासनम् ।।९।।

×××

## ज्ञान-विज्ञान सागरः

....कसंसर्गो नौर्वज्वालाकुलान्तरः।
....रतथाप्यास्ते ज्ञानविज्ञानसागरः।।१।।

पूर्णिमायां वा समानो वीचिवैभवः।
....अऽपि सुखस्यन्दी ज्ञानविज्ञानसागरः।।२।।

यो द्विजाधीशैः सेवितो विबुधव्रजैः।
गुरुनिर्घोषो ज्ञानविज्ञानसागरः।।३।।

अपि नो पीतो मन्दरेणापि नार्दितः।
सञ्चरन् दिक्षु कोऽपीष्टे ज्ञानविज्ञानसागरः।।४।।

शेरते सरितो यस्मिंल्लुप्तदुर्दान्तविक्रमाः।
गम्भीरः स चकास्त्यत्र ज्ञानविज्ञानसागरः।।५।।

....तलं स्प्रष्टुं कृतायौर्विफलैर्धीरधीवरैः।
अर्चितः कोऽपि जयते ज्ञानविज्ञानसागरः।।६।।

यस्य सीकरमादायाम्बुदस्तर्पयति क्षितिम्।
स अगाधरसो जीयाज् ज्ञानविज्ञानसागरः।।७।।

तपोलक्ष्मीकुलावासः सारस्वतरसाप्लुतः।
धर्मरत्नधरो वन्द्यो ज्ञानविज्ञानसागरः।।८।।

×××

## महामनीषी

आपातरम्यविषयाद् विमुखः स्वकीय-
धर्मस्य मूलमभिषिञ्चति जीवनेन।
भूमानमेव वृणुते, रमते न चाल्पे
कल्याणमेधयति कोऽपि महामनीषी।।१।।

साध्नोति तत् यदपरैर्नितरामसाध्यं
धर्मे स्थितिं स्थिरयति प्रसभं नराणाम्।
निःश्रेयसं समुदयेन समं समन्तात्
प्रस्तौति सर्वसुखहेतु महामनीषी।।२।।

नास्तिक्यमाक्षिपति, निन्दति दुर्विचारं
शर्माभिनन्दति, हितं प्रकटीकरोति।
मोहं निहन्ति, विशदीकुरुते स्वधर्मं
श्रुत्यर्थमुन्नमयतीह महामनीषी।।३।।

सख्यं श्रियः सुरगिरश्च दृढीकरोति
षड्वैरिवर्गगुरुगर्वमपाकरोति ।
संख्यावतां सदसि तत्त्वमुपस्करोति
क्षेमं सतामिह तनोति महामनीषी।।४।।

# १०२. आचार्याः बलदेवोपाध्यायाः

(श्रीवाग्देविप्रसादप्रशस्तिः)
जयति गुरुवरः श्रेयसे प्रेयसे नः

निःश्रेयसाभ्युदयकौस्तुभपद्मराग-
चिन्तामणिप्रमुखरत्नविभूषिताङ्गीम् ।
देवीं गिरामविरतार्चनया प्रसन्नां
कृत्वेप्सितानि लभतामिह दुर्लभानि।।१।।

आशा विभासयति, सुस्थिरयत्युदारां
लक्ष्मीं, तनोति महिमानमनन्यलभ्यम्।
सौभाग्यमेधयति बन्धुरबान्धवानां
कीर्त्तिः सतां सुमनसां भुवनं पुनाति।।२।।

यो नो हलं वहति, वाञ्छति नैव मद्यं
नीलाम्बरावरणमिच्छति नैव देहे।
न क्रोधनो न मुसलं प्रति सानुरागो
धन्यो नवो विजयते बलदेव-देवः।।३।।

योऽनामयेन वपुषा कृतिभिर्नवाभिर्
वाचोविभूतिमनिशं विशदीकरोति[1]।
विश्राणयत्यनुपमैर्विविधैः स्वकीयैर्
ग्रन्थैर्विदां मनसि गौरवमर्चनीयम्।।४।।

प्राध्यापने रुचिकरेऽभिनवार्थसार्थे
व्याख्यानकौशलविजृम्भितवाग्मिताढ्ये।
स्मेरानने सुमधुरव्यवहारजाते
श्रद्धाभरैर्नमति को न मनीषिमान्यः।।५।।

पुरस्काराःस्फारार्चनमधिकृतास्त्वामनुरताः[2]
सपर्यापर्याप्तप्रथितमहिमानं च लभते।
दुरापस्थानानां प्रभवति समुत्कर्षमुदिता
सुकीर्त्तिः सुप्रीता दिशि दिशि हसन्ती विजयते।।६।।

अत्यन्तदुर्गमसनातनशास्त्रसार्थ-
साहित्यदर्शनपुराणकलेतिहासैः ।
सम्मण्डयन् भगवतीं सुरभारतीं यः
लोकोत्तराणि चरितानि पुरस्करोति।।७।।

एकाकिनापि भवता तदकारि कृत्यं
विद्वद्गणेन मिलितेन न यद् व्यधायि।
एतादृशाय गुरवे शतवार्षिकेऽस्मिन्
आयोजनेऽर्पयति को न सुधीः सपर्याम्।।८।।

---

१. *पाठान्तरः वाचो विभूषयति कोशमनर्घरत्नैः।*
२. *पाठान्तरः .... त्वामुपगताः।*

सत्कर्म-मर्म परिभाव्य निरन्तरं यः
दीव्यत्प्रभावलसिते रचनाप्रपञ्चे।
लग्नः क्षणं क्षणमिहायुषि चारुचर्यो
विद्वान् प्रबोधयति कालकलामहत्त्वम्।।९।।

पश्येम दिव्यचरितस्य महामहिम्नो
लक्ष्मीं द्वितीयशतपूर्त्तिमहोत्सवस्य।
तत्राभिनन्दनमपि प्रथयन्त एव
मृत्युञ्जयस्य कृपया वयमुल्लसेम।।१०।।

सर्वेषु राष्ट्रजनमानसमन्दिरेषु
भूयोऽभिवन्द्यचरणास्तु सरस्वती नः।
स्निग्धप्रदीपशिखयाऽखिलमानवानां
स्वान्तः स्थितानि तिमिराणि च संक्षयन्तु।।११।।

सद्वृत्तेन, सुचिन्तनेन, विमलस्वान्तेन, सत्कर्मणा,
स्वाध्यायेन, परोपकार-निरतेनानन्दनिष्यन्दिना।
नैरुज्येन, सुसंयमेन, सुकृतानुष्ठाननिष्ठात्मना,
सम्यङ्मानवताधिरक्षणविधेनाश्रीयते पूर्णता।।१२।।

श्रीमन्महापुरुषपादसरोजपूजा
विध्वंसयत्यखिलकल्मषमाशु बुद्धेः ।
उद्दामदर्पजनितान्यपराधदिग्धा-
न्युद्धूलयत्यतितरां च मनुष्यतायाः।।१३।।

सत्कीर्त्या, वरिवस्यया सुरगिरो, निष्णातया कर्मणो,
निर्मित्याऽभिनवाभिनन्द्यमहिमग्रन्थश्रियः शोभया।
आकृत्या स्मितमेदुरास्यमधुराह्लादेन लक्ष्मीजुषा
प्राज्ञानां चरणार्चनेन भवतां श्लाघा न कैर्गीयते?।।१४।।

गाम्भीर्ये विजितोऽर्णवः स्थितिविधौ दूरीकृतोऽम्भोनिधिः
औन्नत्ये कनकाचलोच्चशिखरोत्कर्षोऽधरं प्रापितः।
वाञ्छ्या परिपूरणे सुमनसां कल्पद्रुमो ह्रेपितः
वाग्मित्वे गुरुरर्दितोऽत्रभवता प्राप्ता दुरापा स्थितिः।।१५।।

केन्द्रप्रशासनसमर्चितपादपद्मः
अत्यन्तदुर्लभपुरस्कृतिभिः कृतार्थः।
योऽनामयेन वपुषा मनसा प्रसन्नो
गृह्णाति विश्रुतयशांसि समर्पितानि।।१६।।

सोष्णीषं शिर उन्नतं सुललितं भव्यं ललाटस्थलम्
सिन्दूरारुणबिन्दुमञ्जुविलसद्-भ्रूयुग्म-संशोभितम् ।
सौभाग्यैकनिकेतनं सुनयनं स्फीतं कपोलद्वयम्
सस्मेरं वदनं जयत्यनुपमं देवस्य लक्ष्मीजुषः।।१७।।

योऽनूचानशिरोमणिः, प्रवचने योऽद्वैतभावं गतो
विद्यादानमहाव्रतप्रकरणे यः ख्यातिमासेदिवान्।
ग्रन्थानां रचनाक्रमे विजयभाग् यो व्यासविद्यार्णवात्
लोके लोकसमर्चितोऽपि स भवाँल्लोकोत्तरो भासते।।१८।।

यस्मिन् स्वस्थकलेवरे शततमे संवत्सरेऽप्यायुषो
नैकोऽप्यस्ति गदो यतः स बलभृत् सम्भासमानं वपुः।
यस्मिन् कर्मठता दृढं विजयते बुद्धिर्विशुद्धाशया
सोऽस्माकं बुधनायकोऽत्र जगति प्रख्यातिमालम्बते।।१९।।

शृङ्गारो वाग्मिताया नवनवरचनोत्कर्षलक्ष्म्या विलासः,
स्फूर्तिः कर्मण्यतायाः सविधिबहुविधज्ञानदाने नदीष्णः।
आचार्यश्चारुचर्यासहितहिततमप्राप्तयेऽभिज्ञतायाः
सर्वाशागौरवश्रीर्जयति गुरुवरः श्रेयसे प्रेयसे नः[१]।।२०।।

कीर्त्या भवान् परमहंसकुलं व्यजैषीद्
दीर्घायुषा चिरमुवास च भारतेऽस्मिन्।
सारस्वते पथि चरन् विबुधैरुपास्यै
वश्यात्मनां सदसि विश्रुतिमाप देवः।।२१।।

यो लक्षाधिकरूप्यकाणि सुधियां पादाम्बुजाभ्यर्चने,
सानन्दं व्यतरन्निसर्गसुलभं प्रीतो वदान्यो द्विजान्।
एतेनास्य मनोरथः प्रकृतितः विद्वत्समा प्रक्रमे,
प्राणेभ्योऽपि सुदुस्त्यजं प्रियधनं व्यश्राणयत् कौतुकात्।।२२।।

---

*१. पाठान्तरः .... प्राणाः कर्मण्यतायाः विविधविधगिरामुत्सवोत्कर्षहेतुः।*
*विद्यादानव्रतानां प्रमुखसुमनसां फुल्लताया वसन्तः*
*मर्यादाम्भोधिसेतुर्जयति मतिमतामग्रणी श्लाघनीयः।।*

श्रद्धाया आस्पदं यो लसति सुमनसां स्यन्दमानं मरन्दं
चिन्तारत्नं प्रणम्यं सकलसुरगिरां शास्त्ररत्नाकराणाम्।
वाचामाचार्यताया जयति सुमनसां पूर्णपीयूषपूरः
सौवर्णो वाग्विभूतिर्जगति विजयते छात्रवर्गः प्रबुद्धः।।२३।।

# १०३.आचार्याः बटुकनाथशास्त्रिणः

## वाक्यपुष्पोपहारः

निगमागमसम्प्रदायान्तर्निहितहितकारितत्त्वानुसन्धानप्रतिपादनाधिगतः-
प्रभाप्रभासितशेमुषीकाणांविद्वद्वंशसमुद्भूतदिव्यदीप्तिस्फुरितप्रभूतगुण-
गणाञ्चितसन्मुक्तामणीनांसाहित्यविद्यावधूविहितससंरम्भ-
परिरम्भास्वादितसुधामाधुर्याणाम् अनायासासादिसत्काव्य-
निर्माणनैपुण्यपुण्यप्रभावाणांसत्प्रतिभाविभासितसद्वृत्त-
समेधितसत्काव्यभव्यतोद्भावकानां महामहोपाध्यायादि-
विविधसम्मानभाजां सुकविसम्राजां तत्रभवतां भवतां
सुकविमण्डलमण्डनानां पण्डितप्रवरश्रीबटुकनाथशास्त्रिखिस्ते-
महानुभावानां करकञ्जयोरुपह्रियमाणो
**वाक्यपुष्पोपहारः**

मान्यमान्याः!

या लुप्ता कृतिनां दुरन्तदुरितोत्कर्षैः प्रयागात्पुरा
साद्यत्वे रसधारया प्रकटिता निःष्यन्दमानाऽमृतैः।
हंसैः सेवितसत्तटा द्विजकुलैराराधिता चर्यया
काश्यां सैव सरस्वती वितरतु श्रेयांसि भूयांसि नः।।१।।

विद्यायामनवद्यतावितरणे सौशील्यदीक्षाक्रमे
दाक्षिण्यप्रतिपादने रुचिरतासम्पादने जीवने।
अन्तेवासिजनोन्नतिप्रकरणे दुःसाध्यमप्याचरन्
धन्यस्त्वं त्वमिव प्रभासि विदुषां मालासु मेरूपमः।।२।।

शास्त्राभ्याससमादरः सुरगवीस्तन्यस्य सारामृत-
स्यन्दः स्पन्द उदारतानववधूलीलाश्रियो मूर्त्तिमान्।
सामानाधिकरण्यमद्भुततमं सौजन्यवैदुष्ययो-
रुद्गारो धृतविग्रहो विजयते दाक्ष्यप्रतीक्ष्योभयोः।।३।।

छाया स्प्रष्टुमपि क्षमो न सुकविः कश्चित् पुरः संस्कृते-
मैत्रीनिर्वहणेऽपि साम्यमयते नान्यः क्वचित् साम्प्रतम्।
क्षीणे सामयविग्रहेऽपि नितरां पीने सुबुद्ध्युत्सवे
प्रीतः प्रीतिधनोऽवदातहृदयो जीयाद् विदामाश्रयः।।४।।

यः श्रीराष्ट्रपतिप्रशंसितपदो यश्चादृतः पुष्कलैः
सम्मानैर्विरुदैश्च दुर्लभतमैः सम्भूषितो भूरिशः।
सोऽहङ्कारविवर्जितो जितकटुव्याहारहालाहलः
स्मेरास्योऽमृतवर्षिणीं गिरमुदाहार्यां वदन् वन्द्यते।।५।।

सद्वृत्ता सविभूषणा समधुरा श्लेषप्रसादोत्सवा
निर्दोषा शुभलक्षणा नवनवश्लाघ्यार्थसंविन्मयी।
वक्रोक्त्योल्लसिता शिवा सुरधुनीकल्लोलमालोपमा
धन्या ते कविता पदैः सहृदयान् कांस्कान्न चाक्रामति?।।६।।

भक्त्योपासनयेष्टदेवचरणाम्भोजस्य सच्चिन्तया
मन्त्राणां च जपेन सम्पदि विपद्याभाति तुल्या स्थितिः।
त्वां नो केवलसत्कविर्न च महान् प्राज्ञोऽसि वा केवलः
काश्या मानविवर्धनो विजयसे त्वं सर्वविद्याधरः।।७।।

श्रेयोभिर्निगमागमोक्तविधिभिः सन्दीक्षितः सद्गुरोः
कल्याणार्णवविग्रहान्निगदितानुष्ठाननिष्ठोऽन्वहम् ।
सम्पूर्णार्धशताब्दिकावधि दृढं सम्पादयञ्छ्रद्धया
श्रीविद्यापदपूजनं, विजयते विद्याकलाशेवधिः।।८।।

यस्यान्तेवसतां सतां सुयशसा शुक्लीकृतं भारतं
सर्वाशाः प्रतिभासिताश्च पठतां वर्गैः सगर्वाचितैः।
वात्सल्याद् भवतामुपार्जितसमुत्कर्षैकबीजाङ्कुरैः
शिष्यैरर्चनया जयन्ति चरणाम्भोजस्य वः पांसवः।।९।।
शिष्यप्रशिष्यतिमिरक्षपणे नदीष्णाश्चिन्तामणिस्त्वमसि तन्महिमप्रदाने।
सौम्योऽवलेपविगलल्ललितान्तरङ्गो मित्रस्य चाभ्युदयशैलपतिर्विभासि।।१०।।
दीव्यद् द्विवेदिकुलकौस्तुभभव्यभासः श्रीरामचन्द्रसुधियः कलकीर्तिहेतुम्।
केतुं गिरां परमपावनमन्दिरस्य खिस्तेगुरुं सकलमङ्गलमूलमीडे।।११।।

दिनाङ्कः १४.५.१९९८

वयं स्मः
आचार्यरामचन्द्रद्विवेदिभारतीयविद्यापीठस्य सदस्याः
१२८ बालाजी कॉलोनी, लंका, वाराणसी

# १०४ .आचार्याःसीतारामशरणाः

सीतारामपदाम्भोजमकरन्दमधुव्रतम् ।
श्रीसीतारामशरणं स्वामिनं यमिनं नुमः ।।१।।

श्रीमैथिलीचरणरेणुकणाभिराम-
भालं, स्वभक्तिगुणबद्धकृपालुरामम् ।
सारस्वतीमपचितिं सततं दधानं
वन्दे कथामृतझरैर्भुवनं पुनानम् ।।२।।

आत्माश्रिताय वितरन्तमभीप्सितानि
सन्तं महान्तपुपकारभरैर्विभान्तं ।[1]
भोगेऽपि योगमनिशं हृदि सन्दधानं
वन्दे विदेहनृपनीतिपथैकपान्थम् ।।३।।

रोमाञ्चकञ्चुकितमाप्तमुपास्य दीप्त्या[2]
मालाविभूषितकरं स्मितपूर्वभाषम् ।
निःश्रेयसप्रणयिमन्त्रजपात्तमालं
ध्यायामि लक्ष्मणकिलाधिपतिं भवन्तम्[3] ।।४।।

कादम्बिनी किरति वः करकञ्जलग्ना
सल्लेखनी नवसुधां वसुधाङ्गलक्ष्म्याम् ।
आस्वाद्य यन्मधुरिमाणमहो! विदग्धा
वेद्यान्तराणि सरसान्यपि विस्मरन्ति ।।५।।

---

*१. पाठान्तरः – धर्मं सनातनमनारतमाश्रयन्तम्।*
*२. पाठान्तरः – इष्टस्मृतिस्फुरितनिर्मलचारुचित्तम्।*
*३. पाठान्तरः – मन्त्राक्षरोत्तमजपव्यवसायमालम्।*
*तन्त्री निनादमधुरस्वररक्तकण्ठम्।*

वाल्मीकिकीर्तिरमणीं रमणीयवृत्तां
रामायणीं शशिकलामिव मुक्तदोषाम् ।
मीमांसयाद्य शरदाधिकभासमाना-
मालोक्य को न मुदितामुदितां श्रयेत? ।।६।।

अत्यन्तदुष्करगृहीतसमाधियोगो
भोगोपरक्तमनसाऽखिलतन्त्ररत्नैः ।
भक्त्या प्रभोर्विरचितामलांशुमालां
भक्ताधिकण्ठमधुनाऽर्पयतीह कोऽन्य[1]:? ।।७।।

प्राचेतसप्रतिकृते रघुनाथकीर्ति-
विस्तारकस्य भवताऽर्च्यतपोवने ऽस्मिन् ।
देवीं विदेहतनयामिव सद्व्रतस्थां
ध्यायाम्यनर्घगुणरत्नखनिं सुनीताम् ।।८।।

ये रामभक्तिरमणीधृतकर्णपूर-
माणिक्यरत्नेषु दिव्यविभया विभया विभान्ति[2]।
लोकोत्तरार्यश्रीरामचन्द्रचरितानि विभासयन्ति
ते दाक्षिणात्यसुधियः स्वधियां प्रकाशैः ।।९।।

विद्वद्वरैर्गुरुपरम्परयाऽऽत्तसारा-
ष्टीकाः कृता बहुविधाः स्तुतदाक्षिणात्यैः ।
तासां रहस्यमतिशस्यमुदीच्यवर्गेऽ
प्यापादयन्तमतुलं कृतिनं नुमस्त्वाम् ।।१०।।

वाचा सुधामुदमुचा निरवद्यहृद्या-
विद्याविभासितहृदा रमणीयवृत्त्या ।
भक्त्या श्रिया करुणया परमार्थवादै-
र्नादैश्च भासि भुवने त्वमिव त्वमेव ।।११।।

ज्ञाताप्यपूर्वविधया रचिता कथाश्रीः
स्वान्ते विदामपि न कुतूहलमातनोति ।
सच्चित्रकाररचनोर्जितशिल्पलक्ष्मी-
र्नेत्रेऽमृताञ्जनमनक्ति न पश्यतां किम् ।।१२।।

---

१. *पाठान्तरः कण्ठे युनक्ति भजतामिह कस्त्वदन्यः।*

२. *पाठान्तरः गुप्तं मतं रघुवराचरिते जयन्ति (लिखन्ति)।*

नो भोजने न शयने न सुहृत्समाजे
सङ्गीतके न ललितेऽभिनये न गोष्ठ्याम्।
नार्याजने न जनसंसदि ना प्रयाणे
ग्रन्थाक्षराणि पठतां भवति प्रवृत्तिः।।१३।।

एतादृशं निरुपमं सरसं सुवर्ण-
कोषं सुमङ्गलमनल्पगुणाभिरामम् ।
ग्रन्थं विधाय सुधियोऽधिकरं निधाय
लोकोत्तरं कमपि कर्मविधिं शिशिक्षे ।।१४।।

अत्यन्तविस्मयवशादथ चाल्पबोधान्
नैवाधिकं किमपि वक्तुमहं समर्थः ।
किं बालिशो जितसुधामुपभुज्य रस्यां
द्राक्षा निवेदयितुमर्हति तद्विशेषान् ।।१५।।

यद्याशिषा भवमहोदधिमग्नमे-
मुद्धर्तुमुद्भवतु चेत् करुणाऽन्तरङ्गे ।
सङ्केतमेतमवलम्ब्य तदा भवन्त-
स्तुच्छं कृतार्थयितुमेव लिखन्तु किञ्चित् ।।१६।।

## १०५.आचार्याःशिवदत्तशर्मचतुर्वेदाः

निःसङ्गो विषयेषु कर्मनिरतो गीताविवेकप्रदो
नेतृत्वं सुकृतात्मनां सुमनसां क्षेमाय सन्धारयन् ।
कर्त्तव्याद्विमुखं विमोहवशगं प्रोद्दीपयन् भारतं
तत्त्वज्ञानविदांवरो गिरिधरः शर्माणि नः साधयेत् ।।१।।

आचार्यान्मधुसूदनादभिनवा व्याख्यासमाख्यादराद्
आम्नायार्थनिरूपणे निरुपमा रीतिः समासादिता ।
तेनाश्रान्तपरिश्रमेण विदुषा श्रीमच्चतुर्वेदिना
स्वीयोपाधिरतीवसार्थकतमः सम्पादितो विद्यया ।।२।।

शास्त्रार्थेषु जयश्रिया तिलकितो मन्त्रान् पठन् वैदिकान्
विज्ञानाभिमतार्थबोधनपटुः श्रीसंस्कृतिं पालयन्
नव्यं भव्यतमं सनातनमतं पुष्णान् नवीनोर्जया
सत्कीर्त्या प्रथयन् स्वधार्मिककुलं लोकोत्तरो योऽभवत् ।।३।।

श्रौत-स्मार्तपरम्परासु चलितां रीतिं प्रतीतिं प्रति-
प्रत्याख्यानरुचिं भृशं प्रकटयन् वैतण्डिकानां गणः ।
आत्मोपज्ञनवीनतर्ककुलिशैर्वादीभसिंहव्रतै-
र्मूकत्वं गमितो जयत्यभिनवो वाचस्पतिर्भारते ।।४।।

विज्ञानप्रतिपत्तिसम्मतनवं वेदार्थमुद्भावयन्-
जिज्ञासूनभिनन्दयन् सुमनसः सौरभ्यमुत्कर्षयन् ।
श्रौतीं संस्कृतिमुत्तमां प्रवचनैः संस्थापयन्नन्वहं
लोकेऽलौकिकमेधया गिरिधरो विद्वत्सु सम्पूजितः ।।५।।

तपस्विनो ज्ञानधनस्य वाग्मिनो यशस्विनः सद्गुरुकीर्तिशेवधेः।
मनस्विनः पुण्यपरायणत्विषः पितुः प्रियः पुत्रवरो विराजते।।६।।

क्रियासु दाक्ष्यं तरुणेषु तन्वन् प्रमादमन्तर्हृदयान्निरस्यन् ।
सुधां सदा काव्यरसे विमिश्रयन् जयत्युदारः शिवदत्तशर्मा ।।७।।

सोत्साहो विनयी नितान्तमधुरो नैसर्गिकः शीलवान्
प्राज्ञः पण्डितमानिनां सुनिकषः सल्लेखकः कीर्तिमान् ।
प्रत्युत्पन्नमतिः प्रसन्नवदनो विद्यावतां प्रेरकः
प्राचार्यः शिवदत्तशर्मविबुधाधीशश्चिरं जीवतात् ।।८।।

विद्वद्भिर्महतां महद्भिरतुलैः सद्भिर्मठाधीश्वरै-
र्धर्माराधनतत्परैः सुपुरुषैर्लोकोपकारव्रतैः ।
सर्वेषां शुभचिन्तकैः सुकृतिभिः सत्कीर्तिरीतिप्रियैः
सख्यं स्वच्छहृदा सदा विशदयन् प्रीणाति यः सत्कविः ।।९।।

सम्पूर्णे भरताभिनन्दितभुवो भागे भ्रमन् धीधनै-
स्तातैः सार्धमुपेयिवाननुपमां व्युत्पत्तिलक्ष्मीं स्थिराम् ।
प्रख्यातैर्बहुलैर्बहुश्रुतबुधैः सञ्जातरागोदयो
लेभे दुर्लभवैदुषीं समुचिताचारप्रचारव्रतम् ।।१०।।

रत्नाकरो जयति दुर्लभसन्मणीनां
कीर्त्त्या सितीकृतदिगन्तरसो विभाति ।
सौजन्यशेवधिरनर्घगुणाभिरामो
वैदुष्यभूष्यवचनः शिवदत्तशर्मा ।।११।।

आलम्बनं विजयते विनयाधिलक्ष्म्या
उद्दीपनं जगति राजति वाग्मितायाः ।
मन्दस्मितं लसति सत्कवितेन्दिराया
उत्साहमूर्त्तिरधितिष्ठति विज्ञमञ्चम् ।।१२।।

मैत्रीं धृतिं प्रमुदितां हृदि सन्दधानो
मानोन्नतिस्रजमुरस्यवलम्बमानः ।
अध्यापने जयति सत्कविताविताने
प्रामाणिकप्रवचने शिवदत्तशर्मा ।।१३।।

यः पाणिनीयनिगमे, कविकर्मदाक्ष्ये,
काव्यागमे रुचिरलेखनकौशले च ।
अध्यापने ललितमुद्रणशिल्पकल्पे
धर्मादिसत्प्रवचनेऽनुपमश्चकास्ति ।।१४।।

लोकोत्तरप्रणयवानपि मुक्तरागो
गेहे वसन्नपि सदैव विविक्तसेवी ।
बद्धोऽपि सदगुणगणेन निरावृतान्त-
र्विद्याव्रतोऽपि जयति व्यवहारदक्षः ।।१५।।

आत्मानुशीलनविधौ पित्तुरात्तदीक्षो
दर्पान्धसिन्धुरविपक्षभयाय सिंहः ।
काव्यानुशासनविबोधनलब्धकीर्ति-
र्जीव्याच्चिराय शिवदत्तकवीश्वरोऽयम् ।।१६।।

नीराजयन्ति कृतिनो विविधागमेषु
यस्य प्रशस्यरचनार्चितलेखनीं याम् ।
तस्याभिनन्दति निबन्धनिबन्धनेषु
को नानवद्यकृतिसत्कृतये मनस्वी? ।।१७।।

आद्यां विभूषयति पण्डितपङ्क्तिमालां
मेरुं कवीन्द्रकुलमौक्तिकचारुदाम्नाम् ।
सम्भावनां सुमनसां सुषमां शुचीनां
कीर्तिं सतां विशदयत्युचितक्रियाभिः ।।१८।।

प्रीतिं निसर्गरमणीयतमां बिभर्त्ति
नीतिं निभालयति सज्जनचन्दनानाम् ।
रीतिं समर्चति सतां विदुषां मुनीनां
भीतिं विमुञ्चति दुरात्मजनादुपेताम् ।।१९।।

अभ्यर्चयन्ति सुधियः शुभलेखनीं तां
येयं सुवर्णनिवहैरिह वाङ्मयं नः ।
वृद्धं समृद्धमतिचारुविचाररत्नैः
सम्मण्डितं कृतवती विषमेऽपि काले ।।२०।।

यश्चोत्तमानि शतकानि बहूनि सद्यो
निर्माय काव्यमितरच्च गुणानुबन्धि ।
निर्माय स्वात्मयशसो महसा दिगन्तान्
रम्यांस्तथा वितिमिरान् कुरुते प्रकृत्या ।।२१।।

स्मेराननोऽपि मधुरोऽपि दृढव्रतोऽपि
सौजन्यशेवधिरपि प्रियबान्धवोऽपि ।
दैन्य-प्रवञ्चन- कदर्यकथानुवृत्तिं
नाङ्गीकरोति परिवारकदर्थितोऽपि ।।२२।।

संसत्सु यः सुमनसां मधुरैर्वचोभि-
र्हास्यच्छटामभिनवामुपदीकरोति ।
श्रोता विमुग्धहृदयो हसितं विवृण्वन्
लोकोत्तरं किमपि कौतुकमातनोति ।।२३।।

दुर्वासना बलवती पुरुषप्रतिष्ठां
सद्यो विनाशयति दुष्कृतकर्मरागात् ।
किन्तूत्तमप्रकृतिकः कलुषप्रवृत्ति-
मह्नाय सन्त्यजति निर्मलचित्तवृत्त्या ।।२४।।

य:प्रावृषेण्यनिविडाम्बुदमालिकासु
ग्रीष्मेऽपि पूर्णतरुणेऽह्नि च सस्मितास्य: ।
राकासु दर्शरजनीष्वपि तुल्यकान्ति-
र्बाभाति स द्विजपतिर्भुवनं पुनान: ।।२५।।

विद्यालता शिवतरुं परिरभ्य पुष्पै-
रामोदमेदुरमरन्दकरम्बिताऽऽस्ते ।
मुग्धा यतो मधुकरा मधुरा मधौ तु
गायन्ति गीतमविगीततमस्वरेण ।।२६।।

आर्यानुवर्तनविधौ विमुखोऽपि शश्वत्
आर्यासु सिद्धिमुपलभ्य कवीन्द्र एष: ।
काव्यानि भव्यविभवानि विदग्धवन्द्या-
न्याविष्करोति ललितानि विभूषितानि ।।२७।।

प्रस्तावना जयति यौवननाटकस्य
संवाद एति सरसत्वमुदारताया: ।
हर्षोत्सवो लसति सिद्धविदग्धताया
मुग्धत्वमुद्भवति मञ्जुलविभ्रमस्य ।।२८।।

## १०६. आचार्या: विश्वम्भरनाथपाठका:

*स्वाध्यायप्रवचनानुशासनानुष्ठानोपार्जितदुरापयशसाम् उत्तरभारतीयानेकप्रतिष्ठितविश्वविद्यालयेषु विद्यादानमहिम्ना प्रसारितमहसां केन्द्रीयशिक्षामन्त्रालयप्रशासनासनारोहणादारभ्य शिक्षाविभागीयप्रतीक्ष्यपदप्रतिष्ठां समेधयतां देशदेशान्तरीयविश्रुतविदुषां समवायेन समादृतशेषमुषीमहसां प्रतिभाप्रभासमुद्भासितनिर्मत्सरसुधीमनसां सुमनसां डॉ. विश्वम्भरशरणपाठकोच्चमनसां गोरक्षपुरविश्वविद्यालयस्य कुलपतिपदमलङ्कुर्वतां करकमलयोरुपह्रियमाण: काशीहिन्दूविश्वविद्यालयीयविद्याध्ययनकालिकसहचरबान्धवोद्गारात्मक: पद्यप्रसूनाञ्जलि:*

*प्रेयांसो भ्रातर:!*

श्रेयांसि प्रथयंस्तमांस्यपनयन् ज्योतींषि विस्तारयन्
आमोदं परिवर्धयन् सुमनसां तन्वन्मरन्दामृतम् ।
पुष्णन् संस्कृत-संस्कृतिप्रमुदितां भूतिं सतामुत्तमाम्
सानन्दं वितरीतरीतु जगति प्रेयांसि विश्वम्भरः ।।१।।

रेवायाः पुलिने कुले मतिमतामासाद्यजन्मोत्सवं
शिक्षाया अधिकारिपूर्तिमनयनत्प्राचार्यवर्यार्चिताम् ।
लब्धज्ञानमहार्हरत्नकिरणैरुद्योतितं भारतं
पाश्चात्यां सरणिं च वैशमगुरोः सम्प्राप्यसम्पूज्यते ।।२।।

यो न प्रीतपतङ्गसङ्गममुदं भस्मावशेषं नय-
त्यात्मोत्कर्षसुखाय वाञ्छति न यः सान्द्रान्धकारस्थितिम्
मित्रे चाभिमुखेऽपि मुह्यति न यो नो कम्पते मारुते
सोऽयं कोऽपि नवो जयत्यनुपमो दीपो निसर्गोज्ज्वलः ।।३।।

आद्यां पक्तिमलङ्करोति भुवि योविख्यातविद्यावतां
यो ज्ञानाम्बुधिमन्दरो निरुपमो यःशीलशैलेश्वरः ।
यस्तीर्थीकृतसङ्गमोऽधिहृदयं वैदुष्यसौजन्ययो-
र्यश्चान्तर्मुखमानसो विजयते लोकोऽपिलोकोत्तरः ।।४।।

यो विद्याधिगमक्षणं सफलयन् प्रासादयत् सद्गुरून्
विद्यादानमखं प्रपूर्य यशसा विश्रान्तिमासेदिवान् ।
सत्वं दुर्वहभारमात्मशिरसि न्यस्तं कुलाधीशितु-
र्बुद्ध्या पूर्णतया तया सहजया निर्व्यूह्य कीर्तिं लभेः ।।५।।

अद्यत्वे कुलमुल्लसत्कलिकलालीलाविलासस्थलं
नानादुर्भेददुर्दलाकुलमलं वीक्ष्य प्रतीक्ष्यो बुधः ।
यद्यप्युत्सहते न शासितुमिदं, किन्त्वर्थितः शास्तृभि-
स्त्वं स्वीकृत्य विभूषयिष्यसि पदं निर्व्याजभव्याशयः ।।६।।

वैदुष्यहेमनिकषोपमविश्वविद्या
सद्मन्यनल्पमहिमानमनर्घशीलम् ।
स्थानेऽभिषिक्तमवलोक्य कुलप्रशास्तु-
स्त्वां को न कीर्तिनिधिमर्चति चारुचित्तम् ।।७।।

आत्मीयभावभरितान् प्रणयार्द्रचित्तान्
बन्धून् समुन्नततमोऽपि विभर्त्ति बन्धुः ।
भास्वान् सदाभ्युदयशैलशिरः स्थितोऽपि
कासारतामरसमङ्गलमातनोति ।।८।।

अम्भोधरे वियति नन्दति पूर्णतोये
नृत्यन्तु मुग्धमनसः शिखिनो वनान्ते ।
श्लाघ्या तदा स्थितिरुदेष्यति ते पयोद ।
प्रीतोऽभिनन्दति यदा कुलचातकस्त्वाम् ।।९।।

कश्चित्प्राप्य महत्पदं प्रभवति प्राप्तुं सतामर्हणा-
मन्यस्तत्पदमेव गौरवमयं कृत्वा समुद्योतते ।
त्वं नैतेन पदेन पूजितपदो विद्वत्सु सम्भाससे
त्वामद्य समर्च्यते पदमिदं भाग्याधिकात् धीमताम् ।।१०।।

कौटिल्यं लयमेतु वैकटिकता प्राप्नोतु भूयोऽर्चनां
मैत्री मुञ्चत वञ्चनां वितरतु ज्ञानं गुरुर्निस्पृहः ।
उत्कोचग्रहणात् प्रभुर्विरमतु, प्रीणातु योग्यो जनः
सत्पक्षः प्रसरीसरीतु शुचिता चित्ते चिरं नन्दतु ।।११।।

वयं स्मः भवतोऽभ्युदयमात्मोदयं मन्यमानाःकाशीहिन्दूविश्वविद्यालयीया
अभिन्नात्मानः सुहृदः।

# १०७. आचार्याः रामकुमारत्रिपाठिनः

*प्राच्यप्रतीच्यानेकसमृद्धभाषासाहित्यानुशीलनजनितपरिष्कारोल्लसितसन्मतीनां, सम्यगधीतानां, नानोच्चस्थानस्थप्रख्यातविद्यासंस्थानेषु निजाध्यापन-प्रबन्धनादिपाटवेन परितोषितच्छात्राध्यापककर्मचारिप्रबन्धकनिवहानाम् अवधविश्वविद्यालयीय-कुलपतिपदमलङ्कृत्योपार्जितकीर्तिराशीनां, सम्प्रति काशीविद्यापीठ-विश्वविद्यालयस्य तदीयसर्वविधोत्कर्षसम्पादन-संलग्नमानसानां कुलपतिपदमलङ्कुर्वतां श्रीमतां* ***रामकुमारत्रिपाठिमहाशयानां*** *करकञ्जयोः समर्प्यमाणमभिनन्दनदलम्।*

*मान्यमान्याः*

विश्वामित्रवशिष्ठसद्गुरुवरानभ्यर्चयञ्छ्रद्धया
मातुः पूज्यपितुः प्रणम्य चरणौ भक्त्या नमन् प्रत्यहम्।

भ्रातृणां हृदयं सदैव मसृणीभावेन संयोजयन्
सद्भावं प्रथयन् सतां विजयते रामोऽभिरामाननः।।१।।

अन्योऽन्यप्रणयप्रकर्षमधुरौ श्रीराम-विश्वेश्वरौ
वाञ्छाकल्पमहीरुहौ त्रिजगतां श्रेयोऽर्थदाने रतौ।
योगक्षेम-विधानलग्नमनसौ सर्वार्थसिद्धिप्रदौ
कल्याणं जगतीतले वितरतां सद्भक्तिभाजां मुदे।।२।।

यान्यासनसुविचारचारुचरितोत्कर्षैकबीजात्मना-
पूज्यानामपि पूजनीयपदवीमासादितानि श्रिया।
तान्येवाद्य कुलानि कूटकपटातङ्कादिपङ्कान्तरे
मग्नानीव निवेदयन्ति विपुलां विद्यावतां वेदनाम्।।३।।

प्राज्ञानां परिषत्सु, संसदि सतां पूजास्पदे यत् पदं
सर्वेषामभिनन्दनीयमभवत्, तत् क्वाधुना दृश्यते?
तस्मात्तत्पदगौरवं कुलपतेराधातुमद्यावनौ
भासन्तेऽत्र भवादृशाः सुकृतिनो द्वित्राः पवित्राशयाः।।४।।

सत्साहित्यसुधासहोदररसे निष्णातया मेधया
विद्यामन्दिरमङ्गलाय कुरुते शर्माणि कर्माणि यः।
संस्कारं पठतां मनस्यनुपमं संस्थापयन्नोजसा
प्राचार्यानपि शिक्षसे सुरुचिरां चर्यां सदा चर्चया।।५।।

अत्यन्तं विनयान्वितोऽपि नितरामन्योऽन्यदुर्विग्रहं
दूरीकर्त्तुमतीव निष्ठुरतया गृह्णासि नीतिं स्थिराम्।
सत्पक्षः क्षतशिक्षणक्रममनुष्ठातुं पुनः पावनं
विद्यापीठसमुद्भवाय नितरां लग्नोऽधुना द्योतसे।।६।।

साकेतप्रतिवेशिमण्डलमलङ्कुर्वन् कुले जन्मना
त्वं गोविन्दपुरे मुनीश्वरपितुः सद्वंशमुक्तामणिः।
विद्यायां, विनये, नये, समुचिताचारे, विचारे प्रिय-
व्याहारेऽर्जितविक्रमो विजयसे सर्वानखर्वान् बुधान्।।७।।

आद्यां पंक्तिमलङ्करोषि विदुषां, श्रद्धास्पदत्वं सतां
त्वं प्राप्नोषि, दुरात्मशक्तिदमने जागर्षि मुक्तोभियः।
अन्वर्थैर्वचनैर्वृथैव नदतो नीचैः करोष्यम्बुदान्
अद्यत्वे त्वमिव त्वमेव जयसि श्रीधाम-दामाश्रितः।।८।।

त्वं भास्वानिव नित्यमभ्युदयसे धाम्ना तमांसि क्षिपन्
स्वे स्वे कर्मणि जागरुकहृदयान् सर्वान् समायोजयन्।
घूकानन्धतमान् दिवापि विदधज्जाड्यानि विध्वंसयन्
लक्ष्मीं सन्तनुषे सतां च सरसां स्वान्ताम्बुजं फुल्लयन्।।९।।

निर्भ्रान्तः परिवादनिर्णयविधौ दुर्वादविध्वंसिनि
शिक्षासत्रमकारणं विघटितं कुर्वन् स्थिरं प्रक्रमैः।
सौशील्यं पठतामनारतमनायासेन निष्पादयन्
धीमान् रामकुमार एष सुकृती प्रीतः कृती राजताम्।।१०।।

पित्रोर्दुष्करसत्तपः फलमिव प्राप्तं शुभं जीवनं
मातुः पुण्यपरम्परैव भवतो मेधाऽभवन्मञ्जुला।
सङ्कल्पोऽथ शिवस्तदीयमनसस्त्वन्मानसे नन्दति
प्रीतः स्फीतगुणस्तवाधिहृदयं लब्धोदयो भासते।।११।।

सौजन्यामृतसिन्धुरुज्ज्वलयशोराशिस्तपस्वी पिता
दत्तान्तोऽत्रमुनीश्वरोऽर्पितमना विश्वेश्वराराधने।
माता सद्गृहिणी सती धृतधृतिर्मेधा सुधावर्षिणी
दम्पत्योस्तपसः फलप्रतिकृतिः सूनुर्भवान् भ्राजते।।१२।।

सौभाग्यस्य निकेतनं, सुमनसां भव्यालबालं नवं
शास्तॄणामवलम्बनं, निरुपमं धैर्यस्य धामाद्भुतम्।
शृङ्गं वाग्मिगिरेः, प्रशासनकलालक्ष्म्या विलासस्थलं
भारत्याः शुचिवैभवं सुललितं कीर्त्तेः स्मितं भ्राजसे।।१३।।

बुद्ध्या तीव्रकुशाग्रया, धवलया कीर्त्त्या, दिशां मण्डनै-
र्मित्रैश्चारुचरित्रपूतहृदयैर्गण्यैरगण्यैर्गुणैः ।
देहेनातिनिरामयेन वचसा पीयूष-धिक्कारिणा
त्वं जीव्या जगतः श्रियं विशदयन् भव्यः समानां शतम्।।१४।।

वयं स्मः-

श्रीसाधुबेलासंस्कृतमहाविद्यालयीयसप्राचार्याचार्यान्तेवासिकर्मचारिणश्च
एवं प्रादेशिकसंस्कृतविद्यालयाध्यापकसमिति, उ.प्र., जनपद वाराणसी

# १०८. आचार्याः हरिहरस्वामिनः

काशीहिन्दूविश्वविद्यालयीयगीतासमित्या समायोजिताया गीताव्याख्यान-
मालाया भास्वरमणिभूतानाम् महाराजश्रीहरिहरस्वामिपादानाम्
चरणयोः समर्प्यमाणः प्रणामाञ्जलिः

दुग्धामृतेन सह सर्वसमीहितार्थान्,
या कामधेनुरिव वर्षति भक्तिभाजाम् ।
मातेव सा भगवती करुणार्द्रचित्ता,
गीता प्रपूरयतु नः सकलेप्सितानि ।।१।।

भाष्याणि सन्तु विविधानि धनानि वाचो,
देव्याः समृद्धिपरिवर्धनकारणानि ।
हार्दं परन्तु विबुधाभिमतं नितान्तं,
ब्रूते स्वयं हरिहराऽभिनवीकृताङ्गः ।।२।।

मोहान्धकारहरणे हरिरेव साक्षाद्,
विद्याप्रदानविषये रसिको हरोऽयम् ।
मिश्रीभवन्निव गुणेन शिवेन नाम्ना,
धाम्नाप्ययं हरिहरत्वमुरीकरोति ।।३।।

ग्रंथिश्लथीकरण - कौशलमादधानान्,
वागीश्वरान् जगदशेषविकारहीनान् ।
त्यक्ताभवारिविषयान् स्मितशोभिवक्त्रान् ।
गीतोपदेशनिरतानभिनन्दयामः ।।४।।

कण्ठस्वरेण मधुरेण सुधोपमेन,
सन्तर्जयन्तमिव तं कलकण्ठकण्ठम् ।
आविष्कृतैर्विविधभौतिकवस्तुजातैः,
कुण्ठां गिरः प्रशमयन्तमिमं नमामः ।।५।।

विद्योतमानमहिमानममानमीड्यं,
लोकस्तुताङ्घ्रिकमलं विमलान्तरङ्गम् ।
दुर्बोधतत्त्वमचिरं हृदये नयन्तं,
यन्तारमिन्द्रियगणस्य समर्चयामः ।।६।।

वृद्धोऽपि भीष्म इव यस्तरुणोऽग्रगण्य-
स्त्यागीश्वरोऽपि धृतबोधमणिर्वरेण्यः ।
विश्वार्चितोऽप्यखिलभारतरत्नभक्तः,
सक्तोऽपि सद्‌गुणगणे जयतादसक्तः ।।७।।

वयं स्मः
गीतार्थामृतपायिनः गीताभक्ताः।

# १०९.आचार्याः रेवाप्रसादद्विवेदाः

यः काव्यशास्त्रपरिशीलनलब्धकीर्तिः
यः सत्कवीन्द्रकुलकौस्तुभरत्नदीप्तिः ।
यश्चोत्तमोत्तमयशस्य नवप्रबन्धै-
रुद्‌भासितो जयति पण्डितमण्डनोऽयम् ।।१।।
श्रीमद्विवेदिकुलजोऽर्जितकाव्यशास्त्र-
रत्नाकरस्य महिमोपचयो मनस्वी ।
रेवाप्रसादसुधियः सुकवीश्वरस्य
कीर्तिः श्रिया सततमर्च्यतमा विभाति ।।२।।
यः पूर्वपण्डितजनाभिमतस्य सम्यक्
कृत्वा समीक्षणमुपार्जितवान् स्वकीयम् ।
सिद्धान्तमत्र परमं स्थिरताशु तन्वन्
लोकोत्तरः किमपि वैभवभागभूत्सः ।।३।।
यैर्निर्मितानि सकलानि विमण्डितानि
काव्यानि विज्ञपुरुषेण पुरस्कृतानि ।
यत्तुल्यतां श्रयति नैव परः प्रशस्यो
विद्वान् नितान्तविपुले महनीयदेशे ।।४।।
यद्‌वाङ्‌मयं निखिलमानवमानवृद्धे-
राचारचारुचरणाय दिशत्युपायान् ।
तस्मिन् निसर्गरमणीयतमेऽतिसङ्गं
हित्वा समस्तमहनीयगुणान् हिनस्ति ।।५।।

# ११०. आचार्याः गिरिधरशर्मचतुर्वेदाः

## सारस्वतक्रतुकरं सततं स्मरामः

विद्वन्मिलिन्दनमनीयमरन्दविन्दुशोभास्पदं च सरसोऽपि भुवो विभूतिम् ।
वन्द्याभिवन्दितसनातनधर्मलक्ष्म्या लीलालयं किमपि जङ्गमपद्ममीडे।।१।।

या भारतीकरसरोरुहसारणेन दिव्यं स्वनं जनयति श्रवणामृताख्यम् ।
तामानतोऽस्मि विपदामभिमानहन्त्रीं तन्त्रीमशेषसुखबीजविपञ्जिकायाः।।२।।

शब्दाभिधेन किरणेन मनोहरेण भास्वद्वपुर्निहतसर्वविधान्धकारम्।
अन्तर्निलीनतमसःप्रशमैकहेतुं लोकोत्तरं किमपि धाम वयं स्मरामः।।३।।

गीतोपदेषनिरतं निहताघवृन्दं धर्मप्रियं विततभारतभालरत्नम् ।
सारस्वतक्रतुकरं कृतिनं च पुण्यश्लोकं गुरुं गिरिधरं सततं स्मरामः।।४।।

यैर्नैगमं चरमतत्वमपोदि यत्नाद्, यैरागमीयविधिरप्यनुशीलितश्च।
तान्माननीयनिगमागसम्प्रदायसेवाव्रतैकरसिकान् सततं स्मरामः।।५।।

एकेन येन परिपोषमुपेत्य नानासंस्थाः स्थिराः समभवन्मुदितात्मवृत्त्या।
कर्मण्यताप्रणयिनं कृतिनं, विशुद्धं पूजास्पदं बुधवरं तमनुस्मरामः।।६।।

उच्चैः स्थितोऽपि विनतः, स्थविरोऽपि पूर्णः
शक्तो युवाऽतिमृदुलः प्रखरोऽपि शश्वत्।
आन्वीक्षिकीप्रणयवागपि काव्यविद्यास्निगन्धः
पुराणरसिकोऽपि नवानुरक्तः ।।७।।

यश्चात्मसंसदि सदैव समर्चितोऽपि, नीराजितो विमतपण्डितमण्डलेऽपि।
यः संस्कृतस्य नितरां समुपासकोऽपि हिन्द्या अपि प्रथितपोषक एष आसीत्।।८।।

श्राद्धादिसाधनविधौ, प्रतिमार्चनायां यो वैरिसर्पविषशोषणदीक्षितोऽभूत्।
तं वन्दनीयमधुसूदनमावहन्तं सत्यं भुजङ्गशमनं गरुडं स्मरामः।।९।।

उत्सृज्य जीवनमतीव सुनिर्मलं यो वाग्वल्लरीमनुदिनं मुदितः सिषेच ।
तस्मै निसर्गमधुरोज्ज्वलवारिदाय श्रद्धाञ्जलिं समुदिता वयमर्पयामः ।।१०।।

नीचेन केनचन सन्निहितेन गर्वं, द्यौरादधाति यदि तर्हि वसुन्धरापि ।
जीवान्नितान्तसुमतीनपि शिक्षमाणं त्वामेत्य किं नहि बिभर्तु महाभिमानम् ।।११।।

वाचस्पतिं विबुधमण्डलवन्दीयं भूलोकगौरवविवर्धनहेतुभूतम् ।
दुर्बोधतत्वसरलीकरणप्रकारे श्रीमन्तमात्मविनयं सततं स्मरामः ।।१२।।

# १११.आचार्याः बलवन्तरायभट्टाः

सत्कीर्तिकीर्तितमनल्पगुणाभिरामं
सद्वृत्तमुज्झितसमस्तदुरन्तदोषम् ।
दिश्यात् समं परिवारसुखानुभूत्या
मृत्युञ्जयश्चिरमनामयजीवितं वः।।१।।

श्रीमद्गुरोश्चरणपङ्कजचञ्चरीकं
सङ्गीतमङ्गलमहोत्सवमेरुदण्डम् ।
शिष्यप्रशिष्यजनकल्पतरुं वरेण्यं
भट्टावतंसमनघं बलवन्तमीडे।।२।।

यः पञ्चसप्ततिसमा वयसः प्रपूर्य
श्रीकौस्तुभोत्सवमुदं वितरन् प्रियेभ्यः।
अस्मभ्यमर्पयतु सान्द्रसुखं शतायुः
प्रीतः प्रसादसुमुखो विमुखोऽपराधात्।।३।।

सर्वं प्रियं परिजनं च कलाकलापैः
संयोज्य संसदि सतां गणनीयवृत्तम्।
कृत्वा भवानिव भवान् भुवने चकास्ति
पूर्णत्वमेति हि जनः स्वजनैः समेतः।।४।।

भट्टान्वयप्रभवरत्नसमुच्चयेषु
पूर्णप्रभावलयितं बलवन्तमीडे।
योऽद्यापि कण्ठसुधया जगतीतलस्य
सामाजिकश्रवणमङ्गलमातनोति ।।५।।

प्रख्यातगायकमहामणिमालिकाया
मेरुं विदग्धपरिषत्सु सदाग्रगण्यम्।
ओङ्कारनाथगुरुदेवपदारविन्दं
ध्यायामि यो वसति भट्टमुखेऽधुनापि।।६।।

तं निर्मलाचरणचर्चितकान्तकायं
निर्मत्सरं सुयशसं बलवन्तमीडे।
शिष्यप्रशिष्यनिवहः सहितं सभार्यं
राराधयत्यतितरां प्रभविष्णुमीड्यम्।।७।।

सर्वेषु प्रियबान्धवेषु मुदितामुल्लासयन्नन्वहं
कल्याणीं मतिमौरसेषु वितरन् भव्याशिषा प्रीतिमान् ।
यावज्जीवनमात्मनोऽमृतकलाकल्पैर्जनान् मोदयन्
पूर्णायुः शतवार्षिकोत्सवविधिं संयोजयेर्निश्चितम् ।।८।।

योगेनाप्तसमाधिना चपलतां स्वान्तस्य निर्मूलयन्
नादब्रह्मणि रञ्जयन् निजमनो निःश्रेयसं चिन्तयन्।
आशीर्भिः शुचिसन्ततीः समुदयन् कीर्त्या दिशोः शुभ्रयन्
भारत्याः स्तनगौरवं विशदयन् जीव्याः समानां शतम्।।९।।

मर्यादाऽऽर्यजनस्य भूरि लभतां भूयः प्रतिष्ठां परां
शास्तारः शुचितां सदाऽऽर्जवमयीं भूयो लभन्तां स्थितिम्।
नेतारोऽखिलदुष्प्रपञ्चसरणिं त्यक्त्वा शुभां पद्धतिं
कर्त्तव्योन्मुखमानवा भरतभूभागस्य दध्युर्यशः।।१०।।

नादब्रह्मसमर्चनेऽर्पितमना वैदुष्यसौजन्ययोः
सिन्धुः कीर्तिसमुज्ज्वलः शुचिरुचिर्विद्वज्जनाभ्यर्चितः।
सौम्यः सद्गुणशेवधिर्मधुसुधास्यन्दीस्वरैरर्हितो
गम्भीरो वचसा पवित्रमनसा जीयाः समानां शतम्।।११।।

## आचार्याः वेङ्कटाचलममहाशयाः

वेदान्तशास्त्रपरिशीलनलब्धबोध-
चिन्तामणि-स्फुरितदीधितिमालिकाभिः।
उदभासितेन हृदयेन लसत्प्रकाशः
श्रीवेङ्कटाचलसुधीन्द्रवरश्चचकास्ति।।१।।

× × × ×

### श्रीविष्णुकान्तशास्त्रिणः

ज्योतिर्विदां परिषादि प्रथिताभिधानः
श्रीमत्कवीन्द्रगणानासु सदाग्रगण्यः ।
विद्वत्सभासु च सुचारुविचारशीलः
श्रीविष्णुकान्त इति विश्रुतनामधेयः।।१।।

# ११२.वाराणसी जयति.......

वाग्देवताललितकेलिनिकेतनश्रीर्वाराणसी जयति संस्कृतिजन्मभूमिः ।
तत्रापि भाति हृदये मणिदामविद्या, पीठाह्वयं गुरुकुलं विबुधावलीनाम् ।।१।।

कवीन्द्रतायाश्च यतीन्द्रतायास्त्रिवेणिका काचन वाग्मितायाः।
मन्दात्मनामप्यवगाहमात्रात्, सद्यः प्रसूते विबुधाधिपत्यम्।।२।।

सरस्वतीरङ्गगृहायमाणान्, दयालुतालिङ्गितचित्तवित्तान् ।
विकारसम्मार्जनचर्चिताङ्घ्रीन्, गुरून्नमामः स्वधियो विशुद्धये ।।३।।

दुष्पारवाङ्गमयपयोनिधिपारभाजस्तेजस्विनां धुरि विदामथ कीर्त्तिनीयाः।
श्रद्धास्पदं सुमनसां परिपूज्यापादाः, क्षेत्रेशचन्द्रगुरवो नितरां जयन्ति ।।४।।

औद्यानिकं कुसुममापणिकं गुणञ्च, संचिन्वतश्च परतो ध्रुवमेव सूचीम् ।
मालाकृतः परमपारगुणाभिरामा, मालान् लोभयति भव्यजनाक्षिमालाम् ।।५।।

रूपं नितान्तमधुरं हृदयं ततोऽपि, पीयूषतोऽपि मधुरं वचनं वयश्च ।
नर्मातुलं मधुरमित्यमुपाश्रयन्तं, ब्रूमो वयं मधुरमेव रसं रसज्ञाः।।६।।

गङ्गामनङ्गरिपुमूर्ध्नि समुच्छलन्तीं
विश्वेश्वरं, बटुकभैरवमन्नपूर्णाम् ।
वन्दामहे स्वकुलदैवतपादपद्मं
वाणीं विमुक्तिनगरीं मणिकर्णिकां च ।।७।।

सद्वृत्तमुज्झितसमस्तसमृद्धितृष्णं
कृष्णार्पणप्रणयिनं यमिनां वरेण्यम् ।
विद्याप्रदं सुकृतिनं विनयावतारं
सर्वार्थसिद्धिजनकं जनकं स्मरामि।।८।।

प्रायेणात्र मनुष्यमानसमलङ्कर्तुं मरालोपमा
देवाः शश्वदधिष्ठिताः शुचिरुचिं सम्पादयन्तोऽलसन्।
तत्रैवाद्यतने त्वनेहसिपरं क्रूराः करालाशया
दैत्या एव निसर्गतोऽतिकुटिलं कर्माश्रयन्तेऽनिशम्।।९।।

हिंसा सज्जनवञ्चना परुषता क्रूरात्मतावक्रता
कामक्रोधमदाभिमानमलिनी भावक्रिया प्रक्रिया ।
नारीणामवमाननावहरणप्रीतिः कलिर्बान्धवे
सर्वत्रैव विलोक्यते भरतभूभागे प्रवृत्तिर्नृणाम्।।१०।।

विश्वम्भरोऽभिमतनूतनवारिवाहो
ज्ञानामृतं सकलतापहरं प्रवर्षन् ।
विश्वस्य साधुभरणाय गृहीतदेहः
विश्वं बिभर्त्तु नवजीवनदानवृत्त्या ।।११।।

# ११३.पद्यपत्रम्

का.हि.वि.वि.
वाराणसी

श्रीः

भारती कवेर्जयति

## कविभारती

विद्यापीठकुलाधिदैवतमलङ्कारं विदां संसदः
प्रज्ञावृत्तविवेकशीलनिलयं कारुण्यवारां निधिम् ।
सौजन्यैकनिकेतनं सुमनसां सम्भावनामन्दिरं
पाण्डेयोज्ज्वलवंशमौक्तिकमणिं मूर्ध्ना भवन्तं नुमः।।१।।

छात्रः पत्रमिदं निवेदयति यः श्रीमत्कराम्भोजयो-
रात्मीयः क्रियतां एष भवता संख्य सदैवावता।[१]
नामोल्लेखनपूर्वकं निवसतेः कृत्वा प्रबन्धं प्रियं
कल्याणाय सदास्य चेतसि शुभं ध्यायेरिति प्रार्थये ।।२।।

सेवानिवृत्तिकालो मे यतः सन्निहितोऽधुना।
तत एव भवन्मूर्ध्नि भारस्त्वारोपितोऽस्त्ययम् ।।३।।

यथाज्यं लभतां विद्यां सदुपाधिं शुभां मतिम्।
विनयं च सदाचारं तथा कुर्यात् क्रियाविधिम् ।।४।।

यदिदं निर्भयेनैव सर्वभावेदितं मया ।
कदर्थितश्च साम्रेडं तत्र हेतुर्भवत्कृपा ।।५।।

भवदीयेष्वन्यतमो
रतिनाथः
३.२. ८२

सेवायाम् -
प्रो० डॉ० श्री अमरनाथपाण्डेय :
काशीविद्यापीठम्

---

*१- पाठान्तरः - सर्वात्मना तुष्यता।*

# ११४.गद्यकाव्यम्*

येषां निवासवशलब्धसुवैभवेयं वाराणसी जगति
वन्द्यतमाऽवभाति।
तेषां नमस्यसुधियां चरणारविन्दधूलीकणो जयति शाश्वतशुद्धये
नः।।

भारतीदेव्या लीलानिकेतनमिदं वाराणसीभूतलं चिरेण समुल्लसति। इदं हि भारतीयायाः संस्कृतेर्मातृन्दिरं, सभ्यताया भव्यं भवनं, सुरगिरो रङ्गशालं, धर्मस्य दुर्गं, विश्वस्य कुलगुरुगृहं, पवित्रतायाः शरणं, म्रियमाणानां सौख्यसद्म, साम्बशिवस्य शिवसदनं, गङ्गाया अभङ्गुरं निशान्तं नितान्तमानन्दयति जनुष्मतः। अत्र संस्कृतविद्याया ललितो विलासो न केवलमत्रत्यानपि तु विश्वजनीनान् जीवान् नवैः समुल्लासभरैरामोदयन्नवतिष्ठते। इदानीमपि चतुर्दशसु विद्यासु निरवद्ययशसः सुमनसः स्वशास्त्रचर्चया सभा विभासयन्ति, जिज्ञासून् परं तर्पयन्ति, अधिजिगांसूँश्च प्रकाममध्यापयन्ति, इहागतान् विदुषः स्वशास्त्रज्ञानसमुन्मेषहिम्ना नितरामावर्जयन्ति। काश्याश्च सर्वातिशायिनीं कीर्त्तिं सुस्थिरयन्ति। अत्र विविधागमेषु विज्ञातरहस्या नमस्याः समासादितवरिवस्या विद्वांसो वाराणसीं गौरवेणागूरयन्ति।

..... एषां शास्त्ररत्नाकराणामधिमुखमनिशं वीणापाणिर्वाणी नृत्यति, वाग्मिता दीव्यति, अध्यापनकला विकसति, शास्त्रविचारः स्फुरति, कविता प्रादुर्भवति, ग्रन्थग्रन्थिः श्लथीभवति। अमीषां सविधे समासादयति सदाचारः स्थैर्यम्, आस्तिक्यमाधिक्यं, विनयः प्रकर्षं, प्रसादः समुल्लासं, वात्सल्यमुज्जृम्भणं, सद्भावो वैभवम्, आर्जवमौन्नत्यम्, अध्यवसायो विकासम्। येषामुत्कर्षस्तुहिनगिरिसमुत्तुङ्गश्रृङ्गमतिक्रामति, गाम्भीर्यं च सागरस्यागाधतामवधीरयति तेषां संस्तवजिज्ञासया नितान्तमुत्कण्ठितान् प्रणयिबुधानावर्जयितुं कतिपयैरेव पदैरुपायनीकृत्य परिचयमयमपि स्वाग्जन्मसाफल्यमनुशीलयितुं प्रक्रमते।

.....लक्ष्मीः समुल्लसति दास्यमुपेयुषी, वाग्-
देवी प्रसीदति सदास्यमधिश्रयन्ती।
छायेव सिद्धिरनुतिष्ठति यस्य पार्श्वे
सोऽलौकिको जयति कोऽपि
महाविभूतिः।।

*आचार्यमहादेवशास्त्रिमहाभागानामभिनन्दनग्रन्थात् गृहीतानि कानिचित् वाक्यानि।

दुर्बोधसर्वविधशास्त्ररहस्यभूत-
ग्रन्थिश्लथीकरणकौशलमादधानः
सारस्वतेन महसाऽञ्चितचिद्विलासो
लासो गिरामिव जयत्यतुलः स
कोऽपि।।

सालङ्कृतिर्गुणवती, रसरीतिनद्धा
स्फीतानुभावमहिता सहिता सुवृत्ता।
सा स्रग्धरा जयति काचिदपूर्वशोभा
लोकोत्तरप्रणयिनी कविता प्रियेव।।